ṢOḌAŚĀDHYĀYĪ

WITH COMMENTARY
PART IV

TNSDA
10214

Editor
R.Ganesan

General Editor
A.Abdul Majid, M.,A.,

G.O.M.L. Publication No.440
Sanskrit Publication No.118

ṢOḌAŚĀDHYĀYĪ

WITH COMMENTARY
PART IV

Editor
R.Ganesan
Sanskrit Pandit
G.O.M.L., CHENNAI-5.

General Editor
A.Abdul Majid, M.,A.,
Director of Archaeology (i.c.)
Chennai 118

(C)
G.O.M.L.

Price: Rs.118

2000

राजकीयप्राच्यलिखितग्रन्थालयप्रसिद्धीकरणसङ्ख्या 440
संस्कृतप्रसिद्धीकरणसङ्ख्या 118

षोडशाध्यायी – सटिप्पणी

(भागः 4)

सम्पादकः
रा.गणेशः (शिरोमणिः)

संस्कृतपण्डितः
जि.ओ.एम्.एल्.
चेन्नै .5

TAMIL NADU STATE DEPARTMENT OF ARCHAEOLOGY
LIBRARY,
Acc No. 10214
Date
MADRAS-28

जेनेरल् सम्पादकः
अ.अब्दुल् मजीद्, एम.,ए.,
निर्देशकः (i.c.)
पुरावस्तुगवेषणविभागः
चेन्नै-113

मूल्य : 118 रूप्यकाणि
2000

Wonder, that is G.O.M.L.

This is a rare treatise on the methods of Yagna.

Herein available is the commentary by an unknown author of Kerala along with the orginal text rendered by Jaimini.

This is a basic book to study the very throb of the heart of ancient Indians including Tamils.

Innumerable practices of ancient Tamils can be gleaned from this version.

My sincere thanks are due to Mr.A.Abdul Majid, M.A., Director of Archaeology (i.c.)for his unflinching efforts.

DR.S.SOUNDARAPANDIAN
M.A.(Tamil) , M.A.(Eng.),B.Ed.,Dip.Skt.,Ph.d.
Curator
G.O.M.L.

2000}

Challenging the Aryan Theory

Dr.S.Soundarapandian

According to Isaac Taylor, the Aryans were unaware of the salt.

But, in Vedas, we come across several places about cooking and the preparation of tasty prasadaa which could not have been prepared without salt.

Aryans as per the Aryan theorists, were knowing to count upto 100; but we have ample evidence in Sama veda that vedic Indians were knowing to count upto 10000 and more. (Sama Veda, Purvarchika,I, Kanda 30)

However, these are not the pivotal arguments in our challenge.

The Rudra in Vedas is dearly meant for the"Kurinji" land (hill and surrounding land).

The entire description of Rudra is only about hill and the surrounding place.

People of vedic period were worshiping mainly Sun, Rain, Land and the like.

Rudra, Vishnu,,Brahma are only the personifications of these natural gifts.

So, the full texts of the vedas stand a proof for only their Indian culture, if not the Dravidian culture.

Aryans, a pastoral nomad, definitely were not that much cultured as theIndians at the time of their so called spread.

So, worship of the nature or nature gods was not of the origin of Aryans but of Indians.

Moreover, the fourfold division of castes namely Brahmin, Kshatriya, Vaisya and Sudra was not Aryans'; these four divisions were very much Indians.

In fact, no body bifurcated these four by force.

Naturally, these four classes were there in our ancient Indian society.

Only the Indian sages had articulated the four (that is why Sankaracharya in suthra, he observed that the four sects were made by Brahma).

Take for example, a family four sons , the elder son may behave like a brahmin, the second son may be hotbloooded like Kashatriya, the third son may be money minded and materialistic like Vaisya, and the fourth son may become workaholic and may be compared to Sudra. Not all the four issues, quite often, behave alike!

Anybody can check up this simple phenomenon in families even today.

So, what would have been the society 5000 years ago with these four natural divisions only!

So, Aryans never instilled in the minds of Indians , the four castes.

E.B.Havell and others, simply because a handful of Sanskrit words are similar to the Zend,had jumped to the conclusion that the Sanskrit culture was that of the Aryans.

In fact the Dravidian languages including Tamil and Kannada do exhibit innumerable like behaviours as Sanskrit language in not only words but also in syntax, prosody etc.

So, because of this match, will they call the Dravidian languages as the donations of Aryans?

Vedas give extreme importance to prosody (Chandas). Only the Dravidian languages, throughout the world compared, stand foremost in giving paramount place for prosody in their compositions. This fact clearly puts the argument that Vedas were the brain children of Aryans to the ground.

Taking the agni cult, which Aryan descendant abroad or central Asia still holds the practice of preserving the agni (fire) at home? But in South India, there are several families which still preserve the celebrated Garhapatya etc. agnis. This clearly proves that the agni worship was not the practice of Aryans but of the Indians. May be our culture had gone to elsewhere, because any deeprooted cultural phenomena will be at least lingering in that area of origin.

About the physique of Aryans, the French differ with the Germans. According to one verson, theAryans were short and black; as per another, Aryans were tall and fair. Which is correct? No body knows!

So, looking at these angles, one can easily poohpooh the so called Aryan theory which was a cunning tool of the European Scholars utilised to dominate the Indians.

From where did the Sanskrit Language Get the Peculiar Sounds?

-Dr. S.Soundarapandian

Curator

The present Hindi Language possesses different 'Ka's, 'Cha's, 'ta's etc.

Hindi language took this sound pattern from Sanskrit.

But from where did the Sanskrit Language take these quaint sounds.

It was from Tamil!.

Yes, from Tamil only, the Sanskrit language had taken the so called sound pattern.

Strange it may seem, but it is true.

Let me prove this.

The four ka-sounds are already present in Tamil tongues.

Tamil people while releasing sounds for different letters, adopted their own fashions suitable to their own tongue.

So, naturally, different kinds of sounds evolved.

For ka- alone, in Tamil, there developed four various sounds as follows:

क	-	கடம்
ख	-	பக்கம்
ग	-	பங்கம்
घ	-	பொங்கர்

The four cha-sounds used by Tamils:-

च	-	உச்சாணி
ज	-	பஞ்சு
छ	-	குச்சம்
झ	-	பூஞ்சை

For Ta-sounds?

Yes, ;the Tamils had been using the different ta-s in their activities of speech as follows:-

ड - டங்கம்

ट - விட்டம்

ढ़ - பண்டம்

ठ - கூட்டம்

Similarly, the following examples clearly show us, that the Sanskrit language had taken only Tamil pronunciations.

त - புத்தகம்

द - இதம்

थ - தரம்

ध - விதம், கூதல்

For pa?

Yes, we can show examples:-

प - பரம்

ब - பம்பரம்

भ - கபம்

फ - பலம்

In all the above examples, there may be a minute variation between the actual Sanskrit sound and the Tamil example; but, the pattern or design is more or less the same.

So, this analysis clearly tells us that the Tamil language was the birthplace of the different varieties of sounds for one and the same letter and the Sanskrit language had taken from the Tamil language its sound pattern for its alphabets.

किञ्चिन्निवेदनम्

"षोडशाध्यायी - सटिप्पणी" ग्रन्थस्य तृतीयभागे 176 तमे पृष्ठे दशमाध्यायस्याष्टमपादे, दशमपङक्त्यनन्तरस्यानुवृत्तिः, 197 तमस्य पृष्ठस्य दशमपङ्क्ति.ततः आरभ्य 249तम पृष्टपर्यन्तं विद्यते। तदनन्तरं 176 तमस्य पृष्टस्य एकादशपङ्कि.तः आरभ्य 197 तमस्य पृष्टस्य अष्टमपङ्क्ति पर्यन्तं (द्वादशाध्यायस्य तृतीयपादः) विद्यते।

சோடசாத்யாயி உரையுடன்

பகுதி - 4

ஜைமினி எழுதிய 20அத்தியாயங்களில், 16 அத்தியாயங்கள் (சோடசம் - பதினாறு) மட்டும் உரையுடன் ஒரு நூலாக உள்ளது. இந்த உரையாசிரியர் பெயர் அறியப்படவில்லை; கேரளத்தைச் சேர்ந்தவர் என்று தெரிகிறது.

உரை கி.பி.16ஆம் நூற்றாண்டைச் சேர்ந்தது. யாகத்தில் கடைப்பிடிக்க வேண்டிய முறைகள் பற்றிய நூல் இது.

யாகமுறைகளானாலும், இதில் எத்தனையோ தமிழர் பண்பாட்டுக் கூறுகள் உள்ளன என்பதை எவரும் மறுக்க இயலாது. இவ்வகையில் ஆய்வுக்கு இன்றியமையாத அடிப்படை நூலாக இது திகழும்.

இந்நூலில் வரும் பஞ்சஜனம் (ஐவகை மக்கள்) என்ற குறிப்பு ஆய்வுக்குரியது; தமிழர் கண்ட ஐவகை நில மக்களைப் பண்டு இது குறித்திருக்கலாம்.

முனைவர் **சு. சௌந்தரபாண்டியன்**
எம்.(தமிழ்), எம்.,எ.(ஆங்), பி.எட்.,டிப்.வ.மொ,பி.எச்.,டி.,
காப்பாட்சியர்

।। श्रीः।।

।।अथ द्वादशाध्यायस्य चतुर्थः पादः।।

।। जपस्तुत्याशीरभिधानानां समुच्चयाधिकरणम्।।

सू. जपाश्चाकर्मयुक्ता स्तुत्याशीरभिधानाश्च याजमानेषु समुच्चयः स्यादाशीः पृथक्त्वात्।।

(मू) यत्राविवक्षार्थमुच्चारणमात्रमदृष्टाय क्रियते ते जपा यथा "वैष्णवीमनूच्य वाग्यन्तव्या सारस्वतीमनूच्य वाग्यन्तव्या बार्हस्पत्यामनूच्य वाग्यन्तव्ये"त्यादयः, गुणकीर्तनं स्तुतिः यथा ग्निर्मूर्धा दिव" इति, आशसनमाशीः "आयुर्दा अग्नेऽस्यायुर्मे देही"ति गुणविशिष्टगुणिप्रकाशनमभिधानं यथा "एषोऽसि त्वेषोऽसीति, एतेषु जपमन्त्रेषु स्तुतिमन्त्रेष्वाशीर्मन्त्रेषु अभिधानमन्त्रेषु च संशयः - किं विकल्प उत समुच्चय इति।

तत्रैकार्थत्वात् ब्राह्मणविहितवत् विकल्प इति प्राप्ते,

ब्रूमः। (देवतोपलचणात्मककार्यैक्यात् विकल्प इति।) अदृष्टार्थत्वात् समुच्चय इति।।

।। बार्हस्पत्ये द्विविधयाज्यानुवाक्ययो र्विकल्पाधिकरणम्।।

सू. याज्यानुवाक्यासु तु विकल्पः स्याद्देवतोपलक्षणार्थत्वात्।

(मू) ऐन्द्रो बार्हस्पत्ये कर्मणि द्वे याज्यानुवाक्यायुगले समाम्नाते "इदं वामास्ये हविः अयं वां परिषिच्यत" इत्येकं "अस्मे इन्द्राबृहस्पती बृहस्पतिर्नः परिपात्वि"त्यपरम्। तत्र संशयः -

किं समच्चुय उत विकल्प इति।

पूर्वन्यायात् समुच्चय इति प्राप्ते,

ब्रूमः। देवतोपलक्षणात्मककार्यैक्यात् विकल्प इति।

अत्र क्वचिद्वर्णकान्तरम् - याज्यानुवाक्ययोः किं विकल्प उत समुच्चय इति संशयः।

देवतोपलक्षणैककार्यत्वात् विकल्प इति प्राप्ते,ब्रूमः पुरोनुवाक्यासमाख्यावशात् समुच्चय. इति।

।। सोमक्रयसाधनानामजादीनां समुच्चयाधिकरणम्।।

सू. क्रयणेषु तु विकल्पः स्यादेकार्थत्वात्।

(मू) "एकहायन्या क्रीणाती"त्यादीनि दश क्रयद्रव्याणि। तेषु वा एकहायन्यादिगुणविशिष्टक्रयविधानात् दश क्रयणानि। तेषु संशयः - किं विकल्प उत समुच्चय इति।

तत्रैकार्थत्वात् व्रीहियववत् विकल्प इति प्राप्ते,

ब्रूमः। विक्रेत्रानतिसौकर्यरूपप्रयोजनसत्वात् समुच्चय इति।

(टि) ।। श्रीः ।।

।।अथ द्वादशस्य चतुर्थः पादः।।

अथ त्रिभिरधिकरणैर्मन्त्रेष्वेव चिन्ता यत्रेत्यादिना। अत्र गुणभेदात् क्रियाभेदः तत् कथमेकार्थत्वमत आह - एकहायन्यादीति। क्रयाः सोमप्राप्त्यर्थत्वादेकार्थास्तद्द्वारेण च द्रव्याण्यप्येकार्थानि। तदनेन प्रकारेण क्रयाणामेवात्र विकल्पसमुच्चयौ चिन्त्येते इत्यभिप्रायः।

।। उपयजनादिप्रतिपत्तिकर्मणां समुच्चयाधिकरणम्।

सू. संस्कारे च तत्प्रधानत्वात् ।।

(मू) अग्नीषोमीये पशौ गुदेनोपयाजा आम्नाताः "गुदेन उपयजति प्राणो वै गुद" इति। एकादशिनेषु चानेकगुदसन्निपातः। तत्र संशयः - किमुपयजनस्यार्थकर्मत्वात् गुदानां विकल्प उत प्रतिपत्तित्वात् समुच्चय इति।

तत्र गुदेनेति तृतीयाश्रवणात् अर्थकर्मत्वाद्विकल्प इति प्राप्ते,

ब्रूमः। गुदस्योपयुक्तशेषत्वात् प्रयाजशेषाभिघारणवत् प्रतिपत्तित्वात् समुच्चय इति। प्रतिपत्तित्वस्य प्रयोजनकथनमेतत्।।

।। आधने विविधसङ्ख्याकानां दक्षिणानां विकल्पाधिकरणम्।।

सू. सङ्ख्यासु विकल्पः स्यात् श्रुतिविप्रतिषेधात्।।

(मू) आधाने श्रूयंते दक्षिणः एका देया षड्देयाः द्वादश देयाः इत्यादयः। तत्र संशयः किं समुच्चय उत विकल्प इति।

तत्र दक्षिणानामानत्यर्थत्वात् क्रयवत् समुच्चय इति प्राप्ते,

ब्रूमः। सङ्ख्याश्रुतिविरोधात् विकल्प इति।।

।। पशुगणेषु जाघनीनां विकल्पाधिकरणम्।।

सू. द्रव्यविकारं तु पूर्ववदर्थकर्म स्यात्तथा विकल्पे नियमः प्रधानत्वात्।।

(मू) दर्शपूर्णमासयोराज्यं जाघनी च पत्नीसंयाजद्रव्यतया विकल्पेन विहिते चाग्नीषोमीये चोदकप्राप्ते । पुनरग्नीषोमीयेऽपि "जाघन्या पत्नीः संयाजयन्तीति श्रूयते। ततश्चोदकेन पशुगणे प्राप्नोति। तत्र चानेकजाघनीसंनिपातः। तत्र दर्शपूर्णमासयोर्जाघन्या गुणत्वात्

पत्नीसंयाजानामर्थकर्मत्वमविवादम्। अग्नीषोमीये तु प्राप्तस्यैव पुनः श्रुत्या नियमात् अर्थकर्मत्वम्। ततश्च पशुगणेऽप्यर्थकर्मत्वं जाघनीनां विकल्प इति सिद्धान्तस्थितिः। तत्र संशयः - किमग्नीषोमीये श्रुतेन जाघनीवाक्येनजाघनीप्रतिपत्त्यर्थतया पत्नीसंयजविधानात्तथैव पशुगणे प्राप्तत्वात् तत्रापि प्रतिपत्तित्वात् जाघनीनां समुच्चय उताग्नीषोमीये श्रुतेन वाक्येन जाघनीनियमात् तत्राप्यर्थकर्मत्वात् तथैव पशुगणे प्राप्तत्वात् तत्राप्यर्थकर्मत्वात् जाघनीनां विकल्प इति।

तत्राद्दष्टकल्पनाप्रसङ्ग.ात् प्रतिपत्तिविधानादुक्तरीत्या समुच्चय इति प्राप्ते,

ब्रूमः। अद्दष्टस्य प्रकृतावेव क्लृप्तत्वात् उक्त वाक्येन नियमविधानात् उक्तरीत्या विकल्प इति।।

(टि) अथ चतुर्भिरधिकरणैर्विकल्पसमुच्चयावेव चिन्त्येते अग्नीषोमीय इत्यादिना।।

।। उखायां काम्येन नित्याग्नेर्विकाराधिकरणम्।।

सू. उखायां काम्यनित्यसमुच्चयो
नियोगे कामदर्शनात्।।

(मू) अग्नावुख्योऽग्निः "सन्तापनेन अग्निं जनयन्तीति"। तं प्रकृत्य श्रूयते "वृक्षाग्रात् ज्वलतो ब्रह्मवर्चसकामस्याहृत्यावदध्यात् भ्राष्ट्रादन्नाद्यकामस्य वैद्युतात् ब्रह्मवर्चसकामस्ये"ति। तत्र संशयः - किं काम्यस्य वार्क्षग्रादेर्नित्यस्य चाग्नेः समुच्चय उत विकल्प इति।

नित्योऽग्निर्होमार्थः काम्योऽवधानार्थ इत्येवं प्रयोजनभेदात् समुच्चय इति प्राप्ते,

ब्रूमः। प्राप्तमेव होमार्थाग्न्यवधनमाश्रित्य विहितस्य वार्क्षाग्राद्याग्नेः प्रयोजनभेदात् विकल्प इति।।

(टि) अथ चतुर्भिरधिकरणैर्विकल्पसमुच्चयावेव चिन्त्येते अग्नीषोमीय इत्यादिना।

।। वैकारिकाग्नेराहवनीयत्वाभावधिकरणम्।।

सू. स आहवनीयः स्यादाहुतिसंयोगात्।।

(मू) अस्मिन् काम्येऽग्नौ संशयः – किमयमाहवनीयशब्दवाच्यः उत नेति।

आहवनीयशब्दस्य एत्याहूयते अस्मिन्निति आहवनीयेति यौगिकत्वादाहवनीयशब्दवाच्योऽयमग्निरिति प्राप्ते,

ब्रूमः। आहवनीयशब्दस्याधानजन्यसंस्कारनिमित्तत्वान्नाय-मग्निराहवनीयशब्दवाच्य इति। तस्मात् गतश्रीधारणाद्याहवनीय-धर्माः अत्र न कर्तव्या इति।।

।।वैकारिकाग्नेराधानिकसंस्काराभावाधिकरणम्।।

सू. तस्मिन् संस्कारकर्म शिष्टत्वात्।।

(मू) तस्मिन्नेव संशयः – किमाधानादिसंस्कारा कर्तव्या उत नेति।

तत्र होमार्थत्वात् कर्तव्या इति प्राप्ते,

ब्रूमः। आधानादिसंस्कृताहवनीयस्थाने तद्विकारत्वेन संस्कृतस्य विधानान्न संस्काराः कर्तव्या इति।।

।। नित्यस्योख्यस्याग्नेरधारणाधिकरणम्।।

सू. नित्यधारणे विकल्पो न ह्यकस्मात् प्रतिषेधः स्यात्।।

(मू) नित्ये उख्येऽग्नौ संशयः5 – किमुख्योऽग्निर्नित्यधार्यो न

वेति विकल्प उत नैव धार्य इति।

तत्र "न प्रतिसमिध्यो यत् प्रतिसमिध्यो भ्रातृव्यमस्मै जनयेत्" इति प्रतिषेधेनाधार्यत्वस्य प्रतिषेधानुमितप्रापकविधिना च धार्यत्वस्य सिद्धत्वात् विकल्प इति प्राप्ते,

ब्रूमः। सामान्यवचने प्राप्तस्य गतश्रिय आहवनीय धारणस्य उख्यविषये प्रतिषेधान्न धार्य उख्य इति।

(टि) एवं त्रयोदशभिरधिकरणैर्विकल्पसमुच्चयचिन्तां समाप्य तत्प्रसङ्ग.ादिदमारभ्यते त्रीण्यधिकरणानि अस्मिन्निति।।

।। सत्रे शुक्रस्पर्शादीनामेककर्तृकत्वाधिकरणम्।

सू. परार्थान्येको यजमानगणे।।

(मू) सत्राहीनयोरनेकयजमानसमवाये यानि परार्थानिकर्माणि "शुक्रं यजमानोऽन्वारभते यजमानसंमितोदुम्बरी भवतीत्यादीनि शुक्रान्वारम्भणौदुम्बरीसंमानादीनि तानि. किं सर्वैः कर्तव्यानि उतैकेनेति संशयः

तत्राविशेषत् सर्वैः कर्तव्यानिति प्राप्ते,

ब्रूमः। एकेन कृते प्रयोजनसिद्धेः एकेनैव कर्तव्यानीति। उत्तरविवक्षया प्राप्त्यर्थमिदम्।।

।। अहीने शुक्रस्पर्शादौ यस्य कस्यचिद्यजमानस्य कर्तृत्वाधिकरणम्।।

सू. तत्रैव संशयः - स एकः किं नियत उतानियत इति।

तत्र सत्रवन्नियमसम्भवात् नियत इति प्राप्ते,

ब्रूमः। अविशेषत्वादनियत। इदमपि प्राप्त्यर्थम्।।

।।सत्रे शुकस्पर्शादौ गृहपतेरेव कर्तृत्वाधिकरणम्।।

सू. मुख्यो वाऽविप्रतिषेधात्।।

(मू) सत्रेषु संशयः - किमेको नियत उत गृहपतिरेवेति नियत इति।

तत्राविशेषादनियत इति प्राप्ते,

ब्रूमः। विरोधात् गृहपतिरेव कुर्यादिति। अन्येषान्तु ऋत्विक्त्वात् स्वस्वकर्मव्यावृ {पृ} तत्वात् परित्यागे त्वार्त्विज्य- विरोध इति बोध्यम् ।।

।। सत्रेऽञ्जनादिसंस्काराणां सर्वगामित्वाधिकरणम्।।

सू. सत्रे गृहपतिरसंयोगाद्धौत्रवत्।।

(मू) सत्रे यजमानसंस्कारार्थानि कर्माण्यञ्चनाभ्यञ्जनादीनि। तान्यपि किं सत्रे गृहपतिनैव कर्तव्यानि उत सर्वैरिति।

तत्र संस्काराधिक्यजनितफलभूयस्त्वनिमित्तगृहपतिसमाख्यानात् गृहपतिनैव कर्तव्यानीति प्राप्ते,

ब्रूमः। सर्वेषां फलित्वात् फलार्थाः संस्काराः सर्वैः कर्तव्या इति।।

।। यजमानार्त्विज्ययोरार्त्विज्यस्यैव बलवत्त्वाधिकरणम्।।

सू. विप्रतिषेधे परम्।।

(मू) यत्रार्त्विज्ययाजमानयो: विप्रतिषेध: तत्रार्त्विज्यं कुर्यु: प्रधानत्वेन "ये यजमाना: त ऋत्विज" इति प्रत्यक्षविधानेन चार्त्विज्यस्य बलीयस्त्वादिति बोध्यम्

(टि) अथ चतुर्भिरधिकरणैर्याजमानचिन्ता सत्राहीनयोरित्यादि। सत्रवदिति। यथा सत्रे नियमं वक्ष्यति तद्वदित्यर्थ:। अनियम इति। अहीनेष्वनियम एवेति बोध्यम्।।

।। ब्राह्मणस्यैवार्त्विज्याधिकाराधिकरणम्।।

सू. प्रभूत्वादार्त्विज्यं सर्ववर्णानां स्यात्।।

(मू) किं ब्राह्मणक्षत्रियवैश्यानां सर्वेषामार्त्विज्यं स्यादुत ब्राह्मणानामेव स्यादिति संशय:।

तत्र सर्वेषामध्ययनवतां विदुषामार्त्विज्यं कर्तुं शक्यत्वात् सर्वेषां स्यादिति प्राप्ते,

ब्रूम:। "ब्राह्मणानामार्त्विज्यमि"ति नियमात् ब्राह्मणानामेवार्त्विज्यमिति।।

।। इति द्वादशाध्यायस्य चतुर्थ: पाद:।।

।। शुभमस्तु।।

(टि) विप्रतिषेध आर्त्विज्यमित्युक्तं तत्प्रसङ्गादार्त्विज्यस्य कर्ता चिन्त्यते - शक्यत्वादिति। स्मृति: पुरुषार्था तदतिक्रमे पुरुषस्य प्रत्यवाय एव न क्रतोर्वैगुण्यमिति भाव:। अस्तु वृत्त्युपायनियमस्मृति: पुरुषार्थैव तथापि क्रत्वर्थापि नियमस्मृतिरस्तीत्याशयेनाह - ब्राह्मणानामिति। अत्र हि "यज्ञं व्याख्यास्याम" इत्युपक्रमात् क्रत्वर्थत्वं विस्पष्टमेवेति भाव:।।

।। इति केरलीये षोडशाध्यायी टिप्पणे द्वादशाध्यायस्य।।

।।श्रीः।।

।। अथ श्रीशारीरकमीमांसायां प्रथमाध्यायस्य ।।

।। प्रथमः पादः ।।

।।ब्रह्मणो विचार्यत्वाधिकरणम् ।।

सू. अथातो ब्रह्मजिज्ञासा ।।

बृहदारण्यके चतुर्थाध्याये चतुर्थे षष्ठाध्याये पञ्चमे मैत्रेयीब्राह्मणे श्रूयते - "आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इति। तत्र "एतावदरे खल्वमृतत्वमि"त्ति वचनात् प्राप्तममृतत्वसाधनं आत्मदर्शनं द्रष्टव्य इत्यनूद्य तत्साधनत्वेन "श्रोतव्यो मन्तव्यो निदिध्यासितव्य" इति मननिदिध्यासनाभ्यां फलोपकार्यङ्ग.ाभ्यां सहश्रवणं अङ्गि.न "अरे पत्युः कामाये"त्युपक्रम्य "आत्मनस्तु कामाय सर्वं प्रियं भवती"त्युपसंहारात् सर्वतोविरक्तस्य मुमुक्षोर्विधीयते। तत्रामृतत्वं नाम आत्मानात्मनोर्बन्धस्यान्योन्यात्मकतया अन्योन्य धर्माणां चाध्यासात्मकस्य निवृत्तिः। आत्मदर्शने च नित्यबुद्धमुक्तस्वभावब्रह्मैकत्वापरोक्षज्ञानं, मननं युक्तिभिरनुचिन्तनम्। अनन्यविषयनिरन्तरज्ञानसन्तानो निदिध्यासनम् । श्रवणं नाम वेदान्तावाक्यानां ब्रह्मणि तात्पर्यनिर्णायकन्यायविचारः। अथवा वेदान्तवाक्यार्थ भूतब्रह्मविषयकशाब्दनिर्णयात्मकज्ञानं श्रवणम्। तद्विधानाच्च तत्साधनन्यायविचारशास्त्रारम्भोऽप्यर्थाद्विहित इति बोध्यम्। विधानादेव सिद्धं विषयप्रयोजनादिकं, शास्त्रारम्भं च न्यायतः साधयितुमिदमधिकरणम्। तत्र संशयः- किं मातुत्वादि-बन्धस्य सत्यत्वात् सत्यस्य च ज्ञानानिवर्त्यत्वात् बन्धनिवृत्तिरूपप्रयोजनस्य बद्धाबद्धयोर्जीवब्रह्मणोः ऐक्यरूपविषयस्य फलाभावेन फलेच्छावतोऽधिकारिणश्चासम्भवात् द्वादशलक्षणीरूपायां धर्ममीमांसायां कृत्स्नवेदविचारस्य कृतत्वेन गतार्थत्वाच्च "अथातो

ब्रह्मजिज्ञासे"त्या"द्यनावृत्तिश्शब्दादि"त्यन्त वेदान्तवाक्यार्थ-ब्रह्मविचारन्यायशास्त्रं शारीरकमीमांसाख्यं नारम्भणीयमुत मातृत्वादि-बन्धस्याज्ञाननिमित्तत्वेनासत्यत्वात् अज्ञानस्य च ज्ञाननिवर्त्यत्वात् तन्निवृत्तौ च तन्निमित्तकबन्धनिवृत्तिसम्भवात् बन्धनिवृत्तिरूपप्रयोजनस्य जीवब्रह्मणोरैक्यरूपविषयस्य फलसत्वे च फलेच्छावतः अधिकारिणश्च सम्भवात् धर्ममीमांसायां धर्मप्रतिपादकवेदविचारस्यैव कृतत्वेन गतार्थत्वाभावाच्चारम्भणीयमिति।

तत्रातमात्मनोरत्यन्तविरुद्धस्वभावयोः तद्धर्माणां च इतरेत-राध्यासस्य असम्भवात् प्रामाणिकस्य मातृत्वादिबन्धस्य असम्भवात् प्रामाणिकस्य मातृत्वादिबन्धस्य सत्यत्वात् उक्तरीत्या शास्त्रं नारम्भणीयमिति प्राप्ते, ब्रूमः। अहमिदं ममेदमित्याद्यत्यन्तानुपपन्नव्यव-हारस्य मिथ्याज्ञाननिमित्ताध्यासत्वादुक्तरीत्या आरम्भणीयं शास्त्रमिति।

नच ब्रह्मणः सिद्ध्यसिद्धिभ्यां विषयाद्यसम्भवः ब्रह्मशब्दवाच्यत्वेन च ब्रह्मेति किञ्चित् वस्त्वस्तीत्येतावत् सिद्धम्। तत्त्वं चासिद्धमिति न विषयाद्यसम्भव इति।

अत्रेदमवधेयम्-प्रपञ्चसत्यत्वे कथञ्चिदपि नोपपद्यत इति मिथ्यात्वमेव। ननु मिथ्यात्वेऽपि प्रत्यक्षविरोधादनुपपत्तिः तुल्येति चेत् अनुपपत्तिरेव मिथ्यात्वे उपपन्नेति गृहाण। तस्माज्जगन्मिथ्येत्येतदेव सत्यमिति। तस्मिंस्तद्बुद्धिरध्यासः। स च द्विविधःअर्थाध्यासो ज्ञानाध्यासश्चेति। असदवभसमान-मर्थाध्यासः असतोऽवभासो ज्ञानाध्यास इति । तयोश्च परमार्थवस्तुतत्वाविद्यानिमित्तं पूर्वानुभवसंस्कारदोषादिकं च सहकारिकारणम् । पुनश्च द्विविधः निरुपाधिकः सोपा-धिकश्चेति। तत्र चिदात्मनि अनुपहिते अहङ्काराध्यासः शुक्तिरजतवत्

निरुपाधिकः। जीवब्रह्मणोर्जीवानां मिथो भेदाध्यासोऽन्तःकरणोपहितत्वात् विम्बप्रतिबिम्बादिवत् सोपाधिकः। कर्तृत्वाद्यहङ्क.ारधर्माध्यासस्तु स्फटिके लौहित्याध्यासवत् सोपाधिकः। अत एव न ब्रह्मणः संसारसम्बन्ध इति।।

(टि) ।।श्रीः।।

।। अथ त्रयोदशस्य प्रथमः पादः।।

।। ब्रह्ममीमांसा ।।

एवं द्वादशभिरध्यायैर्धर्मो विचारितः। अथ चतुर्भिरध्यायैर्ब्रह्म विचार्यते । नहि धर्ममीमांसामकृत्वैहिकामुष्मिकफलानि तत्सा-धनभूताग्निहोत्रादिविश्वसृजामयनान्तकर्मरूपा धर्मास्तेषां नित्यनैमित्तिककाम्यत्वानि च तत्त्वतो ज्ञातुं शक्यन्ते। नापि तान्यज्ञात्वा तेषां फलानामनित्यत्वेन दुःखसंमिश्रत्वेन सातिशयत्वेन चासारत्वं सुज्ञेयम्। तदज्ञात्वा च नैहिकामुष्मिकफलविरागः सम्भवति। वैराग्यं च ब्रह्मविचारहेतुरिति धर्ममीमांसानन्तरं ब्रह्ममीमांसारम्भः । किञ्च "तस्माद् ब्राह्मणेन निष्कारणः षडङ्ग.ो वेदोऽध्येयो ज्ञेय" इत श्रुतावध्येयइत्यनेन शब्दज्ञानस्य ज्ञेय इत्यनेनार्थज्ञानस्य निष्कारण इत्यनेन च तयोर्नित्यत्वस्य च विवक्षितत्वात् साङ्गवेदाध्यनार्थज्ञानयोर्नित्यत्वं सिद्धम् । ततश्चार्थनिश्चयोपाययभूतन्यायशास्त्रस्य मीमांसाद्वयस्याप्यध्ययनं नित्यमिति सिद्धम्। ततश्चार्थनिश्चयोपायभूतन्यायशास्त्रस्य) तत्रा-ध्ययनानन्तरं धर्ममीमांसा कर्तव्यत्वेनापतितेति तदानीं न ब्रह्ममीमांसावसरः। गते तु धर्मविचारे प्राप्तावसरेत्यतोऽपि धर्ममीमांसानन्तरं ब्रह्ममीमांसारम्भः। अवश्यारम्भणीयं चेदं शास्त्रं नित्यत्वेनारम्भे प्रत्यवायापत्तेः।

न चैवं भ्रमितव्यं साधनचतुष्टयसम्पन्नो हि ब्रह्मविचाराधिकारी अतस्तदसम्पन्नो यदीदं शास्त्रमारभेत तदानधिकरात् शूद्रवत् प्रत्यवेयात्। अतो यदि धर्मविचारानन्तरं साधनचतुष्टयं न सम्पद्यते तदा ब्रह्मविचारमकृत्वा दारसङ्ग्रह: कर्तव्यो न ब्रह्मविचार इतिं अपि च ब्रह्मचारिण औपनिषदं व्रतं विहितमिति निर्विवादम्। तच्चोपनिषदध्ययनार्थम्। अध्ययनं चार्थज्ञानपर्यवसायमेव। अर्थनिश्चयश्चोपनिषदामुत्तरमीमांसामनधीत्य न सम्भवती त्यप्यविवादम्। तस्मात् साधनचतुष्टयसम्पन्नोऽपि प्रत्यवायपरिहाराय ब्रह्मविचार: कर्तव्य एव । नन्वेवं शङ्क.रभगवत्पादाचार्यैर्यदुक्तं "अथातो ब्रह्म जिज्ञासे"त्यत्राथशब्देन धर्मजिज्ञासानन्तर्यं न विवक्षितं किन्तु साधनचतुष्टयसम्पत्त्यनन्तरमि" ति तद्विरुध्येतेति चेन्न। तस्य काम्याधिकाराभिप्रायत्वात्। अन्यथा साधनचतुष्टयसम्पन्नस्येवाधिकारित्वात् साधनाध्यायो व्यर्थ:स्यात्।तस्मात् ब्रह्मविचारस्य नित्यत्वं काम्यत्वं चास्ति। तेन मुमुक्षुत्वाभावेऽपि प्रत्यवायपरिहाराय धर्मविचारानन्तरं ब्रह्मविचार: कर्तव्य एव।

एतावान् विशेष:- मुमुक्षुत्वाभावे फलपर्यन्तानुष्ठानं न सम्भवति पशुकामनाभावे चित्राननुष्ठानवदिति। न ह्येतावता विचार एव न कर्तव्य इति साम्प्रतम्। तस्मात् कर्तव्य एव ब्रह्मविचार: प्रत्यवायपरिहारायेति।

तदयं चतुर्दशविद्यास्थानग्रहणादिक्रमो जैमिनिबादरायणादिभिर्विवक्षित:। अष्टवर्षो ब्राह्मणो गुरुमुपेत्य साङ्गं. सेतिहासपुराणस्मरणं वेदमधीत्य स्वाध्यायाध्ययनविधेरर्थज्ञानार्थत्वेन नित्यत्वेन च तदध्यापितस्य वेदस्य यो धर्मप्रतिपादनपरो भाग: कर्मकाण्डाख्यस्तस्यार्थनिश्चयोपायन्यायशास्त्रं धर्ममीमांसाख्यमधीत्य स्वाध्यायाध्ययनविध्यध्यापितस्यैव वेदस्य यो ब्रह्मप्रतिपादनपरो

भागो वेदान्ताख्यस्तस्यार्थनिश्चयोपायन्यायशास्त्रं ब्रह्ममीमांसाख्यं चाध्येतव्यम्। ततो यदि विरक्तोऽभुक्तोऽभूत्तदा" ब्रह्मचर्यादेव प्रव्रजेदि"ति वचनात् पारिव्राज्यं च तुर्याश्रमं गच्छेत् ।नो चेत् "तमेनं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशाकेने"ति वचनादाश्रमादाश्रमं गच्छेदि" त्यादिस्मरणानुमितवेदाच्च दारान् सङ्गृह्य गृहस्थो भूत्वा धर्ममनुतिष्ठेत्। ततो यदि विरक्तोऽभूत्तदा प्रव्रजेत्। नो चेद्वनस्थो भूत्वा ततस्सन्यस्येत् । ततस्सन्न्यस्य चतुर्थं पुरुषार्थं ब्रह्मैक्यापत्त्यात्मकं मोक्षं प्राप्तुं श्रवणमनननिदिध्यासनानि कुर्यादिति। तत्र विद्यास्थानस्वरूपोपयोगादयः सूत्रार्थ सङ्ग्रहकारैर्दर्शिताः। तथाहि- "इह खलु सकललोकाभीष्टपुरुषर्थचतुष्टयावाप्तिहेतुभूतानि वेदतदङ्ग.ेपाङ्ग.ो ·पवेदारुयाविशिष्टानि अष्टादशविद्यास्यानानि मन्वादिभिरुपदिष्टानि। यथाहुः-

"अङ्ग.ानि वेदाश्चत्वारो मीमांसान्यायविस्तरः।
पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश।।
आयुर्वेदो धनुर्वेदो गान्धर्वो वेद एव च ।
अर्थवेदश्च सम्भूय विद्या ह्यष्टादश स्मृताः।।"

इति। तत्राद्यानि चतुर्दशविद्यास्थानानि स्वत एवाभ्यर्हिततरप्रथम-पुरुषार्थद्वयप्रतिपत्त्युपायत्वेन पुरुषं प्रत्यन्तरङ्ग.त्वात् प्रधानभूतानि। इतराणि तु इतरपुरुषार्थद्वयावग्रहहेतुत्वेन बहिरङ्गत्वादंप्रधानभूतानि। तदपेक्षया च श्लोकद्वये पृथङ्निर्देशः कृतः। तथान्यत्राप्येतदभिप्रायेणैव-

पुराणन्यायमीमांसाधर्मशास्त्राङ्ग.मिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश।।

इति चतुर्दशानामेव विद्यास्थानत्वं धर्मस्थानत्वं चाभ्यधायि।

धर्मग्रहणमुपलक्षणम् । ब्राह्मणोऽपि तस्माद् द्वयोरप्यनयोश्चतुर्दश-चतुष्कयोर्विद्यास्थानवर्गयो: प्रतिपाद्योत्कर्षानुत्कर्षाभ्यामुत्कर्षानुत्कर्षौ भवतः। तत्रापि पुन: प्रातिस्विकेन वाक्यार्थगततत्तदान-संशयविपर्ययव्युदासेन पारमार्थिकतत्त्वस्वरूपनिर्णयार्थं समस्तैरप्यन्यैर्विद्यास्थानैरभ्यर्थ्यमानत्वात्तेभ्योऽपि मीमांसाख्यं विद्यास्थानं गरीयस्तरम्। तथा ह्याहु:-

"चतुर्दशसु विद्यासु मीमांसैव गरीयसी"

(इति चतुर्दशानामेव विद्यास्थानत्वं धर्मस्थानत्वं चाभ्यधायि। धर्मग्रहणमुपलक्षणम्) इत्यादि। अत एव च धर्मब्रह्मप्रमितौ करणभूतस्य वेदस्यानुग्राहकत्वेनेतिकर्तव्यतात्वमनुभवन्ती मीमांसा प्रत्यासन्नत्वेन वेदैकदेशभूतत्वात् सप्तममङ्गमित्यपि न गण्यते। यथोक्तम्-

धर्मे प्रमीयमाणे हि वेदेन करणात्मना ।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति।।

इति। अत्रापि धर्मग्रहणमुपलक्षणार्थं ब्रह्मणोऽपि। सा चेयमेवंरूपा मीमांसा पूर्वोत्तररूपत्वेन द्वैविध्यं भजते। तत्र पूर्वपुरुषार्थप्रतिपत्त्युपायभूता पूर्वमीमांसा उत्तरपुरुषार्थप्रतिपत्त्यर्था तूत्तरमीमांसा। अत एव पूर्वस्य इयं गरीयसी। एवमुभवविधापि मीमांसा वेदवदेव शिष्योपाध्यायक्रमेण सर्वपुरुषाणामुपदेशपरम्परयैव प्राचीने काले प्रावर्तिष्ट। एतावांस्तु विशेष:- यदुत वेदेऽर्थशरीरवद् ग्रन्थसन्दर्भोऽपि नित्य एव मीमांसायास्त्वर्थशरीरमेव शाश्वतिकमिति। एवं ह्युक्तम् -

उच्यते नैन शून्योऽस्ति कालो मीमांसया क्वचित्।
नित्यैव खलु मीमांसा न्यायपिण्डात्मिकेष्यते ।।

इति। एवमितरेषां विद्यास्थानानामपि द्रष्टव्यम्। तस्मात् पूर्वमीमांसा-ध्ययनानन्तरमुत्तरमीमांसाध्येतव्यैव। नापीतरेतरगतार्थता।

यत्तु धर्ममीमांसया गतार्था ब्रह्ममीमांसा क्रत्वर्थकर्तृप्रतिपादनेन विध्येकवाक्यत्वादुपनिषदामपि तत्रैव विचारितत्वादिति। तन्न। सूत्रभाष्यवार्तिककाराणामसंमतत्वात्। तथाहि-सूत्रकारस्य तावत् "धर्मजिज्ञासे"ति सूत्रयत उपनिषद्विचारो नाभिप्रेत इति स्पष्टमेव। अन्यथा "वेदार्थजिज्ञासे"त्येव स्पष्टार्थमसूत्रयिष्यत्। अत एव द्वादशास्वपि लक्षणेषु किमपि सूत्रं उपनिषत्परं न सूत्रितम्। भाष्यकारेणापि न क्वचिदपि वेदान्तवाक्यमुदाहृत्य चिन्तितम्। नन्वात्मवाद उदाहृत एवा "विनाशी वा" इत्यादिकमिति चेत् सत्यमुदाहृतं, तत्त्वन्यार्थं शरीरादिव्यतिरिक्तो नित्य आत्मा वेदान्तप्रसिद्ध इत्येतावन्मात्रं तत्र विवक्षितम्। तथा च वार्तिकं "इत्याहास्तिक्यनिराकरिष्णुरात्मास्ति तां भाष्यकृदत्र युक्त्या दृढत्वमेतद्विषयश्च बोधः प्रयाति वेदान्तनिषेवणेने"ति। किञ्च मीमांसावतारप्रकारपर्यालोचनयापीतरेतरागतार्थता ज्ञातुं शक्यते। तथाहि-द्वेधा तावदाकरेषु मीमांसावतार उक्तः। तत्र परमकारुणिको भगवान् बादरायणो भविष्यत्पुरुषायुश्शेमुषीश्रद्धोत्साहादिह्रासहेतुकां समस्तविद्याग्रहणाशक्तिमवलोक्य व्यस्ता अप्यनेकपुरुषाश्रिताः काममप्रलीनाः प्रवर्तन्तामिति सङ्क.ल्प्य लोकानुग्रहार्थमेकमपि भागं चतुर्धाख्यस्य वेदार्थसङ्ग्रहरूपेणाष्टादश पुराणानि महाभारताख्यं चेतिहासमेकत्रैवाशेषपुरुषार्थप्रत्यक्षीकरणार्थतया वेदार्थोपबृंहणार्थं प्रमाणभूतं यदा प्राणैषीत्तदा मीमांसामप्यर्थमात्रेण विना शब्दं प्रवर्तमानं दृष्ट्वोपरिष्टात्कालीनानां पुरुषाणामल्पबुद्धित्वेनैवमेवमुपदेष्टु-मवधारयितुमसति शब्दावष्टम्भे न कस्यचित् सामर्थ्यमस्तीति मत्वा समस्तेषु स्वशिष्येषु विश्वासबहुमानाश्रयभूतमृषिवर्यं जैमिनिमाहूय

"वत्स जैमिने त्वमिमां पूर्वमीमांसामन्तरेण शब्दं प्रवर्तमानां लोकानुग्रहार्थं सूत्ररूपेण शब्दैस्सन्दभ अहं तूत्तरमीमांसायामेवमेव सूत्राणि प्रणेष्यामीत्येवमनुशिष्टो भगवान् जैमिनिराचान्तोदकः शुचौ देशे दर्भपवित्रपाणिः कुशासने सुखासीनो तस्यां मीमांसायां द्वादशाभिरध्यायैः षष्ट्या पादैः सहस्रेण चाधिकरणैः संयुक्तं सूत्रपारायणं प्रणिनाय। एवमेव भगवान् बादरायणोऽप्युत्तरमीमांसायां चतुर्भिरध्यायैः षोडशभिः पादैर्द्विशताधिकरणैः संयुक्तं सूत्रपारायणं प्रणिनायेत्येवमेकः शास्त्रावतारप्रकारः।

अपरस्तु गुरुपर्वक्रमात्मकः। स चैवं श्रूयते- "ब्रह्मा महेश्वरो वा मीमांसां प्रजापतये प्रोवाच प्रजापतिरिन्द्रायादित्याय बृहस्पतये मनवे च मनुर्वसिष्ठाय वसिष्ठः पराशराय पराशरः कृष्णद्वैपायनाय कृष्णद्वैपायनो जैमिनये जैमिनिः कलियुगादाव-श्रद्धानप्रयुक्तहेत्वाभासाकुलीकृतं त्रयीमार्गं विमलीकर्तुमिमं न्यायकलापं ग्रन्थे निजुगुम्भे। एवं कृष्णद्वैपायनः स्वयमेव वेदान्तमार्गं विमलीकर्तुं तन्न्यायकलापमपि ग्रन्थे निजुगुम्भ इति। नन्वेवमप्यर्थवादाधिकरणे सूत्रकारेणैव "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानामि"ति विधिवाक्यव्यतिरिक्तानामानर्थक्यं पूर्वपक्षयित्वा "विधिना त्वेकवाक्यत्वादि"ति विधिवाक्यव्यति-रिक्तकृत्सनवेदभागस्य विध्येकवाक्यत्वात् सार्थक्यं सिद्धान्तितम्। तेन वेदान्तानामपि कर्तृप्रतिपादकत्वेन सार्थक्यस्याभिप्रेतत्वाद्विचारितान्येव वेदान्तवाक्यानि। तथा च वार्तिकम्- "एतेन क्रत्वर्थकर्तृप्रतिपादनद्वारेणैवोपनिषदां नैराकाङ्क्ष्यंव्याख्यातमिति। अतो गतार्थैवोत्तरमीमांसेति हि तवाकूतम्। तदपि न घटते। कर्तृभोक्तृरूपात्मप्रतिपादकानामेव तथात्वात् अन्यथा विरोधापत्तेरिति। तथा च परितोषमिश्रैरजितायामेतेन

क्रत्वर्थकर्तृप्रतिपादनेति प्रतीकमुपादायोक्तंकर्तुः फलं भवतीति कर्तृत्वं प्रतिपाद्यते। तत्र देहात्मानं मन्यमानो देहविनाशात् फलोपभोगमपश्यन् अकर्तृत्वं प्रतिपद्यते। देहव्यतिरिक्तमात्मानमुपनिषदुपदर्शितं नित्यं फलोपभोगसमर्थं ज्ञात्वा कर्ता स्यादिति कर्तृसंस्कारो ज्ञानमात्मा ज्ञातव्य इति विधीयते। केन पुनरस्य क्रतुसम्बन्धः। न प्रकरणेन तदभावात्। न पर्णतादिवद्वाक्येनात्मनो जुहूवत् क्रत्वव्यभिचाराभावात् लिङ्गे.नेति ब्रूमः ननु सामान्यसम्बन्धमन्तरेण लिङ्गमविनियोजकं, सत्यं, तत्रैवैतत् सव्यभिचारनियमादृष्टाय नियन्तव्यम्। आत्मज्ञानस्य तु दृष्टमेवानन्यसाध्यं क्रतावेवोपकारकत्वम्। तच्च क्रतुज्ञान-विधिभ्यामेव सिध्यतीति। तदेतच्छरीरव्यतिरिक्तकर्तृभोक्तृरूपात्मप्रतीतिं प्रत्युच्यते। सत्यकामः सत्यसङ्क.ल्प इत्यादिवाक्यबोधितैश्वर्यगुणस्य त्वात्मनो ज्ञानं स्वयमेवेष्टगृणैश्वर्यफलत्वात् पुरुषार्थत्वम्। तथा अकर्तुरभोक्तुश्चात्मनो ज्ञानं मोक्षफलत्वादिति साधुशब्दाधिकरणे वक्ष्यत इति। तथा च तत्र वार्तिकम्–

सर्वत्रैव हि विज्ञानं संस्कारत्वेन गम्यते ।
पराङ्गं. चात्मविज्ञानादन्यत्रेत्यवधारणा।।

इत्यादि। तस्मात् सूत्रभाष्यवार्तिककाराणां गतार्थत्वमस्या नसम्मतमिति स्थितम्। तस्मादगतार्थत्वान्नित्यत्वाच्च प्रत्यवायपरिहाराय धर्मविचारानन्तरं कर्तव्य एव ब्रह्मविचारः।

यस्तु उपनीतो ब्रह्ममीमांसाशास्त्रपर्यन्तमधीत्यान्यत्र श्रमं कुरुते स शूद्रवद् बहिष्कार्यः। तथा च मनुः–

यो ऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः।।

इति । अत्र वेदशब्दो विद्यास्थानोपलक्षणार्थ इति स्पष्टमेव ।

तत्परिशीलनवतामिति। तत्रापि वेदेषु कल्पेषु च स्वशाखा शीक्षा च स्वशाखानुकूला मानवपराशरयाज्ञवल्क्यास्स्मृतयः ज्योतिष्टुम्मुहूर्तपर्यन्तम्। इतराणि भाष्यान्तानि। इतिहासपुराणानि तु यथाशक्ति। तत्रापि भारतम्। एतानि अवश्या-ध्येयानि प्रत्यवायपरिहारायेति। तदेतत् सकलमभिप्रेत्य धर्मविचारानन्तरं ब्रह्मविचार आरभ्यते। बृहदारण्यक इत्यारभ्य न पुनरावृत्तिरिति च बोध्यमित्यन्तेन ग्रन्थेन । तत्र श्रुतिं विवृणोति- अत्रेत्यादिना । एतावदिति। केवलमात्मप्रतिभासमात्रमित्यर्थः। तस्य चात्मदर्शनं साधनमिति तत्प्राप्तिस्तत्साधनत्वेनेति। अमृतत्व-साधनस्यात्मदर्शनस्य साधनत्वेनेत्यर्थः। फलोपकार्यङ्ग.ाभ्यमिति। श्रवणस्य ह्यात्मदर्शनमात्मापरोक्षज्ञानं फलम्। तत्रैव च मननि-दिध्यासनयोरुपकारकत्वं न तु श्रवणस्वरूपे। श्रवणं नाम विचारो वा ब्रह्मविषयकशाब्दज्ञानं वा? उभयथापि मनननिदिध्यासनाभ्यां विना सिध्यतीति न स्वरूपोपकार्यङ्गत्वं तयोरित्यभिप्रायः। अधि विधीयत इत्यन्वयः। कस्य विधीयत इत्याह मुमुक्षोरिति। सर्वतो विरक्तस्येति मुमुक्षोर्विशेषणम्। कुतः सर्वतो विरक्ति सम्भवतीत्यत्राह नव इत्यादिना। पत्युरित्यादि कर्मणिषष्ठी। काम इच्छा। तादर्थ्ये चतुर्थी।। ततश्च न पतिरिष्ट इत्यतः पतिः प्रियो भवति किन्तु आत्मेष्ट इत्यत इत्यर्थः। तत्रात्मनः कामायेति तादर्थ्यचतुर्थात्मकामनायाः प्राधान्यम्। पत्युः प्रियत्वस्य च तादर्त्यावगमादङ्गत्वं (विधीयते) विज्ञायते। ततः पत्यपेक्षयेष्टतर आत्मेति गम्यते। इष्टतरे च वस्तुनि ज्ञाते सति तत्र रागातिशयादिष्टेऽपि वस्तुनि विरागो जायत इति तावदनुभवसिद्धम्। तथा च पत्यपेक्षतयात्मेष्टतर इति ज्ञाते सत्यात्मनि रागातिशयात् पत्यौ विरागो जायते। एव"मात्मनः कामाय सर्वं प्रियं भवती"त्यनेन

पतिपुत्रादिभ्य: सर्वेभ्य आत्मेष्टत इत्यवगमादात्मव्यतिरिक्तात् सर्वतो विरक्तिर्जायत एवेत्यर्थ:।

अमृतत्वसाधनमात्मदर्शनमित्युक्तम्। तत्र किं तदमृतत्वमित्यत्राह-अमृतत्वं नामेति। बन्धस्य निवृत्तिरमृतत्वमिति सम्बन्ध:। कयोर्बन्ध इत्यत्राह-आत्मानात्मनोरिति। आत्मा ज्ञानस्वरूपश्चेतन: अनात्मा जडस्वरूपोऽचेतन: तयोरित्यर्थ:। किमस्ति बन्धस्य सत्यत्वमिति नेत्याह-अध्यासात्मकस्येति। एतच्च बन्धविशेषणम्। कस्य कस्मिन्नध्यास इत्यत्राह-अन्योन्येति। आत्मन्यन्त:करणदेहादेरध्यास: अन्त:करणदेहादौ चात्मनोऽध्यास इत्यर्थ:। स एव धर्माध्यास:। ननु कथमन्योन्याध्यासोऽपि सम्भवति। सत्यं सम्भवति। तत् कथमिति चेच्छृणु। अध्यासे हि विशेषावभासस्याध्यस्यमानताप्रयुक्तत्वादधिष्ठानगतविशेषो नावभासत इति तावन्निर्विवादम्। यथा शुक्तिकारजताध्यासे शुक्तिगतविशेषा:। तथा च यद्यात्मनोऽधिष्ठानत्वमेव तदा चैतन्यविशेषस्यानवभास: स्यात्। अथाहङ्कारदेरधिष्ठानत्वमेव तदा तदाहङ्कारगतानां कर्तृत्वभोक्तृत्वाकामसङ्कल्पविचिकित्साध्यवसायादीनां देहगतानां कृशत्वकृष्णत्वस्थितिगमनादीनां चानवभास: स्यात्। इह चोभयेषामवभासात्परस्पराध्यासोऽवधार्यत इति स्वगततया विशेषनवभासाच्च नाधिष्ठानत्वहानि: परगतया विशेषप्रतीतेश्च नाध्यास्यस्यमानताहानिरिति विनापिधर्म्यध्यासं केवलधर्माध्यासोऽप्यस्तीत्याशयेनाह अन्योन्यधर्माणामिति। यथा काणोऽहं बधिरोऽहमित्यादि:। अत्र हि धर्मीणीन्द्रियाणि नाध्यस्यन्ते तेषामप्रत्यक्षत्वादिति भाव:।

आत्मदर्शनं निर्वक्ति-आत्मदर्शनं चेति। बुद्धेति। बोधरूपेत्यर्थः। मुक्तेति। मातृत्वादिबन्धरहितेत्यर्थः। नित्यबुद्धमुक्तस्वभावस्य ब्रह्मणो यदेकत्वं तस्यापरोक्षज्ञानं प्रत्यक्षमित्यर्थः। अनन्येति। अनन्यविषयाणां निरन्तराणां ज्ञानानां सन्तान इत्यर्थः। श्रुतिस्वारस्यायाहाथवेति। अत्र पक्षे कथं विचारस्य वैधत्वमित्यत्राह-तद्विधानाच्चेति।

ननु विधानादेवारम्भे सिद्धेऽधिकरणमिदं व्यर्थमित्यत्राह-विधानादेवेति। अस्याधिकार्यादिविचारत्वात् सकलोपोद्धातत्वेना-दावारम्भः तत्रेति। अत्र शास्त्रं नारम्भणीयमित्येतदधिकरणशरीरम्। अन्ये तदर्थविचाराः। तदर्थं च प्रयाजनविषयाधिकारिणो न सन्त्युत सन्तीति विचारयितव्यम्। तदर्थमपीदं चिन्त्यं किं बन्धस्य सत्यत्वमुतासत्यत्वमिति। तदेतदप्यपरं चिन्तयितवयम् किं धर्ममीमांसायां मृत्स्नो वेदो विचारित उत धर्मप्रतिपादक एवेतीति। अत्यन्तविरुद्धस्वभावयोरिति। अत्र प्रतीतितः स्वरूपतश्च विरोधं दर्शयितुमत्यन्तेत्युक्तम्। तथाहि-अहमित्यात्मावभासते। त्वमिति बुद्धीन्द्रियदेहा अनात्मानः प्रतीयन्ते। चित्स्वरूपो बुद्ध्यादिसाक्षी विषयी चात्मा जडस्वभावा विषयाश्च बुद्ध्यादय इति। सादृश्यादि ह्यध्यासे हेतुः। स च नात्यन्तविरुद्धयोः सम्भवतीति भावः। किञ्च पुरोऽवस्थिते विषये हि विषयान्तरमध्यस्यति। न ह्यात्मनो विषयत्वम्। तत् कथमात्मानि वात्मनो वाध्यासः सम्भवति तस्मान्नाध्यास इति। अहमिदमिति। अयमभिप्रायःलक्षणसम्भव-नासद्भावप्रमाणैर्हि सर्वं वस्तु सिध्यति। तत्र लक्षणेन स्वरूपावगतिः। सम्भावनया च सम्भवनिरासः। सद्भावेन सत्वावगतिः। प्रमाणेन च निश्चय इति। तानि चात्र सन्ति। तथाहि-लक्षणं चातस्मिंस्तद्बुद्धिरिति वक्ष्यति। यत्तु सादृश्यादिहेत्वभावात् प्रत्यक्षविषयत्वाच्च नाध्यासः सम्भवतीति तदनुपपन्नम्।

तलमलिनसादृश्याभावप्रत्यक्षेऽप्याकाशे तलमलिनाद्यध्यस्य ते तस्मान्न सादृश्यादिः प्रत्यक्षविषयत्वं नाध्यासे हेतुः। किं त्वधिष्ठान-तत्वज्ञानादिदोषः। स चेहानाद्यविद्यादिरूपोऽस्तीत्यात्मन्यध्यासस्य सम्भावनास्ति। किञ्चाधिष्ठानाध्यस्यमानयोरेकस्मिन् ज्ञाने अवभास एवाध्यासेऽपि वक्ष्यते न त्विदन्तया विषयतया वावभासः। सचेह ज्ञानरूपस्यात्मनः स्वप्रकाशत्वादस्त्येव। नच ज्ञानान्तराधीनं ज्ञानस्फुरणम्। त्वन्मते युगपत् ज्ञानद्वयासम्भवात्। तस्मात् सम्भवत्येवात्मन्यनात्माध्यास इति।

प्रमाणं चाध्यासे प्रत्यक्षमेव तावदस्ति। तथा हि इदन्तया भासमानं देहादिकमहमिति प्रतीयते। तच्च प्रत्यक्षमध्यासे प्रमाणम्। नहि प्रत्यक्पराचोरभेदः सम्भवतीति। एवमनुमानमपि प्रमाणम्। जाग्रत्स्वप्नमालौ अध्यासकृतप्रमातृत्वादिव्यवहारवन्तौ सुषुप्त्यन्यकालत्वात् यन्नैवं तन्नैवं यथा सुषुप्तिकालः न चेमौ तथा तस्मान्न तथेति। अपि च "ब्राह्मणो यजेते"त्यादिश्रुतिरपि चेतनाचेतनयोरैक्यावभासरूपाध्यासे प्रमाणम्। नहि केवलचैतन्यं, नापि केवलं देहादिकं ब्राह्मण इति। तत्र प्रमाणमेव तावद्वस्तुसिद्धौ प्रधानं तन्त्रम्। तत्रापि प्रत्यक्षमित्यहमिदमित्युक्तमिति ममेदमिति ह्यात्मना देहादिना सम्बन्धोऽस्तीत्याभिप्रायः। किञ्चात्मानात्मनोरितरेत-राध्यासस्यानुपपन्नत्वेऽपि प्रतिभासमानत्वादपलपितुं न शक्यत इत्याशयेनाह-अत्येन्तेति। व्यवहारशब्देन ज्ञानं कायिकव्यापारो वाग्वृत्तिश्चोच्यते। कारणमाह मिथ्येति। तत्र मिथ्याज्ञानेति कर्मधारयः। तत्र भ्रान्तिज्ञाननिवारणायाज्ञानमिति। ज्ञानाभावनिवारणाय मिथ्येति। अनिर्वचनीयतयाभावविलक्षणमनादिसिद्धं ज्ञाननिवर्त्यमज्ञानमित्यर्थः। उक्तरीत्येति। तत्रागतार्थत्वं चोक्तमेवेति नात्रोच्यते। इदानीं प्रकारान्तरेण शास्त्रारम्भमाक्षिपति ब्रह्मण इति।

इदं वर्णकान्तरमिति पक्षान्तरं क्वचिदाकरे स्थितम्। बृहि वृद्धाविति धातोर्मनिन्प्रत्यये ब्रह्मशब्दो व्युत्पन्नः प्रकरणोपपदयोः सङ्कोचकयोरभावान्निरङ्कु.शमहत्त्वबोधने समर्थः। ततश्च कालतो देशतो वस्तुतश्च अनवच्छेदसिद्धेर्नित्यत्वम्। अत एव शुद्धबुद्धमुक्तत्वादयश्च तेन प्रतीयन्त इत्याशयेनाह- ब्रह्मशब्दवाच्यत्वेनेति। सर्वो ह्यहमस्मीत्यात्मास्तित्वं प्रत्येति न तु कश्चिदपि नाहमस्मीति। अत आत्मास्तित्वं प्रत्यक्षसिद्धमेव। आत्मा च ब्रह्म अयमात्मा ब्रह्मे ति सामानाधिकरण्यश्रवणादित्याह- आत्मत्वेन चेति। यदि सिद्धं ब्रह्म तर्हि विचारविषयत्वं ब्रह्मणो न स्यादित्यत्राह-तत्तत्वमिति। सामान्येन सिद्धं विशेषतश्चासिद्धं वस्त्वेव विचारविषययोग्यमिति भावः। ननु कथं तत्त्वसिद्धिरिति चेत् विप्रतिपत्तेरिति गृहाण। तथाहि चैतन्यविशिष्टो देह आत्मेति प्राकृता लोकायतिकाश्च मन्यन्ते। इन्द्रियाण्येव चेतनान्यात्मेति मन आत्मेति च तेषामेव पक्षान्तरम्। क्षणिकमालयविज्ञानमात्मेति योगाचारा मन्यन्ते। शून्यमात्मेति माध्यमिकाः। नैयायिकादयस्तु देहादिव्यतिरिक्तः संसारी कर्ता भोक्ता चात्मेत्याहुः। भोक्तैव केवलं न कर्तेति साङ्ख्याः। जीवव्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिरिति च नैयायिकादयो मन्यन्ते। नित्यं ज्ञानमात्मेति वेदान्तिन इति। प्रपञ्चस्य मिथ्यात्वमेवाह-अत्रेदमित्यादिना। कथञ्चिदिति। नित्यत्वे चानित्यत्वे च नोपपद्यत इत्यर्थः। तथाहि कृत्स्नस्य प्रपञ्चस्य नित्यत्वं तावत् प्रत्यक्षविरोधादेवानुपपन्नम्। एकदेशस्य वा कृत्स्नस्य वा नित्यत्वे विना कारणमुत्पत्त्यसम्भावात् कारणं वक्तव्यम्। तच्च ब्रह्मव्यतिरिक्तं न सम्भवतीत्युत्तराध्याये वक्ष्यतीति तत्रैव व्याख्यास्यामः। ब्रह्मणः कारणत्वमपि विवर्ता- धिष्ठानत्वमात्रेण नान्यथेत्यपि वक्ष्यतीति।

अत्र चोदयति-नन्विति। उत्तरमाह - अनुपपत्तिरिति। नहि वयं न स्तम्भादिः प्रतीयत इति ब्रूमः। किं तर्हि? प्रतीयते नोपपद्यते च। अतो मिथ्येति ब्रूमः। न चेत् प्रतीयतेऽथवोपद्यते तदा न मिथ्येति। अतस्त्वदभिमतानुपपत्तिर्ममोपपन्नैवेति भावः। उपसंहरति-तस्मादिति। अध्यासलक्षणमाह-अतस्मिन्निति। इदं चाचार्योक्तं लक्षणम्। द्विविध इति। अतस्मिन्नित्यधिकरणे सप्तमी। बुद्धिरिति कर्मणि क्तिन्। बाहुलकाज्ज्ञानपक्षे च विषयसप्तमी। भावे क्तिन्निति भावः। अत्र केचिद् भावाद्वैतवादिनः- तेषां जगतो भावो ब्रह्म चास्तीत्याभिप्रायः। केचित्तु शुद्धाद्वैतवादिनः तेषां तु ब्रह्मैवास्तजगदभावोऽपि नास्ति मिथ्यावस्त्वभाव-स्याधिष्ठानमात्रत्वादित्यभिप्रायः। अत्र पद्मपादाचार्यैः स्वप्नदृष्टान्तेन शुद्धाद्वैतवादो दृष्टिसृष्टिवाद एवजीववादश्च। तद्युक्ततरमित्युत्पश्यामः अतिरिक्तकल्पनावैयर्थ्यात्। एतन्मतसाधनान्यमतनिराकरणप्रकारस्तु विवरणतत्त्वदीपनविष्णुभट्टीयादिषु द्रष्टव्य इत्यलमिति।

।। ब्रह्मणो लक्षणाधिकरणम् ।।

सू. जन्माद्यस्य यतः।।

(मू) तैत्तिरीयके भृगुवल्ल्यां "अधीहि भगवो ब्रह्मो"त्युपक्रम्य श्रूयते - "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत् प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मेती"ति। तथा पूर्ववल्ल्यां "सत्यं ज्ञानमनन्तं ब्रह्मे"ति। प्रयन्ति म्रियमाणानीत्यर्थः। तत्र संशयः- किमत्र श्रूयमाणं जन्मादिकं ब्रह्मणः तटस्थलक्षणं सत्यत्वादिकं च स्वरूपलक्षणं न भवतीति नास्ति ब्रह्मलक्षणं उत जन्मादिकारणत्वं तटस्थलक्षणं सत्यत्वादिकं च स्वरूपलक्षणं भवतीत्यस्ति ब्रह्मलक्षणमिति।

तत्र जन्मादिकस्य जगन्निष्ठत्वेऽपि जगज्जन्मादिकारणत्वस्य सत्यत्वादिकस्य च जगति लोकासिद्धभिन्नार्थेषु च स्थितत्वात् ब्रह्मणो न जन्मादिकं तटस्थलक्षणं एकस्य ब्रह्मणो न सत्यत्वादिकं स्वरूपलक्षणं च भवतीति न ब्रह्मलक्षणमिति प्राप्ते,

ब्रूमः। जन्मादिकस्य जगन्निष्ठत्वेऽपि जगज्जन्मादिकारणत्वस्य सत्यत्वादिकस्य च लोकसिद्धभिन्नार्थनिष्ठत्वेऽपि ब्रह्मणि सम्भवात् जगज्जन्मादिकारणत्वं तटस्थलक्ष्णं सत्यत्वादिकं च स्वरूपलक्षणं भवतीति अस्ति ब्रह्मलक्षणमिति। इदं त्ववधेयम्लोकसिद्ध-भिन्नार्थनिष्ठमपि सत्यत्वादिकं एकस्मिन्नलौकिके वैदिकगम्ये ब्रह्मणि न सम्भवतीत्यत्र न प्रमाणमस्तीति। किञ्च प्रत्यक्षमपि ब्रह्मणि प्रमाणं सत्यत्वादिरूपत्व इति।।

(टि) एवं प्रमाणस्वरूपसाधनफलैः साभास्यैर्ब्रह्मविचारः प्रतिज्ञातः। तत्र स्वरूपस्य प्रधान्यादिदिानीं तज्ज्ञानार्थं लक्षणमुच्यते-यतो वा इति। अत्रानुमानेन वा श्रुत्यन्तरेण वा सिद्धं जगत्कारणं "यतो वा" इत्यादिनानूद्य तद् ब्रह्मेति विधीयते। विधेयगतत्वाच्च पश्वेकत्ववदेकत्वं विवक्षितम्। ततश्च जगत उपादानं निमित्तं च ब्रह्मैवेति विहितं भवतीति बोध्यम्। तटस्थलक्षणमिति। लक्ष्यानन्तर्गतं तटस्थलक्षणं यथा चन्द्रस्य शाखाग्रम् अग्नेर्वा धूमः। स्वरूपलक्षणमिति। लक्ष्यान्तर्गतं स्वरूपलक्षणं यथा चन्द्रस्य प्रकाशोत्कर्षोऽग्नेर्वा पैङ्ग.ल्यम्। जन्मादिकस्येति नहि जन्मादिकं स्वरूपलक्षणं किन्तु तटस्थलक्षणम्। तस्य च लक्ष्यसम्बन्धमात्रं विवक्षितम् न लक्षणाश्रिततत्वम्। स चेहास्ति कार्यकारणभावः वह्निधूमयोरित्यभिप्रेत्याह- जगज्जन्मादिकारणत्वस्येति। अस्य ब्रह्मणि सम्भवादित्यनेनान्वयः। स्वरूपलक्षणांशे पूर्वपक्षं निराकरोति

इदिमित्यादिना। किञ्च सत्यादिपदानामखण्डार्थकत्वेनापि एकब्रह्मपर्यवसायितया लक्षणत्वं सम्भवतीति बोध्यम्।।

।। ब्रह्मणो वेदकर्तृत्ववेदैकमेयताधिकरणम्।।

सू. शास्त्रयोनित्वात्।।

(मू) बृहदारण्यके चतुर्थाध्याये चतुर्थे मैत्रेयब्राह्मणे आत्मानमुपक्रम्य श्रूयते - "अस्य महतो भूतस्य निश्वसितमेतत् यदृग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गि.रस इतिहासं पुराणं विद्या उपनिषदःश्लोकाः सूत्राण्यन्वाख्यानानि व्याख्यानानीती"ति। यदृग्वेदादिकं तदेतत् अस्य आत्मनः महतो ब्रह्मणः भूतस्य नित्यसिद्धस्य निश्वसितं निश्वास इव अप्रयत्नसिद्धमित्यर्थः। तत्र संशयः - किमिदं वाक्यं ब्रह्मणो वेदकर्तृत्वेन सर्वज्ञत्वं न साधयति उत साधयतीति।

तत्र "वाचा विरूपनित्यये"ति मन्त्रेण वेदस्य नित्यत्वप्रतिपादनात् न ब्रह्मणो वेदकर्तृत्वेन नित्यत्वं साधयतीति प्राप्ते,

ब्रूमः। "अस्ये"त्याद्युदाहृतवाक्येन वेदस्योत्प्रत्यवगमादेतद्वाक्यं ब्रह्मणो वेदकर्तृत्वेन सर्वज्ञत्वं साधयतीति। मन्त्रगतनित्यशब्दस्तु मन्त्रगतत्वादेव स्तुतिपर इति। अर्थोपलब्धिपूर्वकरचनाभावात् न पौरुषेयप्रयुक्तसापेक्षत्वेनाप्रामाण्यं चेति बोध्यम्।

अथवा बृहदारण्यके पञ्चमाध्याये नवमे शाकल्यब्राह्मणे श्रूयते - "तं त्वौपनिषदं पृच्छामी"ति। तत्र संशयः - किमिदं वाक्यं ब्रह्मणः शास्त्रैकगम्यत्वं गमयति न वेति।

तत्र सिद्धवस्तुनो ब्रह्मणोऽनुमानादिगम्यत्वयोग्यत्वात् न

वेदैकगम्यत्वमिदं वाक्यं गमयतीति प्राप्ते, ब्रूमः। उपनिषत्स्वेव अधिगम्य औपनिषद इति व्युत्पत्तिबलादिदं वाक्यं वेदैकगम्यत्वं गमयतीति। तस्मात् चक्षुरादीन्द्रियैः अनुमानादिभिश्च न ब्रह्म गृहीतुं शक्यते किं तूपनिषदैवेति स्थितम्।

(टि) एवं जगत्कारणत्वं ब्रह्मण इति प्रदर्शनेन अर्थात् सर्वज्ञं ब्रह्मेति प्रदर्शितं भवति। तदेव दृढीकरणायेदमारभ्यते - वाचेति। नित्या च वाग् वेद एव। तथाहि

"अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा ।
आदौ वेदमयीर्दिव्या यतः सर्वाः प्रवृत्तयः ।।"

इति। स्तुतिपर इति। यत् पूर्वं वेदस्य नित्यत्वं स्थापितं तदनादित्वेनेति न विरोध इति बोध्यम्। पौरुषेयत्वेनाप्रामाण्यमाशङ्क्याह-अर्थोपलब्धीति। अर्थोपलब्धिपूर्वकशरीरिकृतत्वरूपं पौरुषेयत्वमेव पूर्वं निराकृतमिति न वेदापौरुषेयत्वसिद्धान्तविरोध इति भावः।

एवं ब्रह्मणः स्वरुपमुक्तम्। इदानीं वर्णकान्तरं प्रमाणप्रतिज्ञार्थमारभ्यते - चक्षुरादीति। रूपाद्यभावान्न चक्षुरादिगम्यत्वम्, लिङ्गसादृश्यादिराहित्यान्नान तु मानादिगम्यत्वमित्यभिप्रायः। श्रुत्यावगते पश्चादनुमानेन निदिध्यासनजन्यानुभवेन च ब्रह्म ज्ञातु शक्यते। अत एवेन्दियग्रहणं कृतं अन्यथा प्रत्यक्षेणेत्येवावक्ष्यदिति।

।। वेदान्तानां ब्रह्मैकपरत्वाधिकरणम्।।

सू. तत्तु समन्वयात्।।

(मू) अत्र सर्वे वेदान्ता उदाहरणम्। ते कर्माङ्गभूत

कर्तृदेवतादिस्वरूपत्वेन ब्रह्मप्रतिपादका उत बह्म प्रधानत्वेनैव ब्रह्मप्रतिपादका इति चिन्त्यते। तत्र तात्पर्याच्छान्दोग्ये षष्ठाध्याये द्वितीयखण्डे "सदेव सोम्येत्युपक्रम्य" स एषोऽणिमा ऐतदात्म्यमिदं सर्वं तत् सत्यं स आत्मा तत्त्वमसि श्वेतकेतो इति "तद्धास्य विजज्ञावि"ति। एवमादिषु संशयः किमेते कर्मशेषकर्त्रादिपरा उत ब्रह्मपरा इति। तत्र अहेयानुपादेशसिद्धब्रह्मपरत्वे निष्प्रयोजनत्वसापेक्षत्वयोः प्रसङ्ग.ात् कर्मशेषकर्त्रादिपरा इति प्राप्ते, ब्रूमः। उपक्रमोपसंहारादिभिर्लिङ्गैर्वेदान्तानां ब्रह्मणि समन्वयात् ब्रह्मपरा इति।

समन्वयो नाम सम्यक् तात्पर्यत्वेनान्वयः सम्बन्ध इति। लिङ्गषट्कं च पूर्वाचार्यैर्दर्शितम्।

> उपक्रमापसंहारावभ्यासो पूर्वताफलम्।
> अर्थवादोपपत्ती च लिङ्ग.तात्पर्यनिर्णये ।।

इति। व्याख्यातं च माधवाचार्यैः- "सदेवे"त्युपक्रमः "श्वेतकेतो" इत्युपसंहाराः। तयोर्ब्रह्मविषयत्वेनैकरूप्यं एक लिङ्गं., असकृ "त्त्त्वमसी" त्युक्तिरभ्यासः, एकविज्ञानेन तु सर्वविज्ञानं फलं, सृष्टिस्थितिलयप्रवेशनियमनानि पञ्चार्थवादाः, मृदादिदृष्टान्ता उपपत्तय इति। अहेयानुपादेयब्रह्मपरत्वेऽपि न निष्प्रयोजनत्वं, अनर्थनिवृत्तेः प्रयोजनत्वात्। नापि सिद्धब्रह्मपरत्वे सापेक्षत्वं ब्रह्मणः प्रमाणान्तरागम्यत्वादिनि।

अथवा "सदेवे"त्यादि वेदान्ताः किं प्रतिपत्तिविधिविषयतया ब्रह्म समर्पयन्ति उत साक्षादिति संशयः। तत्र अहेयानुपादेयसिद्धब्रह्मणः साक्षात् समाकत्वे प्रवृत्तिनिवृत्तिपरत्वप्रयुक्तशास्त्रत्व शक्तिग्रहयोरसम्भवात् प्रतिपत्तिविधिविषयतया समर्पयन्तीति प्राप्ते,

ब्रूमः। उपक्रमोपसंहारादिलिङ्गैर्ब्रह्मणि समन्वयाद्वेदान्ताः साक्षादेव ब्रह्म समर्पयन्तीति। न प्रवृत्तिनिवृत्तिपरत्वाभावे शास्त्रत्वाभावः हितोपदेशत्वेन शास्त्रत्वसम्भवात्। नापि कार्यपदसमभिव्याहाराभावेन शक्तिग्रहसम्भवः, "पुत्रस्ते जात" इत्यादिषु हर्षादिना शक्तिग्रहवत् शक्तिग्रहसम्भवात्। न च प्रतिपत्तिविधिः श्रोतव्य इत्यादिषु ज्ञानस्य वस्तुतन्त्रत्वात् पुरुषतन्त्रत्वाभावेन कर्तुमकर्तुमन्यथाकर्तुं च शक्यत्वादिति। तस्मात् प्रधान्येन साक्षात् ब्रह्मसमर्पकत्वेन वेदान्ता एव ब्रह्मणि प्रमाणमिति स्थितम्।

(टि) इदानीं प्रतिज्ञातं ब्रह्मणः शास्त्रप्रमाणकत्वं प्रतिपाद्यते। तत्र सामान्यविचारस्वरूपं दर्शयति-त इत्यादिना। इदानीमुदाहरणविषयकं संशयं दर्शयति एवमादिष्वित्यादिना। सिद्धवस्तुनः प्रत्यक्षादिविषयत्वात् सापेक्षत्वम्। कर्मशेषकर्त्रादीति। आदिशब्देन देवतासाधनान्युच्यन्ते। तत्र जीवप्रतिपादकवाक्यानि कर्तृपराणि ब्रह्मप्रतिपादकानि देवतापराणि सृष्ट्यादिप्रतिपादकानि साधनपराणीति भावः। अत्र प्रकरणभेदान्नाग्नि होत्रादिशेषत्वमिति चेदुपासनारूपकर्मशेषत्वकस्त्वित्यपि कर्मशेषेति अहेयेत्यादिना। ब्रह्मप्रतिपाकानां तु उपास्यसमर्पकत्वेनोपासना-विध्यर्थत्वेऽपि न कश्चिद्दोषः। न तावता ब्रह्मणः शेषत्वेन प्रतिपादनापत्तिरिति।

अस्मिन्नेवाधिकरणे द्वितीयं वर्णकमारचयति अथवेत्यादिना। प्रवृत्तिनिवृत्तीति। अयं भावः- न च "रज्जुरियं न सर्प"इत्यादौ भ्रान्तिजनितभीतिनिवर्तनेन यथा हितोपदेशत्वं, तथेहसंसारिब्रह्मकथनेन संसारित्वभ्रन्तिनिवर्तनेन हितोपदेशत्वादेव च शास्त्रत्वमिति वाच्यम्। यथा रज्जुश्रवणमात्रे सर्पभ्रान्तिनिवृत्तिस्तथा ब्रह्मश्रवणमात्रे संसारित्वभ्रान्तेरनिवर्तनात्। किञ्च यदि ब्रह्मश्रवणमात्रेण संसारनिवृत्तिः स्यात्तदा श्रवणानन्तरं मनननिदिध्यासनयोर्विधानमनर्थकं स्यात्।

तस्मात् प्रतिपत्तिविधिविषयतयैव ब्रह्म समर्प्यत इति। प्रतिपत्तीति। "आत्मा वा अरे द्रष्टव्य" इति "ब्रह्म वेदे" त्यादिभिर्ब्रह्मात्मविषये ज्ञाने विहिते कोऽसावात्मा ब्रह्मेत्याकाङ्क्षायां "नित्यः सर्वज्ञः सर्वगत" इति विज्ञानमानन्दं ब्रह्मे"त्येवमादयो वेदान्ता इत्यभिप्रायः साक्षादेवेति। किञ्चात्र सिद्धोपदेशस्यानर्थक्यात्तत्परिहाराय हि क्रियाशेषत्वं कल्प्यते। आनर्थक्यपरिहारार्था च कल्पना तथैव कार्या यथाकृतायामानर्थक्यं परिहृतं भवति अन्यथा वैयर्थ्यापत्तेः। इह च ब्रह्मण कल्पितेऽपि क्रियार्थत्वेऽनर्थकत्वमेव निष्क्रियस्याङ्गस्य ब्रह्मणः क्रियासम्बन्धासम्भवेन तदर्थत्वासम्भवात्। अपि च प्रतिपत्तिविषयसमर्पकतया हि ब्रह्मस्वरूपपराणां नित्यादिवेदान्तवाक्यानां सार्थक्यं तवाभिमतं, तदयुक्तं अविषयत्वाद् ब्रह्मणः। तस्मात् प्रतिपत्तिविधिशेषत्वकल्पनायां श्रुतहान्य-श्रुतकल्पनातोऽन्यन्न किञ्चिल्लभ्यत इति यत्किञ्चिदेतन्मूर्ख-प्रलपितमित्यभिप्रायः।

ननु त्वन्मतेऽपि श्रुतब्रह्ममात्रस्य संसारानिवृत्तेरानर्थक्यमित्यत्राह-हितोपदेशत्वेनेति। अयं भावः मनननिदिध्यासनाभ्यां फलोप-कार्याङ्गाभ्यां सहितेन श्रवणेनावगतब्रह्मात्मभावस्य निवर्तत एव संसार इत्यस्ति प्रयोजनमिति।

यत्तु शक्तिग्रहासम्भव इति तत्राह नापीत्यादिना। अपि च वेदान्तेषु प्रतिपत्तिविधिरेव नास्ति कुतस्तच्छेषत्वमित्याह न चेत्यादिना। उपसंहरति तस्मादित्यादिना।

।।ब्रह्मण एव सच्छब्दवाच्यताधिकरणम्।।

सू. ईक्षतेर्नाशब्दम्।।

(मू) छान्दोग्ये षष्ठाध्याये द्वितीयखण्डे "सदेव सोम्येदमग्र आसीत्

DEPARTMENT OF ARCHAEOLOGY
TAMILNADU STATE
LIBRARY
10214
MADRAS-28.

एकमेवाद्वितीय" मिति "प्रस्तुत्य श्रूयते" तदैक्षत बहु स्यां प्रजाययति तत्तेजोऽसृजतेत्यादि। तत्र संशय:-किमत्र सच्छब्दवाच्यं जगदुपादानं प्रधानं उत ब्रह्मेति। तत्र प्रधानस्य त्रिगुणरूपानेकात्मकस्य सम्भवात्प्ररिणामस्यैव जगदुपादानत्वोपपत्तेः सत्त्वरजस्तमोरूपत्रिगुणात्मकं साङ्ख्यकल्पितं प्रधानमेव सच्छब्दवाच्यं जगदुपादानमिति प्राप्ते, ब्रूमः। सच्छब्दस्याचेतनप्रधानपरत्वे सच्छब्दवाच्यस्य प्रकृतपरामर्शिना "तदैक्षते"त्यत्रतच्छब्देन निर्दु(र्दि)ष्टस्य चेतनधर्मेक्षितृत्वश्रवणानुपपत्तेः प्रधानं सच्छब्दवाच्यं जगदुपादानं किन्तु चेतनं ब्रह्मैवेति।

अत्र सच्छब्देन प्रकृतत्वात् तच्छब्दस्य च प्रकृतपरामर्शित्वात् तच्छब्दसच्छब्दयोरैकार्थ्यं तच्छब्दस्य चोक्तकर्तृत्वाच्चेतनार्थकत्वं तदेकार्थत्वाच्च सच्छब्दस्यापि चेतनार्थकत्वमिति ब्रह्मैव सच्छब्दवाच्यमिति बोध्यम्।।

(टि) एवं वेदान्तानां ब्रह्मणि पर्यवसानमुक्तम्। ब्रह्म च सर्वज्ञं सर्वशक्ति जगत्कारणमिति च। तदेवेदानीमाक्षिप्य समाधत्ते त्रिगुणेति- त्रिगुणात्मकं हि जगत् त्रिगुणप्रकृतिकमित्येव युक्तं कल्पयितुं कारणानुरूपनियमात् कार्यस्य। यथा घटशरावादौ मृदनुरूपतेति भावः। सम्भवत्परिमाणस्येति। नहि कूटस्थस्य ब्रह्मणः परिणामः सम्भवति येन जगदुपादानत्वं स्यादिति भावः। ब्रह्मैवेति। नहि कूटस्थत्वादुपादानत्वासम्भवः। मायामहिम्ना विवर्ताधिष्ठानत्वेन तत्सम्भवादित्यमिप्रायः। स्पष्टार्थमाह अत्रेत्यादिना।।

।। ब्रह्मण आनन्दमयताधिकरणम्।।

सू. आनन्दमयोऽभ्यासात्।।

(मू) तैत्तिरीयके अन्नमयं प्राणमयं मनोमयं विज्ञानमयं च अनुक्रम्याम्नायते - "तस्माद्वा एतस्माद्विज्ञानमयात् अन्योऽन्तर

आत्मानन्दमय" इति। तत्रान्नमयः अन्नरसविकारो देहः प्राणमयः प्राणोपाधिक आत्मा प्राणविकारः। एवं मनोमयो विज्ञानमयश्च तत्तदुपाधिकः तत्तद्विकार इति।

तत्र संशयः - किं मयटो विकारार्थत्वात् आनन्दमयशब्देनाप्यन्नमयादिशब्वत् ब्रह्मणोऽर्थान्तरं जीव उच्यते उत मयटः प्राचुर्यार्थकत्वस्यापि सम्भवात् आनन्दमयशब्देन प्रकृतं "सत्यं ज्ञानमनन्तं ब्रह्मे"ति परं ब्रह्मोच्यत इति।

तत्रान्नमयादिविकारार्थमयट्प्रायपाठात् मयटो विकारार्थत्वात् आनन्दमयशब्देनानन्दविकारो जीव उच्यते न त्वविकृतं ब्रह्मेति प्राप्ते,

ब्रूमः। "एष ह्येवानन्दयति " "सैषानन्दस्य मीमांसा" "आनन्दो ब्रह्मेतिव्यजानात्" इत्येवमाद्यानन्दशब्दस्य परस्मिन् ब्रह्मणि बहुत्वोऽभ्यासदर्शनात् मयटः प्राचुर्यार्थकत्वस्यापि सम्भवादानन्दशब्देन प्रकृतं परमेव ब्रह्मोच्यते न जीव इति वृत्तिकारमतम्। शङ्कराचार्यभगवद्भाष्यकारमते तु तैत्तिरीयक एवानन्दमयं प्रस्तुत्य श्रूयते "ब्रह्मपुच्छं प्रतिष्ठे"ति।

तत्र संशयः - किमानन्दमयस्यावयवत्वेन ब्रह्मोच्यते उत स्वप्रधानत्वेनेति।

तत्र पुच्छशब्दस्य अवयवे रूढत्वादवयवत्वेनोच्यत इति प्राप्ते।

ब्रूमः। "असन्नेवे"त्यस्मिन्निगमनश्लोके "असद्ब्रह्मेति अस्ति ब्रह्मेति" च केवलस्य ब्रह्मण एवभ्यस्यमानत्वात् "ब्रह्म पुच्छमि"त्यत्र स्वप्रधानत्वेनैव ब्रह्मोच्यत इति। अयमत्र श्रुत्यर्थः- आनन्दमयस्य जीवस्य पुच्छ आधारो ब्रह्मेति।

(टि) एवं सर्वेषां वेदान्तानां ब्रह्मपरत्वे सिद्धे अधुना एकमेव ब्रह्मापेक्षितोपाधिसम्बन्धं निरस्तोपाधिसम्बन्धं च वेदान्तेषु तत्र तत्रोपदिश्यते। तत्र कस्मिन् वाक्य उपाधिर्विवक्षितः कस्मिन्नेति विचारार्थेऽध्यायशेष आरभ्यते। "तत्तेज ऐक्षते"त्याद्यमुख्येक्षणप्रायपाठो यथा न जगत्कारणत्वे निश्चायकः तथा नानन्दमय इत्यत्र मयटो विकारार्थत्वे प्रायपाठो न निश्चायक इति पूर्वेणात्र प्रत्युदाहरणसङ्गतिरिति सूचयन्नाह - अन्नमयादिविकारमयट्प्रायपाठादिति। अभ्यासदर्शनादिति। ज्योतिष्टोमाधिकारे ज्योतिःपदाभ्यासवदिहाप्येकदेशाभ्यास इत्यभिप्रायः।

श्रीमदाचार्यपादमतं दर्शयति - शङ्कराचार्येति। न ह्यायनन्दमयपदाभ्यासादानन्दमयशब्दार्थनिश्चयः सम्भवति। यत्तु ज्योतिरादिवदिति तदप्ययुक्तम्। आनन्दमयस्य ब्रह्मपरत्वे निश्चिते ज्योतिरादिवदानन्दपदस्य ब्रह्मपरत्वं तन्निश्चये चानन्दमयस्य ब्रह्मपरत्वमित्यन्योन्याश्रयात्। तस्मान्नेदमुदाहरणमित्याचार्याभिप्रायः। अत्रापि पूर्ववदेव प्रत्युदाहरणसङ्गतिरिति द्रष्टव्यम्। पुच्छशब्दो नावयवे रूढः किं तु लाङ्गूले । नच जीवात्मनो लाङ्गूलमस्तीति मुख्यार्थासम्भवात् वक्ष्यमाणो योग्यतावशादाधारो लक्षयितव्य इति सिद्धान्त्याशयं दर्शयन् श्रुत्यर्थमाह-आनन्दमयस्येति। आधार इति। यथा रज्जुः सर्पस्याधिष्ठानं तथा जीवस्याधिष्ठानं ब्रह्मेत्यभिप्रायः। तदेवं ब्रह्मपुच्छमित्यत्र निरस्तोपाधिकं ब्रह्म ज्ञेयत्वेनोपदिश्यत इति स्थितम्।।

।। परमेश्वरस्यैव हिरण्मयपदवाच्यताधिकरणम्।।

सू. अन्तस्तद्धर्मोपदेशात्।।

(मू) छान्दोग्यस्य प्रथमाध्याये उद्गीथोपासनायां श्रूयते -

"अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेशः आप्रणखात् सर्व एव सुवर्णः तस्य यथा कप्यासं पुण्डरीकमेवाक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदितः उदेति ह वै सर्वेभ्यः पाप्मभय यएवं वेदे"ति। अन्तरादित्य इति आदित्यमण्डलस्यान्तर्मध्ये स्थित इत्यर्थः। उदित उद्गतः निर्मुक्तः तस्मात् तस्यउदिति नामेति। उदेति निमुक्तो भवतीत्यर्थः। तथा तत्रैवानन्तरं (-सैवर्क् तत् साम तदुक्थ्यं तद्यजुः तत् ब्रह्मेति) श्रूयते "अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते सैवर्क् तत्साम तदुक्थ्यं तद्यजुः तद्ब्रह्मेति" इत्यादि। तत्र संशयः - किं विद्याकर्मातिशयवशात् प्राप्तोत्कर्षः कश्चित् संसारी आदित्यमण्डले चक्षुषि चोपास्यत्वेन श्रूयते किं वा सित्यसिद्धं ब्रह्मेति। तत्र हिरण्यश्मश्रुत्वादिरूपवत्वस्य अन्तरादित्ये अन्तरक्षिणीत्याधारस्य च संसारिलिङ्गस्य श्रवणात् संसारीति प्राप्ते,

ब्रूमः। "सर्वेभ्यः पाप्मभ्य उदित इति सर्वपाप्माव(प)गमस्य "सैवर्गि"त्याद्यृगााद्यात्मकत्वस्य च ब्रह्मधर्मस्योपदेशात् ब्रह्मेति रूपवत्त्वादिश्रवणमुपासनार्थमिति।।

(टि) एवमानन्दमयवाक्ये वा पुच्छवाक्ये वा निर्गुणं ब्रह्म ज्ञेयत्वेनोपदिश्यत इत्युक्तम्। इदानीं तु "य एष" इति वाक्ये सगुणं ब्रह्मोपास्यत्वेनोपदिश्यत इत्युच्यते। संसारित्वे ब्रह्मलिङ्गं. नोपपद्यते ब्रह्मत्वे तु ब्रह्मलिङ्गमुपासनार्थत्वेनोपपद्यत इत्याशयेनाह रूपवत्त्वादीति। एवं सर्वत्र ब्रह्मलिङ्ग.मितरलिङ्ग.बाधकमिति द्रष्टव्यम्।।

।।ब्रह्मण एव आकाशशब्दवाच्यताधिकरणम्।।

सू. आकाशस्तल्लिङ्ग.ात् ।।

(मू) छान्दाग्ये प्रथमाध्याये उद्गीथोपासनायामेव श्रूयते - "अस्य लोकस्य का गतिरिति आकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति आकाशो ह्येवैभ्यो ज्यायान् आकाश: परायणमि"ति। अत्र शालावत्य: पृच्छति अस्येति गति: प्रतिष्ठा आधार इत प्रश्नार्थ: प्रवाहणो राजोत्तरमाहाकाश इति। कथमाकाशस्य सर्वप्र-पञ्चाधारत्वमिति अत्राह सर्वाणीति। आकाशं प्रत्यस्तं यन्ति आकाशे लीयत इत्यर्थ:। एभ्य: भूतेभ्य: परायणं उत्पत्तिस्थितिलयस्थानमिति यावत्। तत्र संशय: - किं भूताकाशे ब्रह्मणि च प्रसिद्धेनाकाशशब्देन भूताकाशमधीयते किं वा परं ब्रह्मेति। तत्र भूताकाशे आकाशशब्दस्य प्रसिद्धतरत्वात् भूताकाशमेव आकाशशब्देनाभिधीयत इति प्राप्ते,

ब्रूम:। वाक्यशेषे सर्वभूतोत्पत्तिलयादिहेतुत्वस्य परब्रह्मासाधारण-लिङ्ग.स्य श्रवणात् आकाशशब्देन ब्रह्मैवाभिधीयते तनु भूताकाश इति।।

(टि) इदानीमाकाशशब्दे विवक्षितोपाधेरन्यत्र सम्पाद्योपासनमित्युच्यते। लिङ्ग.स्येति। भूयसामनुग्रहायात्र लिङ्गे.न श्रूतिर्बाध्यत इति भाव:। ब्रह्मैवेति। आकाशशब्दितं सोपाधिकं ब्रह्मोद्गीथ उपास्यमिति भाव:।

।।ब्रह्मण एव प्राणशब्दवाच्यत्वाधिकरणम्।।

सू. अत एव प्राण:।।

(मू) छान्दोग्ये प्रथमाध्याये उद्गीथाधिकारमध्ये "प्रस्तोतर्या देवता प्रस्तावमन्वायत्त"त्युपक्रम्य प्रस्तावाध्यानं विहितम्। तत्र श्रूयते - "कतमा सा देवतेति प्राण इति होवाच सर्वाणि ह वा इमानि

भूतानि प्राणमेवाभिसंविशन्ति प्राणमेवाभ्युज्जिहते सैषा देवता प्रस्तवमन्वायत्ते"ति। चाक्रायणनामा कश्चिदृषिः प्रस्तोतारमुवाच – "हे प्रस्तोतः या देवता प्रस्तावमि"ति। स पप्रच्छ "कतमे"ति। ऋषिरुत्तरमाह – "प्राण" इति। हेति प्राणमभिलक्षयित्वेत्यर्थः। लयकाले संविशन्ति प्राणे लयं यान्तीत्यर्थः। उज्जिहते उद्गच्छन्ति प्राणदेवोत्पद्यन्त इत्यर्थः। सा परा देवता प्रस्तावं भक्तिविशेषं अन्वायत्त अनुगता प्राप्तेत्यर्थः।

तत्र संशयः- किं प्राणशब्देन वायुविकारोऽभिधीयते उत परं ब्रह्मेति।

तत्र पूर्ववत् वायुविकारे प्रसिद्धतरत्वाद्वायुविकारः प्राणशब्देनाभि धीयत इति प्राप्ते,

ब्रूमः। पूर्ववदेव वाक्यशेषे सर्वभूतलयादिहेतुत्वरूपब्रह्मलिङ्ग.श्रवणात् ब्रह्मैव प्राणशब्देनाभिधीयत इति।
अत्र प्रस्तावदेवतायाः प्राणस्यानन्तरमादित्योऽन्नं च उद्गीथप्रतिहारयोर्देवते निर्दिश्येते तयोर्लिङ्गभावान्न ब्रह्मत्वम्। तत्सामान्यान्न प्राणस्यापि ब्रह्मत्वमिति शङ्क.ानिरासार्थमिद-मधिकरणम्।।

(टि) इदानीमाकाशन्यायं प्राणेऽतिदिशति। अतिदेशस्य प्रयोजनं दर्शयत्यत्रेत्यादिना।।

।। ब्रह्मण एव ज्योतिः शब्दाभिधेयत्वाधि-करणम्।।

सू. ज्योतिश्चरणाभिधानात्।।

(मू) छान्दोग्ये तृतीयाध्याये गायत्रीविद्यायां हृदयच्छिद्रोपासनमभि-

धायाम्नायते – "अथ यदत: परो दिवो ज्योतिर्दीप्यते विश्वत: पृष्ठेपु सर्वत:पृष्ठेपु अनुत्तमेपु उत्तमेपु लोकेषु इदं वा तद्यदिदमस्मिन् अन्त: पुरुषो ज्योतिरि"ति। अत: दिव: द्युलोकात् पर: परस्तात् विश्वत: विश्वस्मात् प्राणिवर्गात् पृष्ठेषु उपरिष्टात् यत् ज्योतिर्दीप्यते तदिदं वाव यदस्मिन् पुरुषे अन्तर्ज्योतिर्जाठरज्योति: तदित्यर्थ:। तथा "गायत्री वा इदं सर्वं भूतमिति पूर्वस्मिन् गायत्रीखण्डे श्रूयते – "सेषा चतुष्पदा षड्विधा गायत्री तदेतदृचाभ्यनूक्तमि"-त्याम्नाय मन्त्र आम्नात: "तावानस्य महिमा ततो ज्यायांश्च पुरुष: पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवी"ति। तदनन्तरमाम्नायते"यो वै तद् ब्रह्मेति षड्विधा भूतशरीरपृथ्वीशरीरहृदयवाक्प्राणै: षड्विधेत्यर्थ:। अस्य गायत्र्यनुगतचतुष्पाद्ब्रह्मण: यावान् प्रपञ्च: पाद: सर्वा सर्वाणि भूतानि त्रिपादमृतं दिवी तावन्महिमा। तत: प्रपञ्चात् ज्यायान् पुरुष: वास्तवं ब्रह्म अवास्तवात् प्रपञ्चात् महदिति मन्त्रस्यार्थ:। तत्र संशय: – किमत्र चतुष्पात्त्वेन गायत्रीछन्दसो निर्देशात् "अथ यदत" इति ज्योतिर्वाक्ये यच्छब्देन ब्रह्मपरामर्शासम्भवात् ज्योतिर्वाक्ये च ब्रह्मलिङ्गाश्रवणात् प्रसिद्धत्वात् च ज्योतिश्शब्देनादित्यादिज्योतिरभिधीयते किं वा तावानिति मन्त्रवाक्ये चतुष्पदो ब्रह्मणो निर्देशात् ज्योतिर्वाक्ये यच्छब्देन परामर्शसम्भवात् तत्समानाधिकृतेन श्रुतौ ब्रह्मण्यपि प्रसिद्धेन ज्योतिश्शब्देन ब्रह्माभि-धीयत इति। तत्र गायत्र्या: प्रकृतत्वात्तावानित्यत्र गायत्र्या निर्देशादुक्तरीत्यादित्यादिज्योतिरभिधीयत इति प्राप्ते।

ब्रूम:। "गायत्री वा इदं सर्वं इति सर्वात्मत्वस्य" पादोस्य सर्वाणि भूतानी"ति प्रपञ्चपात्त्वस्य ब्रह्मलिङ्गस्य श्रवणात् मन्त्रे ब्रह्मणो निर्देशात् उक्तरीत्या ज्योतिर्वाक्ये ज्योतिश्शब्देव ब्रह्मैवाभि-

धीयत इति। अत्र ब्रह्मलिङ्ग.श्रवणेऽपि प्रकृतब्रह्मपरामर्शियच्छब्द-सामानाधिकरण्यात् ज्योतिश्शब्दस्य ब्रह्मपरत्वमिति बोध्यम्।।

(टि) इदानीं प्रसङ्गादिदमारभ्यते। अत्र ज्योतिश्शब्देनादित्यादि-ज्योतिरभिधीयत उत परं ब्रह्मेत्यधिकरणशरीरम्। अन्ये तदर्थविचारा इति बोध्यम्।।

।। ब्रह्मण एव प्राणशब्दव्युत्पाद्यत्वाधिकरणम्।।

सू. प्राणस्तथानुगमात् ।।

(मू) अस्ति कौषीतकिब्राह्मणोपनिषदि इन्द्रप्रतर्दनाख्यायिका - "प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम युद्धेन पौरुषेण चे"त्यारभ्याम्नाता। तस्यां श्रूयते - "स होवा च प्राणेऽस्मि प्रज्ञां मा तं मामायुरित्युपास्ये"ति। तथोत्तरत्र -"अथ खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयती"ति। तथा "न वाचं विजिज्ञासीत वक्तारं विद्यादि"त्यादि। अन्ते च "स एष प्राण एव प्रज्ञामानन्दोऽजरोऽमृत" इत्यादि। प्रतर्दनः कश्चिद् राजा। दैवोदासिः दिवोदासाख्यराज्ञोऽपत्यमित्यर्थः। पौरुषेण युद्धकारणपुरुषकारेण स इन्द्र इत्यर्थः।

तत्र संशयः - किं प्राणशब्देन वायुमात्रं वा देवतात्मा वा इन्द्रोऽथवा जीवः परम्ब्रह्मवादी अभि,धीयत इत्यनियम उत परं ब्रह्मैवेति।

तत्र "इदं शरीरं परिगृह्योत्थापयती"ति वायुप्राणलिङ्ग.स्य "प्राणोऽस्मी"त्यहङ्कारवादेन वक्तुरिन्द्रस्य निर्देशात्मकेन्द्रलिङ्गस्य "वक्तारं विद्यादि"त्यादि जीवलिङ्गस्य "आनन्दोऽमृत" इत्यादि ब्रह्मलिङ्ग.स्य च श्रवणादनियम इति प्राप्ते,

ब्रूमः। हिततमत्वमहापातकनाशादिब्रह्मज्ञानानन्यसाध्यफलादि-रूपानेकब्रह्मलिङ्ग.श्रवणात् ब्रह्मैव प्राणशब्देनाभिधीयत इति।

इदं त्ववधेवम्-ब्रह्मलिङ्ग.मस्ति चेत् ब्रह्मणि समन्वयोऽन्यलिङ्गानां ब्रह्मपरत्वेऽप्युपपत्तेः ब्रह्मलिङ्ग.ानां च अन्यपरत्वे अनुपपत्तेश्चेति।।

।।इति शारीरकमीमांसायां।।

।।प्रथमाध्यायस्य प्रथमः पादः।।

(टि) एवमनन्यथासिद्धतात्पर्यवत्! ब्रह्मलिङ्ग.वशात् ब्रह्मपरत्वमुक्तम्। इदानीं तु यत्रानेकेषां लिङ्ग.दर्शनं तत्र कथमिति चिन्त्यते। अस्मिन् पादे सिद्धमर्थं सुखग्रहणायाह - इदं त्वित्यादिना।।

।।इति केरलीये षोडशाध्यायी।।

।। टिप्पणे त्रयोदशाध्यायस्य ।।

।। प्रथमः पादः ।।

।। अथ प्रथमाध्यायस्य द्वितीयः पादः।।

।। ब्रह्मण एव मनोयत्वाद्यधिकरणम् ।।

सू. सर्वत्र प्रसिद्धोपदेशात् ।।

(मू) छान्दोग्ये तृतीयाध्याये अस्ति शाण्डिल्यविद्या "सर्वं खल्विदं ब्रह्म तज्जलानी"ति शान्त उपासीते"त्यारभ्याम्नाता। तत्र श्रूयते - "स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूप" इति। अन्ते च "एतद् ब्रह्मेति तज्जलानी"ति। तस्माज्जायत इति तज्जं तस्मिन् लीयत इति तल्लं तस्मिन् अनिति चेष्टत इति तदनम्। तज्जं च तदलं च तदनं च तज्जलानम्। इतिर्हेतौ छान्दसो लोपः। तज्जलानत्वात् इदं जगत् सर्वं ब्रह्मेत्यर्थः। "शान्त उपासीते" ति शमविधिः। क्रतुं सङ्कल्पं कुर्वीतेत्युपासना-विधिः।तस्याश्च विषयत्वेन मनोमयः प्राणशरीर इत्यादि निर्दिश्यते।

ततश्च मनोमयं प्राणशरीरमुपासीतेत्यर्थः।।

तत्र संशयः- किमिह मनोमयत्वप्राणशरीरत्वादिधर्मैः शारीर आत्मा उपास्यत्वेन निर्दिश्यते किं वा परं ब्रह्मेति।

तत्र शरीरस्य मनआदिसम्बन्धप्रसिद्धेः शारीर आत्मोपदिश्यत इति प्राप्ते,

ब्रूमः - अप्रकृतस्य शब्दानुपात्तशरीरस्य उपास्यत्वेन कल्पना तासु शब्दानुपात्तत्वेऽपि प्रकृतस्य ब्रह्मणः प्रकृतत्वान्मनोमयत्वादि-विशेषणानां विशेष्यत्वेन उपास्यत्वेन कलनं परामिति परं ब्रह्मैवोपास्यत्वेनोपदिश्यत इति।।

।।श्रीः।।

।।अथ त्रयोदशस्य द्वितीयः पादः।।

(टि) एवं पूर्वस्मिन् पादे स्पष्टब्रह्मलिङ्ग.युक्तवाक्यानां ब्रह्मणि समन्वय उक्तः।इदानीं तु अस्पष्टब्रह्मलिङ्ग.युक्तानां वाक्यानां ब्रह्मणि समन्वयं वक्तुं पादद्वयमारभ्यते। तत्रास्मिन् पादे उपास्यब्रह्मविषयवाक्यानि विचार्यन्ते। अत्र मनोमयत्वप्राणशरीरत्वादीनां सोपाधिकब्रह्मणो जीवस्य च साधारणत्वादस्पष्टब्रह्मलिङ्ग.तेति द्रष्टव्यम्। शरीरस्येति मनसो विकारो मनोमयः। प्राणश्शरीरमस्येति प्राणशरीर इति तद्धितबहुव्रीहिभ्यां प्रतीयमानस्य सम्बन्धस्य जीवात्मनि प्रसिद्धेरित्यर्थः।

।। ईश्वरस्यैवात्तृत्वाधिकरणम्।।

सू. अत्ता चराचरग्रहणात् ।।

(मू) कठवल्लीषु द्वितीयवल्ल्यवसाने-

"यस्य च ब्रह्म च क्षत्रं च उभे भवत ओदनः।
मृत्यूर्यस्योपसेचनं क इत्था वेद यत्र सः।।"

इति । यस्य ब्रह्मक्षत्रजाती ओदनस्थानीये मृत्युश्च घृताद्युपसेचनस्थानीयः स परमात्मा यत्र वर्तने तत्स्थानं इत्या इत्यमिति "नाविरतो दुश्चरितादि"ति पूर्वपठितमन्त्रोक्तोपायवतोऽन्वयः। कः वेद न कोऽपीत्यर्थः। तत्र ब्रह्मक्षत्रादिना चराचरं जगल्लक्ष्यते तदत्तृत्वं च परमात्मनः उपसंहृत्वादुपपद्यत इति ओदत्वाद्युक्तिरिति।

तत्र संशयः - अत्र ओदनोपसेचनसूचितः कश्चिदत्ता प्रतीयते स किमग्निरुत जीवः किं वा परमात्मेति। अग्निजीवपरमात्मनामत्र प्रश्नोपन्यासे असम्भवात् इह च कस्यापि विशिष्यानुपात्तत्वात् संशयः। तत्रा"ग्निरन्नाद" इति श्रुतत्वात् अग्निरत्तेति चेत्, उच्यते "तयोरन्यः पिप्पलं स्वाद्वत्ती"ति जीवस्यात्तृत्वश्रवणात् जीव इत्येवं प्राप्ते,

ब्रूमः। ब्रह्मक्षत्रादिलक्षितचराचरात्तृत्वस्य परमात्मनोऽन्यस्यासम्भवात् परमात्मैवात्तेति।।

(टि) अथ व्यधिकरणी प्रासङ्गि.की। संशयबीजमाह इहेत्यादिना। अग्निप्रकरणोऽतिक्रान्तः। ओदनशब्देन च कम्रफलमुच्यत इत्यभिप्रेत्याह- तयोरन्य इत्यादि। ओदनशब्दो मुख्यार्थसम्भवात् लक्षयन् मृत्यूपसेचनसन्निधानाद्विनाश्यत्वगुणमेव प्रसिद्धौदनगतं लक्षयित्वा तद्वति ब्रह्मक्षत्रलक्षिते जगति गौण इत्येव कल्पयितुं युक्तम्।अन्यथा मृत्यूपसेकाभिधानानुपपत्तेरित्याभिप्रेत्याह--लोक इत्यादि।।

।। जीवब्रह्मणोरेव गुहाप्रवेशाधिकरणम् ।।

सू. गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् ।।

(मू) कठवल्लीष्वेव तृतीयवल्यादौ श्रूयते

"ऋतं पिबन्तौ सुकृतस्य लोके
गुहां प्रविष्टौ परमे परार्ध्ये
छायातपौ ब्रह्मविदो विदन्ति ये
पञ्चाग्नयो त्रिणाचिकेता:।।

(इति) सुकृतस्यादृष्टस्य लोके कार्ये देहे परार्ध्ये यद्हृदयं तत्र परमे क्षेष्ठे या गुहा तां गुहां प्रविष्टौ विरुद्धस्वभावत्वात् छायातपौ ऋतं कर्मफलं पिबन्तौ भुञ्जानौ यौ तौ जीवात्मपरमात्मानौ ब्रह्मविद: पञ्चाग्नय: कर्मिण: ये च त्रिर्नाचिकेत: अग्निश्चिता त्रिणाचिकेता: ते च वदन्तीत्यर्थ:।

तत्र संशय: - किं बुद्धिजीवाविह गुहां प्रविष्टाविति निर्दिष्टौ उत जीवपरमात्मानाविति।

तत्र गुहाप्रवेशनादिविशेषणानां परिच्छिन्नयोर्जडाजडयो: बुद्धिजीवयोरेव सम्भवात् बुद्धिजीवाविह निर्दिष्टाविति प्राप्ते, ब्रूम:। लोके सङ्ख्याश्रवणे समानस्वभावप्रतीतिदर्शनात् श्रुतावपि समानस्वभावौ जीवात्मपरमपत्मानावेव निर्दिष्टाविति। चेतनत्वाच्चेह द्वयो: समानस्वभावत्वमिति बोध्यम्।।

(टि)एवमत्तृत्वप्रतिपादकवाक्यार्थं प्रतिपाद्य इदानीं पातृत्वप्रतिपादकवाक्यार्थ: प्रतिपाद्यते। परमात्मन: सर्वगतत्वात् गुहाप्रवेशनादय: सम्भवन्तीत्याशयेनाह-लोक इत्यादि।।

।।ब्रह्मण एवाक्षिगतत्वाधिकरणम्।।

सू. अन्तर उपपत्ते:।।

(मू) छान्दोग्ये चतुर्थाध्याये उपकोसलविद्यायां श्रूयते "य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच एतदमृतमयं एतद् ब्रह्मेति

तद्यद्यप्यस्मित् सर्पिर्वा उदकं वा सिञ्चति वर्त्मनी एव गच्छती"त्यादि। वर्त्मनी पक्ष्मस्थले एव सिक्तं घृतादिकं गच्छति न चक्षुः तेन लिप्यत इत्यर्थः। अनेन सर्वदोपलेपराहित्यरूपं ब्रह्मानुरूप्यमुच्यत इति।

तत्र संशयः - किमयमक्ष्यधिकरणप्रतिबिम्बात्मा किं वा जीवात्मा अथवा देवतात्मेन्द्रियस्याधिष्ठाता उत परमात्मेति। तत्राधिकरणत्वदृश्यत्वयोः उपपत्तेः प्रतिबिम्बात्मेति चेत्। उच्यते। आत्मशब्दस्वारस्यात् जीवत्मेति। अत्रोच्यते। "रश्मिभिरेषोऽस्मिन् प्रतिष्ठित" इति श्रुतेरादित्यो देवतात्मेत्येवं प्राप्ते,

ब्रूमः। आत्मत्वामृतत्वादीनां परमात्मन्येव मुख्यवृत्योपपत्तेः परमात्मैवेति। "प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे"ति सस्वविशिष्ठं ब्रह्म प्रकृतं नास्तीति कृत्वाचिन्तेयम्।।

(टि) एवं प्रथमश्रुतसङ्खव्यानुरोधेन ब्रह्मपरत्वमुक्तम्। इदानीं तु प्राथम्यं न विवक्षितमित्युच्यते। अक्ष्यधिकारणत्वादेः प्रथमश्रुतत्वान्न त्यागो युक्त इत्याशयेनाह-अक्ष्यधिकरणत्वेति। अनेकलिङ्गबलवत्त्वान्नोपक्रमप्राबल्यमित्याशयेनाह - आत्मत्वामृतत्वादीनामिति। अक्षिस्थानादिव्यपदेशस्तूपासनार्थत्वान्न विरोध इति भावः।।

।। परमेश्वरस्यैवान्तर्यामिताधिकरणम्।।

सू. अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्

(मू) बृहदारण्यके पञ्चमाध्याये सप्तमेऽन्तर्यामिब्राह्मणे "य इमं च लोकं परं च लोकं सर्वाणि भूतानि योऽन्तरो यमयती त्युपक्रम्य श्रूयते -" यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरोऽयं पृथिवी न वेद यस्य पृथिवी शरीरं यं पृथिवीमन्तरो यमयति

एष त आतन्तर्याम्यमृत" इत्यादि। अत्रान्तर्यामीत्यपूर्व संज्ञादर्शनात् संशयः- किमयमन्तर्यामी यः कश्चिद् उत पृथिव्याद्यभिमानी कश्चिद् देवतात्मा अथवा प्राप्ताणिमाद्यैश्वर्यः कश्चिद्योगी उत साङ्ख्यस्मृतिकल्पितं जगत्कारणं प्रधानं आहोस्वित् जीवात्मा किं वा परमात्मेति। तत्राप्रसिद्धत्वाद्यः कश्चिदिति चेदुच्यते। "पृथिव्येव यस्यायतनमि"त्यादिश्रुतौ पृथिव्यादि अभिमानदेवतात्मनः प्रसिद्धत्वात् पृथिव्याद्यभिमानीति। अत्रोच्यते, सर्वानुप्रवेशेन यमयितृत्वश्रवणानुरोधात् प्राप्ताणिमाद्यैश्वर्यः कश्चिदिति। अत्र वदामः। प्रधानस्य जगदुपादानस्य सर्वनियन्तृत्वस्यादृष्टत्वादि-धर्माणां चोपपत्तेः प्रधानमन्तर्यामीति। अत्राभिधीयते, चेतनत्वदृष्टत्वादि धर्मोपपत्तेः जीवात्मान्तर्यामीत्येवं प्राप्ते,

ब्रूमः। "यो विज्ञाने तिष्ठन्नित्यादि" यो विज्ञानमन्तरो यमयती"ति च विज्ञानस्य जीवस्यात्मनो जीवस्य पृथिव्यादिवदधिष्ठानत्वेन नियम्यत्वेन च अन्तर्यामिनः श्रवणात् जीवात्मनोऽन्यः परमात्मान्तर्यामीति।।

(टि) इदानीं स्थानप्रसङ्ग.ादिदमारभ्यते । अनिरूपितं न शक्यतेऽस्तीत्यभ्युपगन्तुमित्याशयेनाह पृथिव्येवेत्यादिना। अन्तर्यामिशब्दश्च योगवशेन पृथिव्याद्यभिमानिदेवतात्मनि वर्तत इति भावः। अदृष्टत्वादिति। अनेन योगिपक्षानुपपत्तिरुक्तेति द्रष्टव्यम्। जीवपक्षं निराकरोति यो विज्ञान इत्यादिना। तस्मात् परमात्मैवात्रोपास्य इति भावः।

।।परमेश्वरस्यैव भूतयोनित्वाधिकरणम्।।

सू. अदृश्यत्वादिगुणको धर्मोक्तेः

(मू) मुण्डकोपनिषदि प्रथमखण्डे श्रूयते - "अथ वा परा

यया तदक्षरं अधिगम्यते यत्तदद्रेश्यमग्राह्यं अगोत्रमवर्णमचक्षुः श्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद् भूतयोनिं परिपश्यन्ति धीरा"इति। अद्रेश्यत्वादिविशिष्टं भूतयोनिं धीराः ब्रह्मविदः पश्यन्ति तदक्षरमधिगम्यते यया सा परा विद्येत्यर्थः। अद्रेश्यं अदृश्यं अगोत्रं वंशशून्यं अवर्णं जातिशून्यमिति।

तत्र संशयः - किमयमदृश्यत्वादिगुणको भूतयोनिः प्रधानं उत जीवात्मा अथवा परमात्मेति। तत्र "यथोर्णनाभिरि"ति यथापृथिव्यामिति यथा स्वतः पुरुषादि"ति चोर्णनाभिपुरुषयोः शरीरस्य पृथिव्याश्च चेतनस्य दृष्टान्तत्वेन श्रवणादचेतनं प्रधानं भूतयोनिरिति चेत्, उच्यते। धर्माधर्माभ्यां भूतजातस्यापार्जनात् भूतयोनिः भूतनिमित्तो जीवात्मेत्येवं प्राप्ते,

ब्रूमः।"यः सर्वज्ञः सर्वविदि"त्यादि परमात्मधर्मश्रवणात् परमात्मैव भूतयोनिरिति। अत्र प्रधानाभिधाय्यक्षरशब्दसामानाधिकरण्यदर्शनात् संशय इति बोध्यम्।।

(टि) एवं दृष्टत्वादिप्रधानविरोधिगुणादन्तर्यामी न प्रधानमित्युक्तम्। इदानीं तु प्रधानविरोधिगुणाश्रवणात् भूतयोनिः प्रधानमेवेत्याशङ्क्य परिहरति। योनिशब्दस्य उपादानं निमित्तं चार्थः। तत्राद्यमङ्गीकृत्याह यथोर्णेत्यादिना। द्वितीयमङ्गीकृत्याह धर्माधर्माभ्यामिति। धर्माधर्मद्वारा जगतो निमित्तं जीवात्मेत्यर्थः। अनास्थया चायं पक्ष उपन्यस्तः।सर्वथा परमात्मा न भूतयोनिरित्यभिप्रायः। पौनरुक्त्यमाशङ्क्याहात्रेत्यादिना। अनेनास्य प्रासङ्गिकत्वमपि सूचितमिति।।

।। परमेश्वरस्यैव वैश्वानरत्वाधिकरणम्।।

सू. वैश्वानरः साधारणशब्दविशेषात् ।।

(मू) छान्दोग्ये पञ्चमाध्याये वैश्वानरविद्यायां "को न आत्मा किं ब्रह्मेति आत्मानमेवेमं वैश्वानरं सम्प्रत्यध्येषि तमेव नो ब्रूहि चेत्युपक्रम्य द्युसूर्यादीनां सुतेजस्त्वादिगुणयोगमेकैकोपासननिन्दयो-ऽपदिश्याम्नायते" "यस्त्वेतमेवं प्रादेशमात्रं अभिविमानमात्मानं वैश्वानरमुपास्त" इत्यादि। अध्येषि स्मरसि।

तत्र संशयः - किं वैश्वानरशब्देन जाठरोऽग्निरुपदिश्यते अथवा भूताग्निः उत ताभिमानिनी देवता आहोस्वित् जीवात्मा उत परमात्मेति। तत्र सामान्येनाग्नौ वेश्वानरशब्दप्रयोगदर्शनात् भूताग्निरिति चेत्, उच्यते। "अयमग्निर्वैश्वानरोऽयमन्तः पुरुषे येनेदमन्नं पच्यते यदद्यत" इति जाठरे विशेषेण श्रवणात् जाठर इति। अत्रोच्यते। ऐश्वर्याद्युपेतायां "मूर्धा वै सुतेजा" इत्यादि द्युमूर्धत्वादिस्तुतेः कथञ्चित् सम्भवात् ऐश्वर्याद्युपेता देवता वैश्वानरशब्देनोपदिश्यत इति। अत्र वदामः, आत्मशब्दसामाना-धिकरण्याज्जीवात्मेत्येवं प्राप्ते,

ब्रूमः। "मूर्धैव सुतेजा" इत्यादिना द्युलोकादिसकलजगतो वैश्वानरस्य मूर्धाद्यवयवत्वेन प्रतिपादनात् परमात्मैव वैश्वानरशब्दो-पास्यत्वेनोपदिश्यत इति।।

।।इति शारीरकमीमांसायां प्रथमाध्यायस्य।।

।।द्वितीयः पादः।।

(टि) एवमुपक्रमस्थमदृश्यत्वादिसाधारणलिङ्गं वाक्यशेषगतसर्वज्ञत्वाद्यसाधारणलिङ्ग.ानुरोधेन बाधित्वा परमात्मा भूतयोनिरित्युक्तम्। इदानीं तूपक्रमस्थसाधारणश्रुति-रसाधारणलिङ्ग.वशान्नीयते। द्युसूर्यादीति। तत्र वाजसनेयके द्यौरतिष्ठात्वगुणा छान्दोग्ये सुतेजस्त्वगुणेत्यादि तत्रैव द्रष्ठव्यमिति।

विश्व: सर्व: सर्वात्मा चासौ नर: पुरुषश्च विश्वनर इति कर्मधारय:। स्वार्थे च तद्धित इति वैश्वानरशब्दस्य परमात्मनि वृत्तिरित्याशयेनाह- मूर्धैवेत्यादि।।

।। इति केरलीये षोडशाध्यायीटिप्पणे ।।

।। त्रयोदशस्याध्यायस्य।।

।। द्वितीय: पाद: समाप्त: ।।

।।अथ प्रथमाध्यायस्य तृतीय: पाद: ।।

।।ब्रह्मण एव द्युभ्वाद्यायतनत्वाधिकरणम् ।।

सू. द्युभ्वाद्यायतनं स्वशब्दान्।।

(मू) मुण्डकोपनिषदि चतुर्थे खण्डे श्रूयते - "यस्मिन् द्यौ: पृथिवी चान्तरिक्षमोतं मनस्सह प्राणै: च सर्वैस्तमेवैकं जानीयात्मानमन्या वाचो विमुञ्चथामृतस्यैत्र सेतुरिति। ओतं आश्रितं तं द्युपृथिव्याद्याधारभूतं एवमेवात्मानं जानीय न त्वाश्रितं द्युभ्वादि इतोऽन्या वाच: अनात्मप्रतिपादकतर्कशास्त्रादय: विमुञ्चथापुरुषार्थत्वादित्यर्थ:। अमृतस्य सेतु: पुरुषार्थ इति यावत्।

तत्र संशय:। किमेतद् द्युभ्वाद्यायतनत्वेन श्रूयमाणं प्रधानं वायु: उत जीवात्मा उत ब्रह्मेति। तत्र साङ्ख्यस्मृतौ कारणत्वेन प्रसिद्धस्य प्रधानस्यायतनत्वोपपत्ते: प्रधानं द्युभ्वायतनमिति चेत् उच्यते। "वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेण अयं च लोक: परश्च लोक: सर्वाणि च भूतानि सन्दब्धानि भवन्तीति" वायोर्लोकधारणत्वश्रवणाद्वायुतिति। अत्रोच्यते आत्म-शब्दात् जीवात्मा भोक्ता भोग्यद्युभ्वाद्यायतनमिति। एवं प्राप्ते,

ब्रूम:। एकशब्दसमानाधिकृतात्मशब्दात् परमेव ब्रह्म द्युभ्वायतनमिति।।

।। अथ त्रयोदशस्य तृतीयः पादः।।

एवं द्वितीयपादेनास्पष्टब्रह्मलिङ्ग.युक्तानां उपास्यत्वेन ब्रह्मप्रतिपादकानां वाक्यानां ब्रह्मणि समन्वयमुक्त्वाधुना ज्ञेयत्वेन ब्रह्मप्रतिपादकानामस्पष्टब्रह्मलिङ्ग.युक्तानामेव वाक्यानां ब्रह्मणि समन्वयं प्रतिपादयितुं तृतीयपाद आरभ्यते। तत्रात्र त्रैलोक्यात्मा वैश्वानरः परमात्मा चेत् त्रैलोक्यायतनत्वेन निर्दिश्यमानं परमात्मनोऽर्थान्तरं स्यात् स्वस्वायतनत्वासम्भवादित्याशङ्क.च परिहरति। स्मृतेःश्रुतिर्बलीयसीत्याशयेनाह- वायुर्वा इतीत्यादि। जीवस्य द्युभ्वाद्यायतनत्वोपपत्तिं दर्शयन्नाह - भोक्ता भोग्येति। एकशब्दोऽपि अद्वैताभिधायी। एकशब्द इत्येकजीववादाविरोध इति बोध्यम्।।

।। परमात्मन एव भूमत्वाधिकरणम्।।

सू. भूमा सम्प्रयादादध्युपदेशात् ।।

(मू) छान्दोग्ये सप्तमाध्याये नारदं प्रति सनत्कुमारेण तत्त्वोपदेशप्रकरणे श्रूयते - "भूमा त्वेष विजिज्ञासितव्य" इति "भूमानं भगवो विजिज्ञास "इति "यत्र नान्यत् पश्यति नान्यत् विजानाति स भूमे"ति।

तत्र संशयः - किं प्राणो भूमा अथवा परमात्मेति। "प्राणो वा आशया भूयानि"ति भूयस्त्वेण प्राणस्य सन्निधानात् प्राणो भूमेति प्राप्ते,

ब्रूमः। "एष तं वा अतिवदति यस्सत्येनानिवदती"ति तुशब्देन प्रकृतप्राणं॰यावर्त्य सत्यशब्देनोपदिष्टस्यपरमात्मन एवात्र सन्निधानात् परमात्मैव भूमेति।।

(टि) एवं परमात्मनस्त्रैलोक्यायतनत्वमुक्तम्।अत एव प्राप्तं

महत्वमिदानीं श्रुत्या प्रतिपाद्यते। प्रकृतप्रमाणमिति। तुशब्देन प्राणदर्शिनोऽतिवादित्वव्यावर्तनात् प्राणोऽपि व्यावर्तत इति भाव:।।

।। ब्रह्मण एवाक्षरताधिकरणम्।।

सू. अक्षरमम्बरान्तधृते:।।

(मू) बृहदारण्यके पञ्चमाध्याये अष्टमे गार्गिब्राह्मणे श्रूयते - "कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति स होवाच एतद्वै यदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलमनण्वि"त्यादि। स: याज्ञवल्क्य: यस्मिन्नोत: प्रोत: तदेतदक्षरं ब्राह्मणा वदन्तीत्यर्थ:।

तत्र संशय:। - किमक्षरशब्देन वर्ण ओङ्कार उच्यते उत ब्रह्मेति।

तत्राक्षरसमाम्नाय इत्यादावक्षरशब्दस्य वर्णे प्रसिद्धत्वादक्षरशब्देनोङ्कार उच्यत इति प्राप्ते,

ब्रूम:। यदूर्ध्वं याज्ञवल्क्यादिना आकाश एव तदोतं च प्रोतं चेत्यन्तेन पृथिव्यादिसमस्तविकारजातस्य आकाशप्रतिष्ठत्वमुक्त्वा कस्मिन्नाकाश इति प्रश्नानन्तरं उत्तरत्वेनोक्तस्य पृथिव्याद्याकाशान्त-धारणस्य ब्रह्मणोऽन्यत्रासम्भवात् ब्रह्मैवाक्षरमिति।।

(टि) एवं सत्यश्रुत्वा भूम्नो ब्रह्मत्वमुक्तम्।इदानीं अम्बरान्तधारण लिङ्गिनाक्षरस्य ब्रह्मत्वमुच्यते किमक्षरमित्यादिना।।

।।परब्रह्मण ईक्षतिकर्मता (ध्येयता) धिकरणम्।।

सू. ईक्षतिकर्मव्यपदेशात् स:।।

(मू) प्रश्नोपनिषदि पञ्चमे सत्यकामप्रश्ने- "एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कार" इत्यादि प्रकृत्य श्रूयते - "य:

पुनरेतं त्रिमात्रेणौमित्येतेनैवाक्षरेणैव परं पुरुषमभिध्यायीतेति। तथा "स सामभिः उन्नीयते ब्रह्मलोकमि"ति च । तथापरमपि "एतस्मात् जीवधनात् परात्परं पुरीशयं पुरुषमीक्षत" इति। अपरं हिरण्यगर्भाख्यं सः ध्याता उन्नीयते ब्रह्मलोक"- मिति। हिरण्यगर्भब्रह्मलोकप्राप्तिः फलमिति यावत्। सः ब्रह्मलोकं प्राप्तः जीवधनात् सर्वजीवसमष्टिरूपात् परात् उत्कृष्टात् हिरण्यगर्भात् परं उत्कृष्टं पुरीशयं सर्वहृदये शयानं पुरुषं परमात्मानं ईक्षत इत्यर्थः।

तत्र संशयः।- किमत्रापरं ब्रह्म हिरण्यगर्भाख्यंध्येयत्वेनोपदिश्यते उत परं ब्रह्मेति।

तत्र हिरण्यगर्भलोकप्राप्तिफलस्योच्यमानत्वात् अपरं ब्रह्मोपदिश्यत इति प्राप्ते।

ब्रूमः। परस्यैवेक्षणकर्मत्वेन उच्यमानत्वात् परमेव ब्रह्मात्र ध्येयत्वेनोपदिश्यत इति। अत्र परापरयोः प्रकृतत्वात् संशयः।नच ब्रह्मलोकप्राप्तिमात्रं फलं किन्तु क्रममुक्तिरित्युपसंहारानुरोधात् निश्चय इति।।

(टि) इदानीमक्षरप्रसङ्गादोङ्.ारवाच्य उपास्यो निर्णीयते। पूर्वपक्षं निराकरोति नचेत्यादिना।।

।। ब्रह्मण एव दहराकाशत्वाधिकरणम्।।

सू. दहर उत्तरेभ्यः।।

(मू) छान्दोग्ये अष्टमाध्यायस्यादावस्ति दहरविद्या। तत्रादौ श्रूयते - "अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशः तस्मिन् यदन्तः तदन्वेष्टव्यं तद्वा विजिज्ञासितव्यमि"त्यादि। ब्रह्मपुरे शरीरे दहरमल्पं पुण्डरीकं

हृदयपुण्डरीकमित्यर्थः। दहरः अल्पः।

तत्र संशयः - किमयं दहर आकाशो भूताकाशः उत जीवात्मा परमात्मेति।

आत्राकाशशब्देस्य भूताकाशे रूढत्वात् भूताकाश इति चेत्। उच्यते। अत्रोपमितस्य हृदयावस्थितत्वोक्तेः जीवात्मेत्येवं प्राप्ते,

ब्रूमः। वाक्यशेषेऽपहतपाप्मत्वादिश्रवणात् परमात्मैव दहर आकाश इति। आकाशश्ब्दस्य वियद्ब्रह्मणोः प्रयोगदर्शनात् ब्रह्मपुरमिति। ब्रह्मशब्देन चेतनवाचिना शरीरान्तर्गतदहरस्योच्यमानत्वाच्च अत्र संशयः। वाक्यशेषात् निश्चय इति।।

(टि) पुरीशयमिति पुरसम्बन्धप्रसङ्ग.ादिदमारभ्यते। परमात्मैवेति। तस्मादत्र परमात्मोपास्य इति भावः।।

।। ईश्वरस्यैवाक्षिपुरुषत्वाधिकरणम्।।

सू. उत्तराच्चेदाविर्भूतस्वरूपस्तु ।।

(मू) छान्दोग्ये अष्टमाध्याये अस्ति दहरविद्याया उपरि प्रजापतिविद्या। तत्र "य आत्मा अपहतपाप्मा" इत्यादिना अपहतपाप्मत्वादिगुणकमात्मानं "सोऽन्वेष्टव्यः स जिज्ञासितव्य" इति अन्वेष्टव्यत्वेन जिज्ञासितत्वेन च प्रतिज्ञायाम्नायते - "य एषेऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाचे"ति। तथा "य एष स्वप्ने महीयमानश्चरत्येष अन्वेति होवाचे"ति। तथा "तद्यत्रैतत् सुप्तः समस्तः सम्प्रसन्नस्वप्नं न विजानात्येष आत्मेति होवाचे"ति च । उपसंहारे च "एवमेवैष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष"

इति। तत्राक्षिणि पुरुष इति जागरणावस्थोपन्यासः। स्वप्ने महीयमान इति स्वप्नावस्थोपन्यासः। सुषुप्त इति सुषुप्त्यवस्थोपन्यास इति।

तत्र संशयः - किमत्रात्मशब्देन जीवात्मोच्यते ततश्चापहतपाप्मत्वादिगुणानां जीवात्मनि सम्भवात् दहरोऽपि जीवः स्यात् उत परमात्मात्रोच्यते । ततश्च जीवस्यापहतपाप्मत्वादिगुणासम्भवात् दहरोऽपि परमात्मैवेति।

तत्रावस्थात्रयसम्बन्धोपन्यासात् अवस्थात्रययुक्तो जीवात्मात्रोच्यते। ततश्च दहरोऽपि जीव एवेति प्राप्ते,

ब्रूमः। "आत्मापहतपाप्मेत्युपक्रमे" स उत्तमः पुरुष "इत्युपसंहारे च परमात्मनो निर्देशात् परमात्मैवात्रात्मशब्देनोच्यते। ततश्चोक्तरीत्या दहरोऽपि परमात्मैवेति। नेदमधिकरणान्तरमिति पक्षान्तरम्।।

(टि) नेदमिति। पूर्वाधिकरण एव शङ्का.परिहार इति भावः।।

।।चैतन्यस्य सर्वजगद्१ . ्कत्वाधिकरणम्।।

सू. अनुकृतेस्तस्य च।।

(मू) मुण्डकोपनिषदि चतुर्थे खण्डे श्रूयते -

"नतत्र चन्द्रो (सूर्यो) भवति(भति) न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति।।" इति। ज्योतिषा ज्योतिषीत्यर्थः। सूर्यादयो न भान्ति किन्तु तं ज्योतिषां भासकं परमात्मनं भासं भासमानं सन्ततस्य परमात्मनः भासा सर्वं सूर्यादि जगदनुभाति न स्वातन्त्र्येणेत्यर्थः।

तत्र संशयः - किमत्र सूर्यादिभासकत्वेन श्रूयमणः तेजोविशेष उत परमात्मेति।

तं भान्तं न सूर्यादयो भान्तीति सूर्यादितेजोभिभवस्य तेजस्स्वभावस्य श्रूयमाणत्वात् तेजोविशेष एव स इति प्राप्ते,

ब्रूमः। अनुभातीति सूर्यादितेजोभासकत्वश्रवणात् परमात्मैव। नहि तेजसां तेजोभासकत्वं किन्तु ज्ञानस्यैवेति।।

(टि) परं ज्योतिरिति। ज्योतिश्शब्दप्रसङ्ग.ादिदमारभ्यते। सिद्धान्तापेपत्तिं दर्शयति नहीत्यादिना।।

।। परमेश्वरस्याङ्गुष्ठमात्रत्वाधिकरणम् ।।

सू. शब्दादेव प्रमितः

(मू) कठवल्लीषु चतुर्थवल्ल्यां श्रूयते-

"अङ्गु.ष्टमात्रः पुरुषो मध्य आत्मनि तिष्ठति।

ईशानो भूतभव्यस्य न ततो विजुगुप्सते।।"

इत्यादीनि। तत्र संशयः - किमयमङ्गु.ष्ठमात्रः पुरुषः श्रूयमाणो जीवात्मा उत परमात्मेति।

तत्र अङ्गु.ष्टमात्र इति परिमाणोपदेशात् जीवात्मेति प्राप्ते।

ब्रूमः। ईशानो भूतभव्यस्येति भूतभविष्यत्त्वरूप-कृत्स्नजगदीशितृत्वश्रवणात् परमात्मेति। हृदयावस्थितमपेक्ष्य अङ्गु.ष्ठमात्रत्वोक्तिरिति बोध्यम्।।

(टि) श्रवणादिति। अङ्गु.ष्ठमात्रत्वं हि लिङ्गं., लिङ्ग.ाच्च श्रुतिर्बलीयसीति भावः। परमात्मेति। न ह्यङ्गु.ष्ठमात्र इति जीव उपास्यत्वेनोपदिश्यते किन्तु परमात्मा ज्ञेयत्वेनेत्यभिप्रायः।

।।देवादीनामप्यधिकारित्वाधिकरणम्।।

सू. तदुपर्यपि बादरायणः सम्भवात्।।

(मू) बृहदारण्यके तृतीयेऽध्याये चतुर्थब्राह्मणे श्रूयते- "तद्यो यो देवानां प्रत्यबुध्यत स एवतदभवत् तथर्षीणां तथा मनुष्याणामिति। देवानां मध्ये यो यो ब्रह्म बुबुधे स स एव तद् ब्रह्माभवदित्यर्थः। एवमृषीणां मनुष्याणामित्यत्रापि।

तत्र संशयः- किं देवानामृषीणां च ब्रह्मविज्ञानेऽधिकारोऽस्ति उत नेति।

तत्र वैदिकविधित्वात् अग्निहोत्रादिवत् ब्रह्मविद्यायामपि नाधिकार इति प्राप्ते,

ब्रूमः। शरीरवतां देवादीनां मुमुक्षुत्वादिसम्भवात् अस्त्यधिकार इति। पूर्वतन्त्रे विग्रहवत्वाभावकथनं तु अभ्युच्चयमात्रमिति ध्येयम्।।

(टि) इदानीं प्रसङ्गे.नाधिकारश्चिन्त्यते। पूर्वतन्त्रविरोधं परिहरति- पूर्वतन्त्र इति। इदमप्यधिकरणं प्रासङ्गि.कम्।।

।। शूद्रस्य ब्रह्मविद्यायामनधिकाराधिकरणम् ।।

सू. शूद्रस्य तदनादरश्रवणात्तदाद्रवणात् सूच्यते हि।।

(मू) छान्दोग्यस्य चतुर्थाध्याये संसर्गविद्यायां श्रूयते - "अजहारे (आजहार) त्वा शूद्र तवैव सह गोभिरस्त्वि"ति।

तत्र संशयः-किं शूद्रस्य ब्रह्मविद्यायामाधिकारोऽस्ति नेति।

तत्र शूद्रश्रवणात् अस्त्यधिकार इति प्राप्ते,

ब्रूमः। वेदवेदाङ्ग.ाध्ययनाभावात् न ब्रह्मविद्यायामधिकार

इति।शूद्रशब्दस्ययौगिक: "शुचा गुरुं दुद्रावे"ति शूद्र इति। एतेनापि केरलीयानां वेदानधिकारिणां वेदाङ्ग.भूतज्योतिर्व्याकरणाद्यध्ययनमधर्मत्वादुपेक्ष्यमिति सिद्धम्।।

(टि) एतेनेति। श्रवणाध्ययनप्रतिषेधात् "स्मृतेश्चे" ति सूत्रेण भगवता बादरायणेन त्रैवर्णिकव्यतिरिक्तस्य विद्याप्रतिषेधेनेत्यर्थ:। सकलश्रुतिस्मृतिसदाचारविरोधस्तु पूर्वतन्त्रे षष्ठेऽपशूद्राधिकरणे उक्तं तन्न विस्मर्तव्यमिति।।

।।ईश्वरस्यैव कम्पनहेतुताधिकरणम्।।

सू. कम्पनात् ।।

(मू) कठवल्लीषु षष्ठवल्ल्यां श्रूयते -

"यर्दि किञ्चित् (किच्च) जगत् सर्वं प्राण एजति
निस्सृतम्।
महत् भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ति।।"

इति। निस्सृतं उत्पन्नम्।यदिदं जगत् सर्वं प्राणेनिमित्ते एजति कम्पते। तच्च प्राणशब्दवाच्यं उद्यतं वज्रमिव महद्भयं महाभयहेतुभूतं ईशितृत्वादिति भाव:। तदीशितुभयहेतुभूतं ब्रह्म ये विदु: ते अमृता भवन्तीत्यर्थ:।

तत्र संशय: - किं प्राणोऽत्र वायुरुत परमात्मेति।

तत्र प्रसिद्धत्वात् पञ्चवृत्तिर्वायु: प्राण इति प्राप्ते,

ब्रूम:। प्राणे सत्येजतीति प्राणस्य जगच्चेष्टानिमित्तत्वप्रतिपादनात् जगच्चेष्टानिमित्तभूत: परमात्मैव प्राण इति।।

(टि) प्रासङ्गि.कं समाप्याधुना वाक्यार्थविचार: प्रस्तूयते - पञ्चवृत्तिरिति। प्राणोऽपानोव्यान उदान: समान इति पञ्च वृत्तयो यस्य वायो: स पञ्चवृत्तिरित्यर्थ:।

।। ब्रह्मण एव ज्योतिष्ट्वाधिकरणम् ।।

सू. ज्योतिर्दर्शनात् ।।

(मू) छान्दोग्ये अष्टमाध्याये प्रजापतिविद्यायामाम्नायते - "एष सम्प्रसादोऽस्मात् शरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुष" इति। सम्प्रसादो जीवः।

तत्र संशयः- किं ज्योतिश्शब्देन प्रसिद्धं तेजः आदित्यादिकमुच्यते उत परं ब्रह्मेति।

तत्र - "अथ यत्रैतस्मात् शरीरात् उत्क्रामति अथैतैरेव रश्मिभिरूर्ध्व आक्रमत" इतिमुमुक्षोशदित्यप्राप्त्यभिधानात् प्रसिद्धं तेजः तेजश्शब्देनोच्यत इति प्राप्ते,

ब्रूमः। "य आत्मापहतपाप्मे"त्युपक्रमे "स उत्तमः पुरुष" इत्युपसंहारे च ब्रह्मणो दर्शनात् ब्रह्मैव ज्योतिश्शब्देनोच्यत इति। आदित्यप्राप्तिस्तु नात्यन्तिको मोक्ष इति।।

(टि) पूर्वाधिकरणयोर्बहुलिङ्ग.विरोधात् श्रूतिबाध उक्तः। (अधुना लिङ्ग.ानुगृहीतश्रुत्वाकाशश्रुतिबाध उच्यते। लिङ्ग.मेव दर्शयति-भेदेन व्यपदेशादिति।) इदानीं तु तत्प्रसङ्गात् प्रकरणानुगृहीतोत्तमपुरुषश्रुत्या ज्योतिश्श्रुतेर्बाध उच्यते। आदित्यप्राप्तिवाक्यस्य तात्पर्यमाह - आदित्यप्राप्तिरिति।।

।। ब्रह्मण एव नामरूपनिर्वाहकताधिकरणम्।।

सू. आकाशोऽर्थान्तरत्वादिव्यपदेशात्।।

(मू) छान्दोग्ये अष्टमाध्याये चतुर्दशे खण्डे श्रूयते-
"आकाशो वै नामरूपयोर्वि(र्निर्व) हिता ते यदन्तरा तद् ब्रह्म तदमृतं स आत्मे"ति। नामरूपयोरिति। जगत

इति शेषः। निर्वहिता निर्वाहकः। ते नामरूपे यदन्तरा यस्मादाकाशात् भिन्ने यस्यकाशस्य वा मध्ये वर्तते तदाकाशं ब्रह्म अमृतं मरणरहितं स एवात्मेत्यर्थः।

तत्र संशयः- किमाकाशशब्देन भूताकाश उच्यते अथवा ब्रह्मेति।

तत्र प्रसिद्धत्वात् भूताकाश इति प्राप्ते।

ब्रूमः। "ते यदन्तरे"ति नामरूपाभ्यां भेदेन व्यपदेशात् ब्रह्मेति। भूताकाशस्तु नामरूपान्तर्गत एवेति तदभेदेन व्यपदेष्टुं शक्यते। अत्र निर्वहणमवकाशदानमिति शङ्क.ा नियन्तृत्वमित्युत्तरमिति।।

(टि) प्रकरणानुगृहीतश्रुत्या ज्योतिश्श्रुतिबाध उक्तः। अधुना लिङ्ग.ानुगृहीतश्रुत्याकाशश्रुतिबाध उच्यते। लिङ्ग.मेव दर्शयति- भेदेन व्यपदेशादिति। लिङ्ग.त्वं प्रतिपादयति-भूताकाशस्त्विति।।

।। ब्रह्मण एव विज्ञानमयत्वाधिकरणम्।।

सू. सुषुप्त्युत्क्रान्त्योर्भेदेन।।

(मू) बृहदारण्यके षष्ठाध्याये तृतीये ब्राह्मणे "कतम आत्मेति योऽयं विज्ञानमयः प्राणेषु हृदन्तर्ज्योतिः पुरुषः समानः सन्नुभौ लोकौ अनुसञ्चरती"त्युपकम्य भूयानात्मविषयः प्रपञ्चः कृतः। विज्ञानमयः लिङ्ग.शरीरमयो जीवः प्राणेषु इन्द्रियेषु प्राणादिवायुषु च हृदि अन्तःकरणे अन्तःकरणवृत्तिषु च अन्तः व्यतिरिक्तः देहेन्द्रियप्राणान्तःकरणतद्वृत्तिकामसङ्क.ल्पादिभ्यो व्यतिरिक्तः तेषां साक्षित्वेन ज्योतिःस्वरूपः पुरुषः सपुरुषः समानः लिङ्ग.शरीरतादात्म्याध्यासेन लिङ्क.शरीरेण समानस्सन् उभौ लोकौ

इहलोकपरलोकौ अनुसञ्चरतीत्यर्थः। चतुर्थे ब्राह्मणे च उपसंहारे "योऽयं विज्ञानमयः प्राणेष्वि"ति श्रूयते -

तत्र संशयः - किमुपक्रमस्थं योऽयमिति वाक्यं जीवानुवादकं उत जीवनुवादेन संसारिस्वरूपप्रतिपादकमिति।

तत्रोपक्रमोपसंहारयोर्विज्ञानमयश्रवणात् जीवानुवादकमिति प्राप्ते,

ब्रूमः। सुषुप्तौ "अयं पुरुषः प्राज्ञेनात्मना सम्परिष्वक्त" इति उत्क्रान्तौ च "अयं शारीर आत्मा प्राज्ञेनात्मना समन्वारूढ" इति च शरीराद् भेदेन परात्मना प्राज्ञशब्देन व्यपदेशात् परमात्मनोऽसंसारिणः स्वरूपप्रतिपादकमिदं वाक्यमिति।।

।। इति श्रीशारीरकमीमांसायां ।।

।। प्रथमस्य तृतीयः पादः ।।

(टि) लिङ्गानुगृहीतश्रुत्याकाशश्रुतिबाधमुक्त्वा अधुना ब्रह्मलिङ्गाज्जीवलिङ्गबाधः प्रदर्श्यते। किमुपक्रमस्थमिति। यदि पुरुषशब्दो जीवपरस्तदानुवादमात्रं, अथ परमात्मपरस्तदा संसारिप्रतिपादकमिति विवेक इति। न्यायमालायां तु विज्ञानमयो जीवो ब्रह्म वेति विचारो दर्शितः। असंसारिणः स्वरूपप्रतिपादकमिदं वाक्यमिति जीवानुवादमात्रं चेद्वाक्यं व्यर्थमेवेत्यभिप्रायः।।

।। इति केरलीये षोडशाध्यायीटिप्पणे

त्रयोदशस्याध्यायस्य

तृतीयः पादः।।

TAMIL NADU STATE DEPARTMENT OF ARCHAEOLOGY
LIBRARY
Acc No. ----
Date ----
MADRAS-28.

।।श्री:।।

।।अथ शारीरकमीमांसायां प्रथमस्य चतुर्थ: पाद:।।

।।कारणशरीरस्यैव अव्यक्तशब्दवाच्यताधिकरणम्।।

कठवल्लीषु तृतीयवल्ल्यां श्रूयते- "महत: परमव्यक्तं अव्यक्तात् पुरुष:" इति।

तत्र संशय: - किमव्यक्तशब्देन प्रधानमुच्यते उत शरीरमिति।

तत्र साङ्ख्यस्मृतिप्रसिद्धस्य पूर्वापरसाहचर्यनिमित्तप्रत्यभिज्ञानात् प्रधानमिति प्राप्ते,

ब्रूम:। "शरीरं रथमेव त्वि"ति शरीरस्य प्रकृतत्वात् शरीरमेव अव्यक्तशब्देनोच्यत इति। तस्मात् प्रधानस्याशाब्दत्वान्न जगत्कारणत्वमिति सिद्धम्।।

(टि) ।।श्री:।।

।। अथ त्रयोदशस्य चतुर्थ: पाद:।।

एवं त्रिभि: पादैर्वेदान्तानां ब्रह्मणि समन्वय उक्त:। अथ चतुर्थेन पादेन वेदान्तेषु क्वचिदपि न प्रधाने समन्वय इत्युच्यते। तत्र पूर्वाधिकरणे सिद्धगोचरलिङ्ग.प्रमाणादसिद्धगोचरलिङ्ग.प्रमाणस्य बलवत्त्वमुक्तम्।इदानीं तु प्रकरणानुगृहीतस्थानप्रमाणात् तत्सजातीयस्यैव स्थानप्रमाणस्य बाध उच्यते। पूर्वापरेति। अनेन स्थानप्रमाणमुक्तम्। प्रकृतत्वादिति। अेनेन प्रकरणानुग्रह उक्त:। शरीरमेवेति। कारणवाचिनाव्यक्तशब्देन कार्यं सूक्ष्मशरीरं लक्ष्यत इत्याभिप्राय:।।

।।तेजोऽबन्नात्मकप्रकृतेरेवाजात्वाधिकरणम्।।

सू.चमसवदविशेषात् श्वेताश्वतरोपनिषदि चतुर्थेऽध्याये श्रूयते -

"अजामेकां लोहितशुक्लकृष्णां
बह्वीः प्रजाः सृज्यमानाः सरूपाः।
अजो ह्येको जुषमाणोऽनुशेते
जहात्येनां भुक्तभोगामजोऽन्यः।। इति।

तत्र संशयः -किमत्राजाशब्देन प्रधानमुच्यते उत तेजोऽबन्नात्मिका प्रकृतिरिति।

तत्र लोहितशुक्लकृष्णामित्यनेन सत्वरजस्तमोगुणानां साम्यावस्थाप्रतिपादनात् साम्यावस्थापन्नं त्रिगुणात्मकं साङ्ख्यकल्पितं प्रधानमेवाजाशब्देनोच्यत इति प्राप्ते,

ब्रूमः। "यदग्ने रोहितं रूपं तेजसः तद्रूपं यच्छुक्लं तदपां यत् कृष्णं तदन्नस्ये"ति छान्दोग्ये षष्ठाध्याये चतुर्थे खण्डे श्रूयमाणानां तेजोऽबन्नात्मिकायाः प्रकृतेः रूपाणां अत्र लोहितशुक्लकृष्णामित्यनेन प्रतिपादनात् तेजोऽबन्नात्मिका प्रकृतिरेवात्राजाशब्देनोच्यत इति। तस्मान्न प्रधानस्य शाब्दत्वमिति।।

(टि) एवं कारणवाचिनः कार्यलक्षणमुक्त्वा अधुना लोहितादि-धर्मवाचिनां तेज आदि धर्मलक्षणां प्रतिपादयति- श्रूयमाणानामिति। स्मृतिप्रसिद्धेः श्रुतिप्रसिद्धिर्बलीयसीति भावः। तेजोऽबन्नात्मिकेति। अनेन धर्मवाचकानां धर्मिषु लक्षणा प्रदर्शितं अजो ह्येक इति। अविद्वान् संसारीत्यर्थः। अजोऽन्य इति विमुक्त इत्यर्थः। अजाशब्देनेति। अयमाशयः - न जायत इत्यजेति यौगिकत्वाद्धि प्रधानवाचित्वमजाशब्दस्य। तयाभिप्रेतं तन्न सम्भवति रूढिबलीयस्त्वात्। अजाशब्दो हि छागायां रूढः। जगत्प्रकृतेश्चाजासादृश्यं कल्पयित्वाजेत्युज्यत इति ।।

।। प्रणादीनामेव पञ्चजनत्वाधिकरणम्।।

सू. न सङ्ख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च।।

(मु) बृहदारण्यके षष्ठाध्याये चतुर्थे ब्राह्मणे श्रूयते

"यस्मात् पञ्च पञ्चजना आकाशश्च प्रतिष्ठित: तमेवमन्यमात्मानं विद्वान् ब्रह्मामृतोऽमृतमिति तं पञ्च पञ्चजनाकाशाश्रयमेवात्मानं अमृतं ब्रह्माहं मन्ये इत्थं विद्वानहं अमृतो भवामीत्यर्थ:। तथा " प्राणस्य प्राणमुत चक्षुषश्चक्षु: उत श्रोत्रस्य उतान्नस्यान्नं मनसो ये मनो विदुरि"ति । अत्र प्राणानां पञ्चानां साक्षी चिदात्मा अद्वितीयप्राणादिशब्दैरभिधीयते। ते च पञ्च जना: पूर्वस्मिन् मन्त्रे पञ्चपञ्चजनशब्देनोच्यन्त इति।

तत्र संशय: - किं पञ्चपञ्चजनशब्देन साङ्ख्य-शास्त्रप्रसिद्धपञ्चविंशतितत्त्वान्युच्यन्ते उत वाक्यशेषभूता: प्राणादय इति।

पञ्चशब्दद्वयेन साङ्ख्यशास्त्रप्रसिद्धपञ्चविंशतिसङ्ख्याया अवभासनात्,पञ्चविंशतितत्त्वान्युच्यन्ते पञ्चपञ्चजनशब्देनेति प्राप्ते,

ब्रूम:। प्राणादीनां वाक्यशेषे श्रुतत्वात् प्राणादय एव पञ्चजनशब्देनोच्यन्त इति।

अत्र पञ्चपञ्चजनशब्द: संज्ञाशब्द: "दिक्सङ्ख्ये संज्ञायामि"ति स्मरणात्। पञ्चपञ्चजनशब्देन पञ्चविंशति-सङ्ख्याभिधानेऽपि पृथक् निर्दिष्टाभ्यां आकाशात्मभ्यां सह सप्तविंशतिसम्पत्ते: साङ्ख्यसिध्दान्तविरोधोऽपि स्यादिति बोध्यम्।।

(टि) एवमजाशब्दस्य रूढिपरिग्रहेण योगवृत्त्या प्रधानपरत्वं निराकृत्येदानीं पञ्चपञ्चजनशब्दस्य रूढिपरिग्रहेण योगवृत्त्या

पञ्चविंशतितत्त्वपरत्वं निराक्रियते। तत्र योगवृत्तिं दर्शयति-पञ्चशब्दद्वयेनेति। पञ्च च ते पञ्चेति पञ्चविंशति सङ्ख्यावगतिरिति भावः। रूढिमेवाह अत्रेत्यादिना। अभ्युपेत्याह पञ्चपञ्चजनशब्देत्यादिना।।

।।जगद्योनौ ब्रह्मण्येव वेदान्तवाक्यसमन्वयाधिकरणम् ।।

सू. कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः।।

(मू) किं वेदान्तवाक्यानामस्ति जगत्कारणपरता उत नेति संशयः।

तत्र तैत्तिरीयके "आत्मन आकाशस्सम्भूत" इति आकाशादिका सृष्टिराम्नायते। छान्दोग्ये तु "तत्तेजोऽसृजते"ति तेज आदिका। एवमन्यत्रापींति वेदान्तवाक्यानां मिथो विप्रतिपत्तेर्न तेषां जगत्कारणपरतेति प्राप्ते,

ब्रूमः। सृज्यमानेष्वाकाशादिषु क्रमद्वारा सत्यामपि विधिप्रतिपत्तौ स्रष्टरि ब्रह्मणि विप्रतिपत्त्यभावात् युक्तैव वेदान्तानां जगत्कारणपरतेति। तस्माद् ब्रह्मैव जगत्कारणं न प्रधानमिति सिद्धम्।।

(टि) एवं त्रिभिरधिकरणैः प्रधानस्य शाब्दत्वं निराकृत्याधुना जगत्कारणविषयाणां वेदान्तानां परस्परव्याहतानां निश्चायकत्वाभावात् स्मृतिसिद्धमेव प्रधानं जगत्कारणं स्यादिति शङ्कां निवर्तयितुं विरोधः परिह्रियते। तदेतद् दर्शयन्नुपसंहरति तस्मादित्यादिना।।

।। परमात्मन एव जगत्कर्तृत्वाधिकरणम्।।

सू. जगद्वाचित्वात्।।

(मू) कोषीतकिब्राह्मणोपनिषदि बालाक्यजातशत्रुसंवादे श्रूयते – "यो वै बालाक एतेषां पुरुषाणां कर्ता यस्यैवैतत् कर्म स वै वेदितव्य" इति। एतेषामादित्यादिषोडशपुरुषाणामित्यर्थः।।

तत्र संशयः – किमत्र प्राणो वेदितव्यत्वेनोपदिश्यते उत जीव उत परमात्मेति।

तत्र "यस्य वैतत्कर्मेति श्रूयमाणस्य स्पन्दनलक्षणस्य कर्मणः प्राणाश्रयत्वात् प्राण इति चेत् उच्यते। "श्रेष्ठी स्वैर्भुङ्क्त" इत्यादीनां प्राणे अनुपपद्यमानानां भोक्तृत्वादीनां जीवलिङ्गानां श्रवणात् जीव इत्येवं प्राप्ते,

ब्रूमः। "ब्रह्म ते वप्र (ब्र) वाणी"ति ब्रह्मोपक्रमसामर्थ्यात् परमात्मैवात्रोपदिश्यत इति। यस्य वा एतत् जगत्कर्म कार्य मित्यर्थः। नत्वत्र कर्मशब्दः स्पन्दनवाचीति बोध्यम्"।।

(टि) एवं बहूनां परस्परविरुद्धानां वेदान्तानामविरोधेनैककारणविषयत्वमुक्तम्। इदानीं तु एकस्य शब्दस्यानेकार्थविषयस्यार्थविशेषविषयत्वेन कारणविषयत्वं वाक्यस्य निर्णीयते। एतदेव ध्वनयन्नाह कार्यमित्यर्थ इति। स वेदितव्य इति। तच्छब्देनोपदिश्यत इति भावः।

।।परमात्मन एव दर्शनयोग्यात्मत्वाधिकरणम्।।

सू. वाक्यान्वयात्।।

(मू) बृहदारण्यके चतुर्थेऽध्याये चतुर्थे मैत्रेयीब्राह्मणे "न वा अरे पत्युः कामाये"त्युपक्रम्य श्रूयते" न वा अरे सर्वस्य कामाये सर्वं प्रियं भवति आत्मनस्तु (वारे द्रष्टव्यः श्रोतव्यो) कामाय सर्वं प्रियं भवति आत्मा वारे द्रष्टव्यः श्रोतव्यो मन्तव्यो

निदिध्यासितव्यो मैत्रेयी", तथा "आत्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेदं सर्वं विदितमिति।

तत्र संशयः - किं जीवात्मा द्रष्टव्यत्वादिरूपेणोपदिश्यते उत परमात्मेति।

तत्र उपक्रमे आत्मनः प्रियशब्दसूचितभोक्तृत्वावगमात् जीवात्मेति प्राप्ते,

ब्रूमः "सर्वं विदित"मित्यादिसर्वविज्ञानादिब्रह्मसाधारणलिङ्ग- श्रवणात् परमात्मैवात्मोपदिश्यत इति"

(टि) इदानीं तु जीवपरमात्मनोर्भेद औपाधिको न वास्तव इत्युच्यते। सर्वं विदितमिति। अनेन भेदस्यौपाधिकत्वमपि दर्शितम्। नहि भेदस्य वास्तवत्वे ब्रह्मज्ञानेन सर्वं ज्ञातं भवति ब्रह्मभिन्नस्य ब्रह्मज्ञानविषयत्वासम्भवादिति।।

।।ब्रह्मण एवोपादाननिमित्तकारणत्वाधिकरणम्।।

सू. प्रकृतिश्च प्रतिज्ञादृष्टान्तानुरोधात्।।

(मू) ब्रह्म जगत्कारणमित्युक्तम्। तत्र संशयः- किमिदं कारणं कुलालादिवन्निमित्तत्वं एव उत निमित्तत्वं मृदादिवदुपादानत्वमपीति। "तदैक्षते"त्वादीक्षापूर्वककर्तृत्वश्रवणान्निमित्तत्वमिति प्राप्ते,

ब्रूमः। "सोऽकामयत बहु स्यां प्रजायेये"त्यादिषु कर्तृत्वोपादानत्वयोरवगमात् निमित्तत्वमुपादानत्वं चेति। अत्र उत्तमपुरुषप्रत्यायितप्रत्यगात्मनो बहुभवनावगतेरुपादानत्वं स्वातन्त्रतयावगतेश्च कर्तृत्वमिति विवेकः ।।

(टि) एवं ब्रह्मणो जगत्कारणत्वं लक्षणमुक्त्वा त्रिपाद्या षडधिकारण्या च प्रधानादीनां जगत्कारणत्वप्रतिपादकशब्दा-

भावाल्लक्षणस्यातिव्याप्तिं परिहृत्याधुना ब्रह्मणोऽपि जगदुपादानत्वप्रतिपादकशब्दाभावात् उपादानत्वं प्रधानस्यैव निमित्तत्वमेव ब्रह्मण इत्याशङ्क.्य उपादानत्वमपि ब्रह्मण श्रुतिप्रमितमेवेति प्रतिपाद्यते। तदेतद् ध्वनयन्नाह ब्रह्म जगत्कारणमिति। लक्षणस्य समन्वयाध्यायसङ्ग.तत्वाल्लक्षणसम्बन्धिनोऽस्याधिकरणस्यापि समन्वयाध्याये सङ्ग.तिरिति सङ्ग.तिप्रदर्शनार्थमिदं वृत्तसङ्क.ीर्तनमित्यपि द्रष्टव्यम्।।

।।ब्रह्मण एव जगत्कारणत्वाधिकरणम्।।

सू. एतेन सर्वे व्याख्याना व्याख्याताः।

(मू) परमाणुशून्यादीनामपि जगत्कारणत्वं क्वचित् श्रुतमस्ति। (तत्र किं परमाणुशून्यादीनामपि जगत्कारणत्वं) उत सर्वत्र ब्रह्मण एव सर्वकारणत्वमिति संशयः।

तत्र छान्दोग्ये षष्ठेऽध्याये द्वादशे खण्डे" अण्व्य एवेमे धाना" इति दृष्यन्तेन परमाणुकारणत्वस्य तस्मिन्नेवाध्याये द्वितीयखण्डे "असदेवेदमग्र आसीदि"ति शून्यकारणत्वस्य प्रतिपादनात् परमाणुशून्यादीनां कारणत्वमपि श्रौतमेवेति प्राप्ते,

ब्रूमः। एकविज्ञानप्रतिविज्ञानानुपपत्तेः न तेषां कारणत्वं श्रौतं किन्तु ब्रह्मण एवेति"

।। इति शारीरके प्रथमाध्यायस्य।।

।।चतुर्थः पादः।।

।।अध्यायश्च समाप्तः।।

(टि) इदानीमण्वादिकारणत्वं जगतो निराक्रियते। किं तु ब्रह्मण इति। सूक्ष्मत्व सादृश्यादणुत्वोक्तिः। अनभिव्यक्तनामरूपपरश्चासच्छब्द इति न विरोध इति भावः। तस्माद् वेदान्तानां ब्रह्मण्येव

समन्वयात् जिज्ञास्यं ब्रह्मैव जगत्कारणमिति सिद्धम्।।

।।इति केरलीये षोडशाध्यायीटिप्पणे
त्रयोदशस्याध्यायस्य चतुर्थः पादः
समाप्तश्चाध्यायः।।

।।श्रीः।।

।।अथ द्वितीयाध्यायस्य प्रथमः पादः।।

।।साङ्ख्यस्मृतेर्बाध्यत्वाधिकरणम्।।

सू. स्मृत्यनवकाशदोषप्रसङ्ग. इति चेन्नान्यस्मृत्यनवकाशदोष-प्रसङ्ग.ात्।।

सर्ववेदान्तवाक्यानां ब्रह्मणि समन्वयः ब्रह्मप्रतिपादकत्वमित्युक्तम्। तत्र कैश्चिद्वाक्यैः जीवपरैक्यं प्रतिपादितं कैश्चित्तु ब्रह्मणो जगत्सृष्टिस्थितिलयकारणत्वम्।

तत्र संशयः – किं जगत्कारणत्वप्रतिपादकानि वेदान्तवाक्यानि प्रधानपरतया नेतव्यानि उत नेति।

तत्र प्रधानकारणत्वप्रतिपादिकाया निरवकाशत्वमृतबलीयस्या साङ्ख्यस्मृत्यावगतवेदान्तवाक्यानामुक्तसमन्वयस्य विरोधात् तानि प्रधानपरतया नेतव्यानीति प्राप्ते,

ब्रूमः। प्रत्यक्षश्रुत्यविरुद्धया ब्रह्मकारणत्ववादिन्या निरवकाशभूतया मन्वादिस्मृत्या प्रत्यक्षश्रुत्या च विरुद्धायाः साङ्ख्यस्मृतेरप्रमाणत्वात् न साङ्ख्यस्मृतिप्रतिपादितप्रधानपरतया वेदान्तवाक्यानि नेतव्यानीति। यदि जगत्कारणत्वे स्मृतिः प्रमाणत्वेन ग्राह्या तदा प्रत्यक्षश्रुत्यविरुद्धमन्वादिस्मृतिरेव ग्राह्या न श्रुतिविरुद्धसाङ्ख्यस्मृतिरिति।।

।।श्रीः।।

।।अथ चतुर्दशस्य प्रथमः पादः।।

एवं तावत् पूर्वस्मिन्नध्याये जगत्कारणे ब्रह्मणि कृत्स्नवेदान्तानां समन्वय उक्तः। अधुना तस्य विरोधपरिहारायायमविरोधाध्याय आरभ्यते। तत्र प्रथमपादे स्मृतितर्कविरोधः परिह्रियते। इमामेव सङ्ग.तिं दर्शयन् वृत्तकथनपूर्वकं विषयं विविनक्ति सर्ववेदान्तेत्यादिना। अत्र साङ्ख्यस्मृतिविरोधः परिह्रियते-निरवकाशत्वेति। मन्वादिस्मृतयस्तु धर्मप्रतिपादकत्वात् सावकाशाः साङ्ख्यस्मृतिर्मोक्षमात्रपरा। यदि तत्रापि न प्रमाणं तदा निरवकाशैव स्यादिति तस्या बलीयस्त्वमित्याशयः। वेदोऽपि तदनुरोधेन नीयमानो न दुष्यतीत्याशयेनाह' तानीति। मानवादिष्वपि ब्रह्मकारणत्वप्रतिपादकांशो निरवकाश एवेत्याशयेनाह प्रत्यक्षेत्यादिना। पुरुषवचनस्य मूलमपेक्ष्यते। तच्च वेद एव वेदविरुद्धवचनं निर्मूलमप्रमाणमिति भावः।।

।। योगस्मृतेर्बाध्यत्वाधिकरणम् ।।

सू. एतेन योगः प्रत्युक्तः

(मू) पुनरपि संशयः जगत्सृष्ट्यादिप्रतिपादकवेदान्तवाक्यानि प्रधानपरतया नेतव्यानि नेति।

तत्र योगस्मृतिविरोधात् प्रधानपरतया नेतव्यानीति प्राप्ते, ब्रूमः। पूर्वन्यायान्न प्रधानपरतया नेतव्यानीति। अत्रयोगस्मृतिः पातञ्जलं शास्त्रं, तत्र चाष्टाङ्ग.योगः प्रत्यक्षवेदमुल एव प्रतिपाद्यत इति तस्याः प्रामाण्यम्। तत्र च प्रधानकारणत्वमपि प्रतिपाद्यते। तस्मात् तत्स्मृतिबलात् प्रधानकारणता स्यादिति आशङ्क.ा । प्रधानकारणत्वप्रतिपादकभूतैकदेशेन प्रामाण्यमिति परिहारः।

साङ्ख्यस्मृतिः कापिलं शास्त्रम्। तत्रापि पुरुषस्यासङ्गादिप्रतिपादके भूतैकदेशे प्रामाण्यमिष्टमेव। तस्मात् कापिलपातञ्जलस्मृत्योरेकदेशे प्रामाण्यं एकदेशे त्वप्रामाण्यमिति स्थितम् ।।

(टि) इदानीं योगस्मृतिविरोधः परिह्रियते। अत्र विशेषाशङ्काबीजमाहात्रेत्यादिना ।।

।।वैलक्षण्याभावस्य जगत्कारणत्वाबाधकत्वाधिकरणम् ।।

सू. न विलक्षणत्वादस्य तथात्वं च शब्दात् ।।

(मू) अत्र पुनरपि संशयः किं ब्रह्म चेतनं नाचेतनास्य जगतः कारणं विलक्षणत्वात् यथा सूवर्णशरावादेः तस्मात् अचेतनं प्रधानमेवाचेतनस्य जगतः कारणं सजातीयत्वात् यथा मृद् घटादेरित्यनुमानेन उक्तसमन्वयो बाध्यते न वेति।

तत्रानुमानस्य प्रधानत्वात् बाध्यत इति प्राप्ते,

ब्रूमः। व्यभिचारिणोऽस्यानुमानस्याप्रामाण्यात् न बाध्यत इति। तथाहि- चेतनानायतनात् गोमयाच्चेतनायतस्य वृश्चिकादेश्चेतनायतनात् शरीरात् चेतनानायतनस्य केशनखादीनां चोत्पत्तिदर्शनाच्च व्यभिचार इति।

(टि) पराभिमतशब्दानामाभासत्वं प्रसाध्याधुना तदभिमतन्यायानां स्वपक्षविरोधिनामाभासं दर्शयति। व्यभिचारमेवाह तथाहीत्यादिना।।

।। काणादिमतैर्बाध्यत्वाभावाधिकरणम् ।।

सू. एतेन शिष्टापरिग्रहा अपि व्याख्याताः।।

(मू) तत्रैव पुनरपि संशयः-किं कणादबौद्धादिशास्त्रैः

अण्वभावकारणत्वप्रतिपादकैः तदीयैः तर्कापरपर्यायैः अनुमानैश्च उक्तसमन्वयो बाध्यते न वेति।

तत्र पूर्ववत् प्रमाणत्वात् बाध्यत इति प्राप्ते,

ब्रूमः। पूर्ववदेवाप्रमाणत्वान्न बाध्यत इति।।

(टि) एवं साङ्ख्ययोगशास्त्रे तन्न्यायस्य च विरोधं परिहृत्याधुना कणादबौद्धादिशास्त्रन्यायविरोधः परिह्रियते तत्रैवेत्यादिना।।

।। द्वैतस्य भोक्तृभोग्याकारभासमानत्वाधिकरणम्।।

सू. भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत्।।

(मू) पुनरपि संशयः- जगतः कार्यस्य भोक्तृभोग्यद्वैविध्यदर्शनान्न ब्रह्मैकं जगत्कारणमित्यनुमानेन समन्वयो बाध्यते न वेति।

अत्र एकस्मात् समुद्रात् विविधफेनबुद्बुदादिकार्योत्पत्तिदर्शनाद्व्यवभिचार इति प्रमाणान्तरविरोधे श्रुतिरन्यथानीयते यथार्थवादादिः। अत्र च भोक्तृभेग्यभेदः प्रत्यक्ष- विरोधः। तस्मात् श्रुतिरन्यथा नेयेति च। अत्राशङ्क्.। समुद्रदृष्टान्तेन न प्रमाणविरोध इति परिहार इति। अत्र भोक्तृभोग्यभेदमभ्युपगम्य परिहार उक्त इति बोध्यम्।।

(टि) एवं शास्त्रीयतर्कविरोधं परिहृत्याधुना प्रत्यक्षादिप्रमाणविरोधः परिहृियते- अनुमानेनेति। अत्र साक्षात् प्रत्यक्षविरोधस्ततोऽनुमान- विरोध इति बोध्यम्। व्यभिचारं दर्शयति अत्रेत्यादिना। परिहारमेव विवृणोति समुद्रेत्यादिना। परिणामवादेनात्र परिहृत इति दर्शयन्नाह अत्रेत्यादि।।

।। ब्रह्मण्यद्वैतस्यैव तात्त्विकत्वाधिकरणम्।।

सू. तदन्यत्वमारम्भणशब्दादिभ्यः।।

(मू) तत्रैव संशयः - किं ब्रह्मणः भोक्तृभोग्यानां पारमार्थिको भेदोऽस्ति नेति।

तत्र प्रत्यक्षत्वादस्ति भेद इति प्राप्ते,

ब्रूमः। श्रुतिषु मृत्तिकादिदृष्टान्तेन ब्रह्मण एव सत्यत्वप्रतिपादनात् न पारमार्थिको भेद इति। तथा च छान्दोग्ये षष्ठेऽध्याये प्रथमे खण्डे श्रूयते - "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यमि"ति। वाचा घटः शराव इत्यादिवाचा आरभ्यते विकारः न तु वस्तुतः कश्चिद्विकारो नामास्ति नामधेयमात्रं ह्येतदनृतं मृत्तिकेत्येव सत्यमित्यर्थः। अनेन दृष्टान्तेन कारणस्य ब्रह्मण एव सत्यत्वं कार्यस्य जगतस्त्वनृतत्वमिति गम्यते इति।

अत्रेदमवधेयम् पूर्वाधिकरणपरिणामवादेन परिहृतं अत्र तु परमसिद्धान्तेन विवर्तवादेनेति। तस्मात् ब्रह्मविवर्तं जगत् न पारमार्थिकमिति सिद्धमिति।

(टि) एवमभ्युपेत्य परिहृत्याधुना सिद्धान्तेन परिहरति - ब्रह्मविवर्तमिति। विवर्तमानस्याभावोऽपि मिथ्यैव प्रतियोगिनो मिथ्यात्वादिति शुद्धाद्वैतसिद्धिरित्यभिप्रायः।

।।परमेश्वरस्य हिताहितभागित्वाभावाधिकरणम्।।

सू. इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः।

(मू) ब्रह्मैकमेव चेतनं तदेव जगत्कारणं तस्यैव चाविकृतस्य कार्यानुप्रविष्टस्य जीवस्य भोक्तृत्वं वक्तव्यमन्यथा द्वैतभङ्ग.-प्रसङ्ग.ात्। ततश्च भोक्तैव जगत्कर्तेत्यायातम्। ततश्च कर्ता स्वतन्त्रः सन् आत्मनो हितमेव कुर्यात् नाहितं मरणनरकादिकं

क्रियते चाहितं मरणादिकं अपि। एवं स्थिते संशयः - किं चेतनं ब्रह्म जगत्कारणं न वेति। तत्र हिताकरणाहितकरणदोषप्रसङ्ग.ान्न ब्रह्म चेतनं जगत्कारणमिति प्राप्ते,

ब्रूमः। भोक्तुरन्यस्याभोक्तुर्ब्रह्मणो जगत्स्रष्टुरविद्यमानहिताहितस्य हिताकरणातिकरणदोषप्रसङ्ग.ाभावात् चेतनमेव ब्रह्म जगत्कारणमिति। इदं त्ववधेयम्! - भेदस्य भ्रन्तित्वात् न भेदाभेदविरोध इति। वस्तुतस्तु नास्त्येव जगत्सृष्ट्यदिकं कुतोऽहितकरणादिदोष इति।।

(टि) एवं ब्रह्मणः कारणान्न जगतः कार्यस्यानन्यत्वमुक्तम्। अतो जीवस्यापि ब्रह्मणीऽनन्यत्वात् जीवधर्मा हिताकरणाहितकरणादयो दोष ब्रह्मणि प्रसज्येरन्नित्याशङ्क्.य परिहरति-दोषप्रसङ्ग.ादिति। यदि चेतनं तर्हि नैवं भवतीति भावः। यदि ब्रह्म भोक्तृ स्यात्तदैवं स्यान्न तु तत् भोक्तृ तस्मान्न दोष इत्याशयेनाह - भोक्तुरन्यस्येति। पूर्वाधिकरणेऽद्वैतमुक्तमिह भोक्तुरन्यस्येति द्वैतमुक्तमिति विरोधमाशङ्क्.याह इदं त्वित्यादिना ।।

अयमाशयः - औपाधिकभेदाङ्गीकारे सत्येव जीवधर्माणां ब्रह्मण्यापादानं शक्यते भेदानङ्गीकारे जीवस्य तद्धर्माणां चाभावात् तदङ्गीकारो तु भिन्नमेव ब्रह्म जीवादिति। मुख्यसिद्धान्तमाह - वस्तुतस्त्विति ।।

।।अद्वितीयब्रह्मण एव नानाविधसृष्टिकर्तृत्वाधिकरणम् ।।

सू. उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ।।

(मू) तत्रैव पुनरपि संशयः - किं चेतनस्य ब्रह्मण एकस्यैव जगत्कारणत्वं सम्भवति वा न वेति।

तत्र सहायं विना कुलालादीनां कर्तृत्वस्य मृदादीनामुपादानत्वस्य

च दर्शनान्न ब्रह्मण एकस्यैव कारणत्वं सम्भवतीति प्राप्ते,

ब्रूमः। यथा क्षीरस्यैकस्यैवानपेक्ष्य बाह्यं साधनं दध्याकारेण परिणामः तथा ब्रह्मणोऽपि एकस्य अनपेक्ष्य बाह्यं साधनं विचित्रजगदाकारेण परिणामसम्भवात् सम्भवत्येव एकस्यैव कारणत्वमिति।

इदं त्ववधेयम् - क्षीरवद्वस्तुस्वभावविशेषात् अत्र कारणत्वमुपपन्नमिति।।

(टि) एवं सजातीयाच्चेतनाज्जीवादभिन्नत्वे सति ब्रह्मणः कारणत्वं नोपपद्यत इत्याक्षिप्य समाहितम्। इदानीं विजातीयादचेतनादभिन्नत्वे सति ब्रह्मणो न जगत्कारणत्वमुपपद्यत इत्याक्षिप्य समाधत्ते - सहायं विनेति। सर्वत्र हि कार्योत्पत्तौ कर्तोपादानं च दृश्यते नापि किञ्चित् कार्यं कर्तृमात्राद्वोपादानमात्राद्वोत्पन्नं दृष्टमिति भावः। क्षीरवदिति। अयमाशयः - क्षीरं तावत् स्वयमेव कालपरिपाकवशात् दध्याकारेण (परिण) मत एव। औष्ण्यतक्रादिसहकारिभिस्तु त्वार्यत एव न तु तैर्विना क्षीरस्य दधिभावनापत्तिः किन्तु विलम्बमात्रमिति।।

।। ब्रह्मणः परिणामित्वाधिकरणम् ।।

सू. कृत्स्न प्रसक्तिर्निरवयवशब्दकोपो वा।।

(मू) चेतनं ब्रह्मैकमेव स्वयं परिणममानं जगत्कारणमिति समधिगतम् ।

तत्र संशयः - किं ब्रह्मणः परिणामित्वेन जगत्कारणत्वं सम्भवति वा न वेति।

तत्र न परिणामित्वेन जगत्कारणत्वं सम्भवति ब्रह्मणः

परिणामित्वेऽनित्यत्वप्रसङ्ग.ादिति प्राप्ते,

ब्रूमः। ब्रह्मणो जगदुपादानत्वश्रुत्या कार्यव्यतिरेकेण सत्वस्य च श्रवणात् श्रुत्या जगतो ब्रह्मविवर्तत्वस्य स्फुटीमृतत्वात् सम्भवत्येव सर्वशक्तियुक्तस्य ब्रह्मणो जगत्कारणत्वमिति न परिणामवादः किन्तु विवर्तवादः। अतो नानित्यदोषप्रसङ्ग. इति।।

(टि) इदानीं क्षीरदृष्टान्तेन ब्रह्म परिणामीत्याशङ्क.ा स्यात् तन्निराकरणेन विवर्तस्यैव श्रूत्यर्थतामाह चेतनमित्यादिना। कार्यव्यतिरेकेति। नहि परिणामिनः कार्यव्यतिरेकेण सत्वमस्ति यथा दधिव्यतिरेकेण क्षीरस्येति भावः। स्पष्टार्थमाह - न **परिणामवाद** इति।

।।ब्रह्मणोऽशरीरस्यैव मायासद्भावाधिकरणम् ।।

सू. सर्वोपेता च दर्शनात् ।।

(मू) सर्वशक्तियुक्तस्य कारणत्वमित्युक्तम् । तत्र संशयः किं ब्रह्मणः सर्वशक्तिकत्वमस्ति न वेति।

तत्र प्रमाणाभावान्नास्तीति प्राप्ते,

ब्रमूः। छान्दोग्ये तृतीयाध्याये चतुर्दशे खण्डे श्रूयते - "सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिमभ्याक्त" इति एवमादिश्रुतिभिः सर्वशक्तित्वप्रतिपादनात् अस्ति सर्वशक्तित्वमिति। न प्रमाणाभावः श्रुतीनामेव प्रमाणत्वादिति स्थितम्।।

(टि) सर्व्रशक्तियुक्तं ब्रह्म जगत्कारणमित्युक्त इदानीं ब्रह्मणः सर्वशक्तित्वे प्रमाणाभावान्न जगत्कारणत्वमित्यक्षिप्य परिहरति सवंशक्तीति।।

।। तृप्तस्यापि ब्रह्मण एव जगत्स्रष्टृत्वाधिकरणम् ।।

सू. न प्रयोजनवत्त्वात् ।।

(मू) "प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते" तस्माद् ब्रह्मणो जगत्सृष्टिरूपप्रवृत्तौ प्रयोजनं कल्प्यम् । कल्प्यमाने च प्रयोजने नित्यतृप्तत्वश्रुतिविरोधः उन्मत्तवत् प्रवृत्त्यभ्युपगमे तु सर्वज्ञत्वश्रुतिविरोध इति।

तत्र संशयः - किं ब्रह्मणो जगत्कर्तृत्वमस्ति नेति।

तत्रोक्तविरोधसम्भवान्न कर्तृत्वमिति प्राप्ते,

ब्रूमः। यथा विना प्रयोजनं लीलारूपाः प्रवृत्तयों दृश्यन्ते तथेहापि सम्भवात् अस्त्वेवं जगत्कर्तृत्वं ब्रह्मण इति।।

(टि) इदानीं ब्रह्मणः प्रयोजनशून्यत्वान्न जगत्कर्तृत्वमित्याक्षिप्य समाधत्ते प्रयोजनमित्यादिना।।

।।ब्रह्मणो वैषम्यनैर्घृण्याभावाधिकरणम्।।

सू. वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति।।

(मू) ब्रह्मणो जगत्कारणत्वे पुनरपि संशयः - किं ब्रह्मणो जगत्कारणत्वमुपपद्यते न वेति ।

तत्र केषांचित् दुःखित्वेन केषांचित् सुखित्वेनेत्येवंविधस्रष्टुब्रह्मकर्तृकत्वे कल्प्यमाने ब्रह्मणो वैषम्यनैर्घृण्यप्रसङ्गात् न जगत्कारणत्वमुपपद्यत इति प्राप्ते,

ब्रूमः। सृज्यमानप्राणिधर्माधर्मसापेक्षविषमसृष्टिप्रयुक्तवैषम्यनैर्घृण्यस्य ब्रह्मणि प्रसङ्ग.ाभावात् जगत्कर्तृत्वं ब्रह्मण उपपद्यत इति।।

(टि) इदानीं ब्रह्मणो रागद्वेषाभावात् विषमजगत्कारणत्वं न सम्भवतीत्याक्षिप्य समाधत्ते - ब्रह्मण इति ।।

।।निर्गुणस्यापि ब्रह्मणः प्रकृतित्वाधिकरणम् ।।

सू. सर्वधर्मोपपत्तेश्च।।

(मू) अत्र पुनरपि संशयः - किं ब्रह्मणो जगदुपादानत्वं सम्भवति नेति।

निर्गुणस्योपादानत्वादर्शनात् उपादानत्वं न सम्भवतीति प्राप्ते,

ब्रूमः। निर्गुणस्यापि विवर्तोपादानत्वसम्भवात् सम्भवत्येव ब्रह्मणो जगदुपादानत्वमिति। विवर्तोपादानत्वं च भ्रमाधिष्ठानत्वमिति बोध्यम्। तस्मात् ब्रह्मणो जगतः कर्तृत्वे उपादानत्वे च न कश्चिद् विरोध इति।।

।। इति शारीरके द्वितीयस्य प्रथमः पादः।।

।। इति स्मृतिपादः समाप्तः।।

(टि) एवं ब्रह्मणः कारणत्वविरोधिनः परैरुद्भावितान् दोषान् परिहृत्य सम्प्रति निर्विशेषत्वेऽपि मायाविशिष्टे ब्रह्मणि कारणत्वानुगुणानां सर्वगुणानामपि सम्भवादुपपन्नं कारणत्वमिति स्वपक्षपरिग्रहप्रधानं प्रकरणमुपसंहरति परपक्षप्रतिषेधप्रधानप्रकरणप्रारिप्सया अत्रेत्यादिना। निर्गुणस्येति। द्रव्यमेव सर्वत्र परिणममानमुपादानं दृष्टम्। तच्चापि सगुण मेव न निर्गुणमिति भावः। उपादानत्वं हि द्वेधा सम्भवति परिणामित्वं भ्रमाधिष्ठानत्वं तु निर्गुणेऽपि जात्यादौ दृश्यते गवयत्वे गोत्वभ्रमः शङ्खशुक्लत्वे पीतत्वभ्रम इत्याशयेनाह निर्गुणस्यापीत्यादिना। स्वपक्षस्थापनमुपसंहरति तस्मादित्यादिना।।

।। इति केरलीये षोडशाध्यायी

टिप्पणे चतुर्दशस्याध्यायस्य

।। अथ द्वितीयः पादः।।

।।प्रधानस्य जगद्धेतुत्वाभावाधिकरणम्।।

सू. रचनानुपपत्तेश्च नानुमानम् ।।

यदुक्तं साङ्ख्यैरचेतनं जगदुपादानं तच्च स्वभावादेव विचित्रजगदात्मना विवर्तत इति प्रधानस्य जगदुपादानत्वमिति तत् किं प्रमाणमूलमुत भ्रान्तिमूलमिति संशयः।

तत्र सुखदुःखमोहात्मकं कार्यं जगत् सुखदुःखमोहात्मक-प्रधानोपादानसुखदुःखमोहात्मकान्तिततत्वात् यत् यदुपादानकं तत्तदात्मतान्वितं यथा घटादयो मृदुपादानका मृदात्मतान्विताः। तथा चेदं जगत् सुखदुःखमोहात्मान्वितं, तस्मात् सुखदुःखमोहात्मक-प्रधानोपादानकमेव जगदित्यनुमानप्रमाणमूलत्वात् प्रमाणमूलमेव प्रध ानस्य जगदुपादानत्वमिति प्राप्ते,

ब्रूमः। अचेतनस्य स्वातन्त्रयेण जगद्रचनासम्भवात् भ्रान्तिमूलमेतदिति।।

(टि) ।।श्रीः ।।

।। अथ चतुर्दशस्य द्वितीयः पादः ।।

एवं स्वपक्षं स्थापयित्वेदानीं परपक्षं दूषयति द्वितीयपादेन। तत्र पूर्वाधिकरणे ब्रह्मणि कारणत्वानुगुणा गुणाः सम्भवन्तीत्युक्तम्। अत्राधिकरणे प्रधाने तेषामसम्भव उच्यते। जगद्रःचनेति। प्रज्ञावद्भिः सम्भाविततमैः शिल्पिभिरपि मनसाप्यालोचयितुम- शक्यमिदं जगत् कथमचेतनं प्रधानं रचयेदिति भावः।

।। ब्रह्मणो विसदृशजगदुत्पत्तौ काणादीयऽदृष्टान्तसद्भावाधिकरणम् ।।

सू. महद् दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्।।

(मू) यस्तु वैशेषिकैः परमाणुकारणवादिभिः चेतनस्य ब्रह्मणो जगदुपादानत्वे जगतोऽपि चैतन्यप्रसङ्गः: कार्याणां कारणगुण-समानजातीयगुणवत्वनियमात् तस्मान्न ब्रह्म चेतनं जगदुपादानमिति ब्रह्मोपादानवादिनि विरोधः उद्भावितः । सोऽस्ति नेति संशयः।

तत्र कारणगुणानां कार्ये स्वसमानजातीयगुणारम्भकत्वनियमात् अस्ति विरोध इति प्राप्ते,

वैशेषिकमतेऽपि उक्तनियमाभावात् नास्ति विरोध इति। तथाहि - तैरप्यणुपरिमाणैः परमाणुभिर्वा द्व्यणुकैर्वा महत्परिमाणं त्र्यणुकमारभ्यते इत्यभ्युपगमादिति । ततश्च यथा तन्मते अणुपरिमाणेभ्यो महत्परिमाणजनने न विरोधः तथाचेतनादचेतन-जननेऽपि न विरोध इति।

(टि) इदानीं जगति कार्ये चैतन्यगुणदर्शनान्न ब्रह्मचेतनं जगदुपादानमिति वैशेषिकमतमाशङ्क्य परिहरति - यस्त्विति। द्व्यणुकैर्वेति। सर्वथाव्यभिचार इत्यनावस्थया पक्षद्वयोक्तिरिति द्रष्टव्यम्।।

।।परमाणुकारणवादनिराकरणाधिकरणम्।।

सू. उभयथापि कर्मातस्तदभावः

(मू) यत्तु वैशेषिकैरुक्तं परमाणुभिः संयोगसहकृतैर्जगदुत्पद्यत इति तदेतत् परमाणूनां जगदुपादानत्वं प्रमाणमूलमुत भ्रन्तिमूलमिति।

तत्र त्र्यणुकावयवः सावयवः महदारम्भकत्वात् घटवदित्यनुमानप्रमाणमूलत्वात् प्रमाणमूलमेवेति प्राप्ते,

ब्रूमः। अचेतनानां स्वतः क्रियासम्भवात् भ्रान्तिमूलत्वमिति। तथाहि–प्राक् निश्चलयोः परमाण्वोः सृष्टिकाले क्रिया जन्यते । तया च संयोगे जाते द्रव्यणुकादिक्रमेण जगदुत्पत्तिरिति हि तेषां मतम्। तत्र क्रियाया निमित्तस्य वक्तृमशक्यत्वात् क्रियासम्भवः ततश्चाचेतनस्य क्रिया न सम्भवतीति। इदं तु बोध्यम् – यदि परमाण्वोः सर्वात्मना संयोगः तदा महत्त्वं नोत्पद्यते। अथैकदेशावच्छेदेन तदा सावयवत्वप्रसङ्ग. इति भ्रान्तिमूल एवाणुकारणत्ववाद इति।।

(टि) एवं स्वपक्षे वैयोषिकोक्तदूषणं परिहृत्येदानीं तदभिमतपरमाणुकारणत्वं निराचष्टे – यत्त्विति। निमित्तस्य वक्तुमशक्यत्वादिति।

अयमाशयः – नहि क्रियानिमित्तं नोदनाभिघातादिकं न सृष्टेः प्रागसम्भवतीति सर्वसंमतम् । ईश्वरस्य चिकीर्षा हि निमित्तमिति ते मतं, तदपि न सम्भवति। तस्या नित्यत्वेन निमित्तत्वासम्भवात्। अनित्यत्वे तु त्वत्सिद्धान्तविरोधादिति। भ्रान्तिमूल इति। निर्युक्तिकं पूर्वापरविरुद्धं च वैशेषिकादिशास्त्रमिति। तत्र जगत्कारणत्वे प्रमाणमिति भावः।।

।।वैनाशिकखण्डने समुदायासिद्ध्यधिकरणम्।।

स. समुदाय उभयहेतुकेऽपि तदप्राप्तिः ।।

(मू) चत्वारो बौद्धाः वैभाषिकः सौत्रान्तिकः विज्ञानवादी शून्यवादी चेति। तत्र वैभाषिक सौत्रान्तिको सर्वास्तित्ववादिनौ। इत्थं हि तयोर्मतम् – पृथिव्यादिचतुष्टयपरमाणुहेतुको बाह्यसमुदायः रूपविज्ञानवेदनासंज्ञासंस्काराख्यपञ्चस्कन्धहेतुक आध्यात्मिकसमुदायः।

तदेतत्परमाणुसमुदायस्कन्धसमुदायोभयसमुदायात्मकं जगदिति।

तन्मतं किं प्रमाणमूलमुत भ्रान्तिमूलमिति संशयः।

तत्र प्रत्यक्षानुमानप्रमाणमूलत्वात् प्रमाणमूलमिति प्राप्ते,

ब्रूमः। समुदायिनां परमाणुस्कन्धानामचेतनानां स्वतस्समुदायभावापत्त्यनुपपत्तेः भ्रान्तिमूलमिति। इदं त्ववधेयम् – तन्मते चेतनं क्षणिकं तस्य क्षणिकत्वात् न संहन्तृत्वम्। अचेतनानां तु अचेतनत्वादिति संहन्तुरभावादुभयसङ्घातात्मकं जगदिति मतं भ्रान्तिमूलमेवेति।।

(टि) एवमर्धवैनाशिकमतं निराकृत्य सर्ववैनाशिकस्य बौद्धस्य मतं निराकरोति चत्वार इत्यादिना।।

।। विज्ञानवादनिराकरणाधिकरणम्।।

सू. नाभाव उपलब्धेः ।।

(मू) आलयविज्ञानातिरिक्तो बाह्यपदार्थो नास्तीति विज्ञानवादिनो योगााचारस्य मतम्। तत् किं प्रमाणमूलमुत भ्रान्तिमूलमिति संशयः।

तत्र जाग्रत्प्रत्यया निरालम्बनाः प्रत्ययत्वात् स्वप्नप्रत्ययवदिति अनुमानप्रमाणमूलत्वात् प्रमाणमूलमितिप्राप्ते,

ब्रूमः। अनुमानस्य स्तम्भोऽयमित्यादिप्रत्यक्षबाधितत्वात् भ्रान्तिमूलमिति। एतेन शून्यवादिमतमपि निरस्तमिति बोध्यम्।।

(टि) एवं वैभाषिकसौत्रान्तिकयोः सालम्बनविज्ञानवादिनोर्मतं निराकृत्य निरालम्बनवादं निराकरोति आलयेति। प्रत्यक्षबाधितत्वादिति। अस्त्येव हि जगतो व्यावहारिकसत्यत्वमित्यभिप्रायः। एतेनेति प्रत्यक्षबाधेनेत्यर्थः।।

।। आर्हतानां सप्तभङ्गीनिराकरणाधिकरणम् ।।

सू. नैकस्मिन्नसम्भवात् ।।

(मू) देहपरिमाणो जीवः सर्वेषां पदार्थानामस्तित्वं नास्तित्वं चेति दिगम्बरस्यार्हतस्य मतम्।

तत् किं प्रमाणमूलमुत भ्रान्तिमूलमिति संशयः।

तत्र घटस्सन् घटोऽसन्नित्यादि प्रत्यक्षप्रमाणमूलत्वात् प्रमाणमूलमेवेति प्राप्ते,

ब्रूमः। जीवस्य देहपरिमाणत्वान्नित्यत्वस्य एकस्मिन् वस्तुनि विरुद्धधर्माणां चासम्भवात् भ्रान्तिमूलत्वमिति। आर्हतमते सप्त पदार्थाः संक्षेपेण जीवाजीवाविति द्वौ पदार्थौ ।।

(टि) एवं मुक्तकच्छमतं निराकृत्य मुक्ताम्बरमतं निराकरोति - देहपरिमाणेति। सप्तपदार्था इति। तन्मतविवेचनं नातीवोपयुज्यत इति दिङ्मात्रमुक्तमिति।।

।। तटस्थेश्वरवादनिराकरणाधिकरणम्।।

सू. पत्युरसामञ्जस्यात्।।

(मू) ईश्वरः केवलं कर्तैव नोपादानमिति माहेश्वरमतम्।

तत् किं प्रमाणमूलकं उत भ्रान्तिमूलमिति संशयः।

तत्र ईश्वरः कर्तैव एकस्य उभयत्वविरोधात् इत्यनुमानप्रमाणमूलत्वात् प्रमाणमूलमिति प्राप्ते।

ब्रूमः। कुलालादिदृष्टान्तकल्पितेश्वराभ्युपगमे ईश्वरस्य रागादिदोषप्रसङ्गात् भ्रान्तिमूलमिति। सिद्धान्ते तु श्रुत्यनुसारेण कल्पनान्न दोष इति बोध्यम्।

माहेश्वराश्चत्वार: शैवा: पाशुपता: कालसिद्धान्तिन: कापालिकाश्चेति। तन्मते कार्यकारणयो: विधिदु:खान्ता इति पञ्च पदार्थ:।।

(टि) एवं लुञ्छितकेशमतं निराकृत्य जटाधारिमतं निराकरोति - ईश्वर इति। माहेश्वरमतस्यापि पूर्ववद् दिङ्मात्रं दर्शयति माहेश्वरा इत्यादिना ।।

।। जीवोत्पत्तिवादनिराकरणाधिकरणम्।।

सू. उत्पत्त्यसम्भवात् ।।

(मू) वासुदेव ईश्वर एव जगदुपादानं निमित्तं च तस्मात् सङ्कर्षणाख्यो जीवो जायते तस्मात् प्रद्युम्नाख्यं मन: तस्मादनिरुद्धाख्योऽहङ्कार इति वासुदेवादय: चत्वार: पदार्था इति पाञ्चरात्राणां भागवतानां वैष्णवानां मतम् । तत् किं प्रमाणमूलमुत भ्रान्तिमूलमिति संशय:।

तत्र श्रुत्याविरुद्धार्थाङ्गीकारात् प्रमाणमूलमिति प्राप्ते,

ब्रूम:। जीवस्योत्पत्त्यभिधानात् भ्रान्तिमूलमिति। तत्र श्रुत्यविरुद्धांशे प्रामाण्यमिष्टं जीवोत्पत्त्यंशे तु भ्रान्तिमूलत्वमिति बोध्यम्। तस्मात् प्रधानादिकारणवादानां भ्रान्तिमूलत्वात् निर्दोषो ब्रह्मणि समन्वय इति सिद्धम्।।

।। इति श्रीशारीरके द्वितीयाध्यायस्य ।।
।। द्वितीय: पाद:।।

(टि) माहेश्वरमतं निराकृत्याधुना वैष्णवमतं निराकरोति - वासुदेव इति। परमात्मकत्वमुपसंहरति - तस्मादित्यादिना।।

।। इति केरलीये षोडशाध्यायीटिप्पणे ।।

।। चतुर्दशाध्यायस्य ।।

।। द्वितीय : पाद: ।।

।। श्री: ।।

।।अथ द्वितीयाध्यायस्य तृतीय: पाद: ।।

।।आकाशस्य ब्रह्मजन्यताधिकरणम् ।।

सू. न वियदश्रुते: ।।

(मू) तैत्तिरीयके "ब्रह्मविदाप्नोति परमि"त्युपक्रम्य "तस्माद्वा एतस्मादात्मन आकाश: सम्भूत: आकाशद्वायु: वायोरग्नि: अग्नेराप: अद्भय: पृथिवी पुथिव्या ओषधय: ओषधीभ्योऽन्नं अन्नात् पुरुष" इति आकाशादिपञ्चभूतानां ओषध्यन्तदेहानां सृष्टिराम्नाता। छान्दोग्ये षष्ठाध्यायेद्वितीयखण्डे "सदेव सोम्ये"त्युपक्रम्य" तत्तेजोऽसृजत तदपोऽसृजत ता अन्नमसृजन्ते"ति तेजोऽबन्नानामेव सृष्टिराम्नाता ।

तत्र संशय: - किमाकाशस्योत्पत्तिर्नास्ति श्रुतिविरोधश्चास्ति उताकाशस्योत्पतिर्नास्ति। नच श्रुतिविरोध: अथ आकाशस्योत्पत्तिरस्ति श्रुतिविरोधश्च नास्तीति छान्दोग्यवाक्यस्य आकाशं वायुं च सृष्ट्वेति तैत्तिरीयकानुरोधेन विपरिणामकल्पनासम्भवादिति। तत्र बृहदारण्यके चतुर्थेऽध्याये चतुर्थे ब्राह्मणे "वायुश्चान्तरिक्षं चैतदमृतमिति श्रवणात् नाकाशस्य उत्पत्ति: छान्दोग्ये (छान्दो) तैत्तिरीयादि सृष्टिश्रुतिविरोधश्चास्तीति चेत्, उच्यते, आकाशस्योत्पत्तिरिति यत् तत् तथैवेति श्रुतिविरोधश्च नास्ति।" आकाशस्सम्भूत" इत्यत्र सम्भूतशब्दस्य गौणत्वादिति प्राप्ते,

ब्रूम:। आकाशस्य नित्यत्वे एकविज्ञानेन सर्वविज्ञान-

विरोधप्रसङ्ग.ात् अस्त्येवाकाशस्योत्पत्तिः छान्दोग्येत्याद्युक्तरीत्या नास्ति श्रुतिविरोध इति। तस्मादमृत्वश्रुतिरापेक्षिकीति बोध्यम्।।

(टि) ।।श्रीः।।

।। अथ चतुर्दशस्य तृतीयः पादः।।

एवं परपक्षाणां परस्परविप्रतिषेधादनपेक्षत्वे प्रदर्शिते श्रुतीनामपि परस्परविप्रतिषेधादुपेक्ष्यत्वेन स्वमतमप्यनुपपन्नमित्याशङ्क्.त्य परिहरति तृतीयचतुर्थपादाभ्याम् । तत्र तृतीयपादस्य पूर्वार्धेन पञ्चमहाभूतश्रुतीनां परस्परविरोधः परिह्रियते। उत्तरार्धेन तु जीवश्रुतीनां चतुर्थपादेन प्राणादिश्रुतीनामिति। गौणत्वादिति। यथा लोके आकाशो जायत इति यथा वा त्वं जात इति ब्रह्मणो जनिश्रुतिरौपाधिकी तथेहापि सत्ताश्रयत्वगुणयोगात् सम्भूतशब्दो गौण इति भावः। आपेक्षिकीति। तेजआद्यपेक्षया चिरकालस्थायित्वादापेक्षिकत्वोक्तिरिति।

।। वायोर्ब्रह्मजन्यत्वाधिकरणम्।।

सू. एतेन मातरिश्वा व्याख्यातः।।

(मू) किं वायोरुत्पत्तिर्नास्ति श्रुतिविरोधश्चास्ति उत उत्पत्तिर्नास्ति श्रुतिविरोधोऽपि नास्ति अथवा उत्पत्तिरिति श्रुतिविरोधश्च नास्तीति तत्र संशयः।

तत्रपूर्वाधिकरणपूर्वपक्षन्यायात् उत्पत्तिर्नास्ति श्रुतिविरोधश्चास्तीति चेत्। उच्यते। पूर्वाधिकरणद्वितीयपक्षन्यायात् उत्पत्तिर्नास्ति नापि श्रुतिविनोध इति। एवं प्राप्ते,

ब्रूमः। पूर्वन्यायात् उत्पत्तिरस्ति श्रुतिविरोधश्च नास्ति इति। संवर्गविद्यादिषूपास्यतयोपायार्थं जातेर्महाभगत्वादिश्रवणात् नित्यत्वशङ्क.ा स्यात् तन्निराकरणार्थमिदमधिकरणम्।।

(टि) एवमाकाशस्योत्पत्तिं प्रसाध्येदानीं वायोरुत्पत्तिं साधयति। गतार्थतामाशङ्क्याह संवर्गेत्यादिना।

।। सद्ब्रह्मणोऽजन्यत्वाधिकरणम् ।।

सू.असम्भवस्तु सतोऽनुपपत्तेः ।।

(मू) किं ब्रह्मणोऽपि कुतश्चिदुत्पत्तिरस्ति ततश्चा...त्वं जातो भवसि विश्वतो मुखेति"श्रुत्या..."न चास्य कश्चिज्जनितेत्यादिकानां ब्रह्मणो नित्यत्वप्रतिपादकश्रुतीनां विरोधः उत नोत्पत्तिः ततश्च जन्मश्रुतेरौपाधिकत्वात् विरोध इति।

तत्र वाय्वादिवदाकाशस्यापि विकारादेवोत्पत्तेः न्याय्यत्वात् ब्रह्मणोऽपि कुतश्चिदुत्पत्तिः ततश्च श्रुतिविरोध इति प्राप्ते,

ब्रूमः। अनवस्थाप्रसङ्गात् न ब्रह्मण उत्पत्तिः ततश्चोक्तरीत्या न विरोध इति।।

(टि) असम्भाव्यमानजन्मनोर्वियत्पवनयोरुत्पत्तिं श्रुत्वा ब्रह्मणोऽपि वियदादिवत् कारणत्वात् उत्पत्तिः स्यादिति सम्भावनापनोदनाये-दमधिकरणमारभ्यते। औपाधिकत्वादिति। जात इत्यस्य मायोपहितस्सन् जात इत्यर्थ इति भावः।

।। तेजसो ब्रह्मजन्यत्वाधिकरणम् ।।

सू. तेजोऽतस्तथा ह्याह ।।

(मू) किं ब्रह्मणः तेज उत वायोरिति संशयः। छान्दोग्ये "तत्तेजोऽसृजते"ति ब्रह्मणः तेज उत्पत्तिश्रवणात् ब्रह्मण उत्पद्यत इति प्राप्ते,

ब्रूमः। तैत्तिरीयके "वायोरग्निरि"ति वायोरपादानत्वश्रवणत् वायोरेव तेज उत्पद्यत इति। छान्दोग्यश्रुतै परम्परया ब्रह्मजत्वपरत्वेऽप्यविरोधः। तैत्तिरीयकश्रुतौ तु वायोरित्यपादानत्वश्रवणस्य श्रूयमाणस्य कमापदेशपरत्वकल्पनमन्याय्यमिति विशेषः वायोरपि विकारत्वेन उपादानत्वसम्भवात् ब्रह्मजन्यत्वमेव तेजस इति न श्रुतिविरोध इति एकदेशिमतमिति बोध्यम्।।

(टि) इदानीं तेजोवन्मनो विप्रतिषेधमाशङ्क्य निराचष्टे किं ब्रह्मण इति।

।। अपां ब्रह्मजन्यत्वाधिकरणम् ।।

सू. आपः।।

(मू) किमापो ब्रह्मणो जायन्ते उत तेजस इति संशयः। अत्राप्तेजसोर्विरुद्धस्वभावयोः जन्यजनकत्वभावासम्भवात् आपो ब्रह्मण एव जायन्त इति प्राप्ते,

ब्रूमः। "तदपोऽसृजते"ति छान्दोग्ये "अग्नेराप" इति तैत्तिरीयके च तेजस एवाबुत्पत्तिश्रवणात् तेजस एवापोऽजायन्त इति। न त्वपञ्चीकृताप्तेजसोः विरोधे प्रमाणमस्ति अविरोधे च श्रुतिरेव प्रमाणमिति बोध्यम्।"अग्नेराप" इत्यत्र गौणत्वं स्यात् विरोधसत्वादिति शङ्कानिरासार्थं चेदमधिकरणम्"

(टि) इदानीमनन्तरनिर्दिष्टात्तेजसोऽपां सम्भवमाह किमाप इति। पूर्वपक्षं निराकरोति न त्वित्यादिना अपञ्चीकृतानां भूतानामतीन्द्रियत्वान्न प्रत्यक्षं प्रमाणम्। अत एव नानुमानादिकमपीति भावः। अतीन्द्रिये वस्तुनि श्रुतिरेव प्रमाणं नान्यदिति निर्विवादमित्याशयेनाह- अविरोध इति। नन्वत्र श्रुतिविसंवादाभावात् व्यर्थमिदमधिकरणमित्या- शङ्क्याह अग्नेरित्यादिना।।

।। पृथिवीमास्यान्नशब्दवाच्यताधिकरणम् ।।

सू. पृथिव्यधिकाररूपशब्दान्तरेभ्य:।।

(मू) "ता अन्नमसृजन्ते"त्यत्र संशय: - किमत्रान्नशब्देनाभ्यवहार्थमोदनमुच्यते तत"श्चाद्भ्य: पृथिवी"त्यनया तैत्तिरीयकश्रुत्या विरोध उत पृथिवी ततो न विरोध इति।

तत्र प्रसिद्धत्वादोदनाद्युच्यते ततश्च विरोध इति प्राप्ते,

ब्रूम:। "तत्तेजोऽसृजत तदापोऽसृजते"ति महाभूतादधिकारानुरोधात् अन्नशब्देन पुथिव्येवोच्यते। ततश्छान्दोग्यतैत्तिरीयकश्रुत्यो:न विरोध इति।।

(टि) इदानीमप्कार्यत्वेन श्रुतस्यान्नस्य पृथिवीत्वं साधयति ता इत्यादिना। अधिकारानुरोधादिति। अधिकारात् प्रसिद्धिर्बाध्यते अन्यथोपचारकथानुच्छेदापत्तेरिति भाव:। पृथिवीति। कार्यकारणयोरभेदोपचारात् कार्यवाचिनां न शब्देन कारणं पृथिव्युच्यत इति भाव:।।

।।सोपाधिकब्रह्मण एव कार्यकारणत्वाधिकरणम्।।

सू. तदभिध्यानादेव तु तल्लिङ्ग.ात् स:।।

(मू) किमाकाशादीनि स्वयमेव स्वविकारात् वायूवादीन् सृजन्ति ततश्चाकाशाद्वायुरित्यादीनां भौतिकसृजिकर्तृत्वप्रतिपादकश्रुतीनां ब्रह्मण: सर्वसृष्टिकर्तृत्वप्रतिपादकश्रृत्या विरोध उत परमात्मैव तेन तेन रूपेणावतिष्ठमान: तत्तद्विकारजातं सृजति ततश्च न विरोध इति।

तत्र भूतानां स्वकार्यसृष्टौ स्वातन्त्र्येण श्रवणात् आकाशादीनि स्वयमेव सृजन्ति ततश्च उक्तश्रुतिविरोध इति प्राप्ते,

ब्रूमः। बृहदारण्यके पञ्चमाध्याये सप्तमे खण्डे अन्तर्यामिब्राह्मणे "पृथिव्यां तिष्ठन् पृथिवीमन्तरोऽयमयती"त्यादिना सर्वनियन्तृत्वरूपपरमात्मलिङ्ग.स्य श्रुतत्वात् परमात्मैव तेन तेन रूपेणावतिष्ठमानः सृजति। ततश्च न श्रुतिविरोध इति।।

(टि) इदानी पूर्वपूर्वकार्यत्वश्रवणादुत्तरोत्तरभूतानां न ब्रह्मकारणत्वमिति शङ्क.ा स्यात्। तां निराकर्तुमिदमधिकरणमारभ्यते। किमाकाशदीनीति। न श्रुतिविरोध इति। अयमाशयः - यत्रैकतरोपादानेऽन्यतरस्य बाधस्तत्र यदि धर्ममात्रबाधेनोभयोर्वात्यन्तबाधो भवति तदा धर्ममात्रबाधकल्पनं युक्तम्। इह च पञ्चमीश्रुत्या वियदादिभूतानां स्वतन्त्र्यमवगम्यते। एवकारश्रुत्या च ब्रह्मणस्तत्र यद्येकतरस्वातन्त्र्यं गृह्येत तदान्यतरस्य अत्यन्तबाधः। तस्मादेकतरात्यन्ताबाधाय नैरपेक्ष्यरूपधर्म मात्रबाधकल्पनं युक्तमिति।।

।। लयक्रमनिरूपणाधिकरणम्।।

सू.विपर्ययेण क्रमोऽत उपपद्यते च ।।

(मू) किमनियतेन क्रमेण भूतानां लयः किमुत्पत्तिक्रमेण अथवा उत्पत्तिविपरीतक्रमेणेति संशयः

तत्र विशेषाश्रवणादनियतेनेति चेत् उच्यते। लयस्य क्रमापेक्षायां उत्पत्तिक्रमस्य श्रुतत्वात् उत्पत्तिक्रमेणेति प्राप्ते,

ब्रूमः। सोपानावरोहन्यायात् विपरीतक्रमेण लय इति। तथाहि - येन क्रमेण सोपानमारोहति तद्विपरीतेनावरोहतीति लोकप्रसिद्धमिति।।

(टि) एवं सृष्टिक्रममुक्त्वाधुना लयक्रम उच्यते। किमनियतेनेति। श्रुतत्वादिति। क्लृप्तकल्प्ययोः क्लृप्तो बलीयानिति भावः। किञ्च वैशेषिकदर्शनमप्यत्र प्रमाणमिति बोध्यम्। विपरीतक्रमेणेति। स्थितायामेव मृत्तिकायां घटो नश्यते न तु नष्टायामिति भावः। यत्तु क्लृप्तेति, तन्न, अस्यापि स्मृतौ क्लृप्तत्वात् ।

"जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते।
ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते।।"

इति । वैशेषिकमतं तु उत्पत्ताविव लयेऽप्यप्रमाणमिति।।

।। प्राणादिसृष्टौ क्रमनिरूपणाधिकरणम्।।

सू. अन्तरा विज्ञानमनसी क्रमेण
तल्लिङ्गादिति चेन्नाविशेषात् ।।

(मू) आथर्वणे मुण्डकोपनिषदि उत्पत्तिप्रकरणे तृतीये "तथाक्षरा द्विविधाः सौम्यभावः प्रजायन्त" इत्युपक्रम्य श्रूयते -

"एतस्माज्जायते प्राणो मनस्सर्वेद्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वधारिणी।।"

इति। अत्र आकाशादिभूतोत्पत्तेः प्राक् प्राणादिकरणोत्पत्तिः श्रूयते।

तत्र संशयः - किं भैतिकत्वात् करणसृष्टिक्रमेण भूतोत्पत्तिलयक्रमो न विरुध्यत इति। एतस्मादित्युदाहृतश्रुतिस्तु न क्रमपरा "आकाशाद्वायुः वायोरग्नि"- रित्यादाविवात्र क्रमाप्रतीतेरिति। तस्मात्र केनापि वाक्येन भूतसृष्टिवाक्यानां विरोध इति स्थितम्।।

(टि) इदानीमभिहितभूतोत्पत्तिलयक्रमस्य करणसृष्ट्या बाधमाशङ्क्य परिहरति। क्रमभेदेति। अत्र ह्यात्मनः सकाशात्

प्राणः ततो मनः तत इन्द्रियाणि तत आकाशादीनि भूतानि। तैत्तिरीयादौ तु भूतानां प्राथम्यमिति क्रमभेद इति भावः। न क्रमपरेति। सर्वेषामात्मनः सकाशादुत्पत्तिमात्रमियं श्रुतिर्वदति न क्रममपि। "न ह्येतस्माज्जायते प्राणः प्राणा,न्मनः मनस इन्द्रियाणि इन्द्रियेभ्यः खमि"त्यादि श्रूयते येन क्रमपरा स्यादिति भावः। सृष्टिप्रकरणमुपसंहरति तस्मादित्यादिना।।

।। जीवस्य जन्ममरणराहित्याधिकरणम् ।।

सू. चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो
भोक्तुस्तद्भावभावित्वात् ।।

(मू) किं जीवस्योत्पत्तिलयौ स्तो न वेति संशयः। तत्र लोकव्यपदेशानुगृहीतजननिमित्तजातेष्टिजातकर्मादि विधानात् स्तो जीवस्योत्पत्तिलयाविति प्राप्ते ।

ब्रूमः। छान्दोग्ये षष्ठेऽध्याये एकादशे खण्डे जीवापेतं वाव म्रियते न जीवो म्रियत" इति श्रवणात् न जीवस्य (उत्पत्ति) लयाविति। शरीरोत्पत्त्यादिनिमित्तमेव जातेष्ट्यादि-विधानमन्वयव्यतिरेकाच्च शरीरस्यैव उत्पत्तिनाशाविति निश्चीयते। तस्मान्न जातेष्ट्यादि जीवनित्यत्वश्रुंत्योर्विरोध इति।

(टि) एवं नवभिरधिकरणैः पञ्चमहाभूतश्रुतीनां विरोधं परिहृत्यथाष्टभिरधिकरणैर्जीवश्रुतिविरोधः परिह्रियते । तत्र भोग्यवर्गस्योद्भवमुक्त्वा भोक्तुरुद्भवं निराकरोति किं जीवस्येत्यादिनाधिकरणद्वयेन ।लोकव्यपदेशेति। लोके हि देवदत्तो जातो मृतश्चेति व्यपदिश्यते देवदत्तश्च जीवो न शरीरमात्रमिति भावः। अत्रापि श्रुतिविरोधः परिहृत इति दर्शयन्नाह-तस्मादिति।।

।। जीवस्य नित्यत्वाधिकरणम्।।

सू. नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः।।

(मू) किं कल्पादौ आकाशादिवत् जीवो ब्रह्मण उत्पद्यते उत ब्रह्मवन्नोत्पद्यत इति संशयः। तत्र यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेतस्मादात्मनः सर्वे प्राणा " इति प्राणादेः सृष्टिं शिष्ट्वा" "सर्व एव आत्मनो व्युच्चरन्ती"ति जीवसृष्टिश्रवणात् जीवोऽप्युत्पद्यत इति प्राप्ते,

ब्रूमः। छान्दोग्ये षष्ठेऽध्याये तृतीये खण्डे "अनेन जीवेनात्मानमनुप्रविश्ये"त्यादिना अविकृतस्यैव जीवभावेन कार्यानुप्रवेशश्रवणात् न जीवो ब्रह्मण उत्पद्यते नापि तत्र प्रलीयत इति उपाधिसम्बन्धादुत्पत्तिलयश्रवणम्। तस्मात् न जीवोत्पत्ति-श्रुत्यधिकृतब्रह्मानुप्रवेशश्रुत्योर्विरोध इति।।

(टि) एवं देहोत्पत्तौ जीवोत्पत्तिं निराकृत्याधुना सर्गादावित्यस्योत्पत्तिं निराचष्टे। उत्पत्तिलयश्रवणस्यालम्बनमाह - उपाधीति ।।

।। जीवस्य चिद्रूपत्वाधिकरणम् ।।

सू. ज्ञोऽत एव ।।

(मू) किं जीव आगन्तुकचैतन्यः स्वतोऽचेतनः उत नित्यचेतन-स्वरूप इति तत्र संशयः।

तत्र सुषुप्तिमूर्छितादीनां चैतन्यादर्शनात् आत्ममनस्संयोग-रूपागन्तुकचैतन्य एवेति प्राप्ते।

ब्रूमः। चैतन्यस्वरूपस्य ब्रह्मणो विकृतस्य जीवभावेन कार्यानुप्रवेशदर्शनादेव जीवो नित्यचैतन्यस्वरूप इति। सुषुप्त्यादीनां

तु विषयाभावादचेतनता न तु चैतन्याभावात्। अन्यथा "सुषुप्तोऽहमि" त्याद्यनुसन्धानाभावप्रसङ्गादिति। तस्माद्बृहदारण्यके षष्ठेऽध्याये तृतीये ब्राह्मणे पठितायाः "अत्रायं पुरुषः स्वयञ्ज्योतिर्भाती"त्यादि स्वयञ्ज्योतिष्ट्वश्रुतेः बृहदारण्यके तृतीयेऽध्याये चतुर्थे ब्राह्मणे "पश्यंश्चक्षु"रित्याद्यागन्तुकज्ञानवत्वश्रुत्या न विरोधः आगन्तुकज्ञानवत्त्वश्रुतेः वृत्तिपरत्वादिति।।

(टि) एवमात्मनो नित्यत्वमुक्त्वाधुना चैतन्यस्यापि तत्स्वरूपतया नित्यतामाह - किं जीव इति। अनुसन्धानेति। एतेन सुषुप्तौ पुरीतति मनःप्रवेशात्तत्र च त्वचोऽभावेन त्वङ्मनो योगकारणाभावन्न ज्ञानं ज्ञानाभावदशैव सुषुप्तिः इति वैशेषिकमतमपास्तम्। सुषुप्तावात्मज्ञानाभावे कथं सुप्तोऽहमित्यनुसन्धीयते न ह्यज्ञातस्य वस्तुनोऽनुसन्धानं भवतीति।।

।।जीवस्य सर्वगतत्वाधिकरणम्।।

सू. उत्क्रान्ति गत्यागतीनाम्।।

(मू) किं जीवोऽणुपरिमाणः उत महापरिमाण इति संशयः।

तत्र मुण्डके पञ्चमे "एषोऽणुरात्मा चेतसा वेदितव्य" इति श्रवणात् परमाणुपरिमाणो जीव इति प्राप्ते,

ब्रूमः। बुहदारण्यके षष्ठेऽध्याये चतुर्थे ब्राह्मणे "स वा एष महानज आत्मा योऽयं विज्ञानमयाः प्राणेष्वि"त्यादि महापरिमाणत्वश्रवणात् जीवो महापरिमाण इति।अन्तःकरणौ-पाधिकाणुत्वादि। तस्मान्नाणुत्वमहत्वश्रुत्योर्विरोध इति।।

(टि) एवं जीवस्य कालतः परिच्छेदं निराकृत्येदानीं जगतः परिच्छेदं निराकारोति - किं तदिति।।

।। जीवस्य कर्तृत्वाधिकरणम् ।।

सू. कर्ता शास्त्रार्थवत्वात् ।।

(मू) किं बुद्धिः कर्त्री उत जीवः कर्तेति संशयः।

तत्र बुद्धेः परिणामयोगत्वात् बुद्धिः कर्ते (र्त्री) ति प्राप्ते,

ब्रूमः। प्रश्नोपनिषदि चतुर्थे प्रश्ने - "एष हि द्रष्टा श्रोता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुष" इति जीवस्य कर्तृत्वश्रवणात् जीवः कर्तेति।।

(टि) इदानीं नित्यत्वज्ञत्वादिजीवचिन्ताप्रसङ्गे.न तस्यैव कर्तृत्वं चिन्त्यते - किं बुद्धिरिति।।

।। जीवस्याध्यस्तकर्तृत्वाधिकरणम्।।

सू. यथा च तक्षोभयथा ।।

(मू) जीवस्य कर्तृत्वं स्वाभाविकमुतौपधिकमिति संशयः

तत्र स्वाभाविकत्वापवादकहेत्वभावात् स्वाभाविकमिति प्राप्ते,

ब्रूमः। दुःखरूपस्य कर्तृत्वस्य स्वाभाविकत्वे सति अनिर्मोक्षत्वप्रसङ्ग.ात् औपधिकत्वं कर्तृत्वमिति अन्तःकरणमेवोपाधिरिति। तस्मान्न कर्तृत्वासङ्ग.त्वबोधकश्रुत्योर्विरोध इति। इदं त्ववधेयम् बुद्धिधर्म एव कर्तृत्वं तत् जीवेऽध्यस्तरूपमस्तीति जीवस्य कर्तृत्वमिति।।

(टि) इदानीमुक्तस्य कर्तृत्वस्यास्वाभाविकत्वमाशङ्क्.य निराकरोति - किं तदिति। हेत्वभावादिति। अन्तःकरणान्वयव्यतिरेकस्तु कर्तृत्वोत्पत्ति निमित्तमात्रत्वेनाप्युपपन्नो न कर्तृत्वस्य स्वाभाविकत्वमपवदतीति भावः। विरोधाभावमेव प्रतिपादयति

इदं त्वित्यादिना । यथा स्फटिके लौहित्यं तद्वदिति भाव:।

।। ईश्वरस्य जीवप्रवर्तकत्वाधिकरणम् ।।

सू. परात्तु तच्छ्रुते:।।

(मू) यदिदमुपाधिमकृतं जीवस्य कर्तृत्वं तत् किमीश्वरमनपेक्ष्य भवति उतापेक्ष्येति संशय: ।

तत्रानपेक्ष्यैवेश्वरं रागद्वेषादिवशात् जीवस्य कर्तृत्वं भवतीति प्राप्ते,

ब्रूम:। एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य: उन्निनीषत" इति कर्तृत्वस्येश्वरायत्तत्वश्रवणात् ईश्वरापेक्षमेव कर्तृत्वमिति। विधिनिषेधसापेक्षेश्वरापेक्षं कर्तृत्वमिति।" ज्योतिष्टोमेन यजेत""ब्राह्मणो न हन्तव्य" इत्यादिविधिनिषेध शास्त्रेण " एष ही"त्यादिशास्त्रस्य न विरोध इति।।

(टि) इदानीं पूर्वोक्तौपाधिकमपि कर्तृत्वमीश्वराधीनमित्याह - यदिदमिति। रागद्वेषेति। यदीश्वर: कारयति तदा विधिनिषेधौ व्यर्थौ रागत: प्रवृत्तौ त्वविशोषावत् प्रवर्तमानं पुरुषमिष्टसाधने प्रवर्त्तयति विधिरनिष्टसाधनान्निवर्तयति प्रतिषेध इति तौ सार्थकाविति ताविह प्रमाणमिति भाव:। तयो: सार्थक्यमाह विधीत्यादिना।।

।। जीवेश्वरव्यवस्थाधिकरणम्।।

सू. अंशो नानाव्यपदेशादन्यथा चापि
दाशकितवादित्वमधीयत एके ।।

(मू) ईश्वरापेक्षं कर्तृत्वमित्युक्तम् । ततश्च जीवेश्वरयोरुपकार्योपकारकभाव: सिद्ध:। स च तयो: सम्बन्धं विना न सम्भवति।

तत्र संशयः किं स्वामिमृत्यत् स्वस्वामिभावः अग्निविष्फुलिङ्ग-वत् अंशांशिभावो वेत्यनियम उत स्वामिभृत्यवत् अथवा विष्फुलिङ्ग-वत् अंशांशिभावः स च कल्पित इति। तत्र विशोषाभावादनियम इति चेत् उच्यते। जीवेश्वरयोरीशित्रीशितव्यत्वात् स्वस्वामिभृत्यवदित्येवं प्राप्ते,

ब्रूमः। छान्दोग्ये अष्टमेऽध्याये सप्तमे खण्डे सोऽन्वेष्टव्य इत्येवंजातीयकस्य जीवेश्वरयोर्भेदस्य ब्रह्मदाशाब्रह्मदासा इत्येवंजातीयकस्य भेदस्य च दर्शनात् कल्पितांशांशिभाव-सम्बन्ध इति।

इदं त्ववधेयम् - अन्तःकरणावच्छिन्नं ब्रह्म अन्तः करणप्रतिबिम्बितं वा ब्रह्म जीवः। तस्मान्न ब्रह्मणः संसारित्वदुःखित्वादिप्रसाक्तिरिति। तस्मात् भोदाभेदश्रुत्योर्न विरोध इति वेदान्तानां ब्रह्मणि समन्वयो निर्दोष इति सिद्धम् ।।

।। इति श्रीशारीरकमीमांसायां द्वितीयस्य।।

।। तृतीयः पादः । वियत्पादः समाप्तः।।

(टि) इदानीं जीवेश्वरयोरंशांशिभावः सम्बन्ध इत्याह। तत्र सङ्ग.तिं दर्शयति ईश्वरेत्यादिना। "सोऽन्वेष्टव्य" इति। अन्वेष्टव्यस्य अन्वेषितुर्भेदः प्रसिद्ध इति भावः। ब्रह्मदाशा इति। दाशाः कैवर्ताः प्रसिद्धाः दासा भृत्याः ते सर्वे ब्रह्मैवेति हीनजन्तूदाहरणेन सर्वेषामेव नामरूपकृतकार्यकरणसङ्घातप्रविष्टानां जीवानां ब्रह्मत्वमनया श्रुत्या प्रतिपाद्यत इति भावः। कल्पित इति। अतो न ब्रह्मणः संसारित्वप्रसङ्ग इति भावः।

अत्रेदमवधेयम् - यद्यपि जीवब्रह्मणोर्वास्तवो भेदो नास्ति तथापि व्यवहारदशायामुपाधिकल्पितं भेदमाश्रित्य शास्त्राणि त्रेध

ा जीवं निरूपयन्ति अंशत्वेनावच्छिन्नत्वेन प्रतिबिम्बत्वेन चेति। तत्राद्यो यथा -

"ममैवांशो जीवलोको जीवभूत: सनातन:" इति स्मर्यते। श्रूयते च "पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवी"ति। अत्र भूतशब्देन जीवप्रधानानि स्थावरजङ्ग.मान्युच्यन्ते। यथा "अहिंसन् सर्वभूतान्यन्यत्र तीर्थेभ्य" इत्यत्र तथा पादशब्देन चांश उच्यत इति। द्वितीयो यथा -"स समानस्सन्नुभौ लोकौ सञ्चरतीत्यादि श्रूयते। तत्र विज्ञानमयस्य जीवस्य विज्ञानशब्दवाच्यया बुद्ध्या समानपरिमाणत्वनिर्देशात् घटाकाशवदवच्छिन्नत्वमाश्रितम्। तृतीयो यथा -

"एकधा बहुधा चैव दृश्यते जलचन्द्रवत्" इति । तदेतत् सकलमभिप्रेत्याह - इदं त्वित्यादिना। अधिकरणार्थमुपसंहरति - तस्मादिति। परमप्रकृतमुपसंहरति इतीत्यादिना।।

।। इति केरलीये षोडशाध्यायीटिप्पणे ।।

।। त्रयोदशस्याध्यायस्य तृतीय: पाद:।।

।। श्री:।।

।। अथ द्वितीयाध्यायस्य चतुर्थ: पाद:।।

।। इन्द्रियाणां परमात्मजन्यत्वाधिकरणम्।।

सू. तथा प्राणा:।।

चक्षुर्घ्राणं रसनं श्रोत्रं त्वगिति पञ्च ज्ञानेन्द्रियाणि। वाक्पाणि-पादपायूपस्था: पञ्च कर्मेन्द्रियाणि मनश्चान्तरिन्द्रियमिति एकादशेन्द्रियाणि। तेषामुत्पत्तिरस्ति न वेति संशय:।

"ऋषयो वाव तेऽग्रे असदासीत् तदाहु: के ते ऋषय इति

प्राणा वा ऋषय" इति प्राणानामिन्द्रियाणां प्रागुत्पत्तेः सद्भावश्रवणात् न तेषामुत्पत्तिरिति प्राप्ते,

ब्रूमः मुण्डके तृतीये -

"एतस्माज्जायते प्राणो मनस्सर्वेद्रियाणि च।।"

इति इन्द्रियाणामुत्पत्तिश्रवणात् अस्तीन्द्रियाणामुत्पत्तिरिति। सृष्टेः प्राक्प्राणसद्भावप्रतिपादकवाक्यं त्ववान्तरसृष्टिपरं अन्यथा एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाविरोधप्रसङ्ग.ात्।तस्मान्न सृष्टेः प्राक्सद्भावोपपत्तिश्रुत्योर्विरोध इति।।

(टि) ।।श्रीः।।

।। अथ त्रयोदशस्य चतुर्थः पादः।।

एवं कर्तृस्वरूपं निरूप्याधुना करणादि धर्मनिरूपणाय चतुर्थ पाद आरभ्यते। तत्रात्र करणानामुत्पत्तिः प्रतिपाद्यते। अवान्तरसृष्टिपरमिति। हिरण्यगर्भसृष्टेः प्राक् प्राणानां सद्भाव अनेन वाक्येन प्रतिपाद्यते इत्यर्थः।।

।। इन्द्रियाणामेकादशत्वाधिकरणम् ।।

सू. सप्त गतेर्विशेषितत्वाच्च।।

(मू) क्वचित् सप्त प्राणाः सङ्क.ीर्त्यन्ते क्वचिदष्ट क्वचिन्नव क्वचिद्दश क्वचिदेकादश क्वचिद् द्वादश क्वचित् त्रयोदश।

तत्र संशयः ' किमनियम उत सप्त अथवा एकादशेति।

तत्राविशेषादनियम इति चेत्। उच्यते, स्तोककल्पनानुरोधात् सप्तैव वृत्तिभेदापेक्षं च सङ्ख्यान्तरश्रबणमितीति प्राप्ते,

ब्रूमः।कार्यजातवशादेकादशैव । सङ्ख्यान्तरश्रवणं तु

अवान्तरभेदापेक्षं वा वृत्त्यपेक्षं वेति। तस्मान्नानासङ्ख्याश्रुति-विरोध इति।।

अथवा इन्द्रियाण्येव विषयः तानि किं सप्त उत एकादशेति संशयः। तथा बृहदारण्यके षष्ठाध्याये चतुर्थे ब्राह्मणे श्रूयते - "तमुपका { का } मन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा उत्क्रामन्ती"ति। अत्र प्रकृतानां चक्षुरादीनां सप्तानामेव उत्क्रान्तिश्रवणात् सप्तेति प्राप्ते,

ब्रूमः। "दशेमे पुरुषे प्राणा आत्मैकाशस्ते यदस्मात् शरीरादुत्क्रामन्ती"त्येकादशानामुत्क्रान्तिश्रवणात् एकादशेति। अत्रात्मशब्देन मन उच्यते । सर्वे प्राणा इत्यत्रापि सर्वशब्देनैकादशानां ग्रहणान्नास्ति विरोध इति।।

(टि) इदानीं करणानां सङ्ख्या निर्णीयते । क्वचिदिति। कार्यवशादिति। अत्र भाष्यम् - शब्दस्पर्शरूपरसगन्धविषयाः पञ्च बुद्धिभेदास्तदर्थानि पञ्च बुद्धीन्द्रियाणि वदनादान-विहरणोत्सर्गानन्दनाः पञ्च कर्मभेदास्तदर्थानि पञ्च कर्मेन्द्रियाणि सर्वार्थविषयं त्रैकाल्यवृत्ति मन एकमनेकवृत्तिकमिति। वर्णकान्तरमारचयति अथवेत्यादिना।।

।। इन्द्रियाणामणुत्वाधिकरणम्।।

सू. अणवश्च।।

(मू) किमिन्द्रियाणि विभूनि उत परिच्छिन्नपरिमाणानीति संशयः।

तत्र प्राणाः सर्वे अनन्ता इति विभुत्वश्रवणात् विभूनीति प्राप्ते,

ब्रूमः। उत्क्रामन्ति गत्यागत्योश्च श्रवणात् परिच्छिन्नानि

मध्यमपरिमाणानीद्रियाणीति। अनन्तत्वश्रुतेरुपासनापरत्वान्न विरोध इति।।

(टि) एवं करणानां कालतः परिच्छेदमभिधायाधुना देशतः परिच्छेदमाह - किमिन्द्रियाणीति।।

।। प्राणस्य जन्यताधिकरणम्।।

सू. श्रेष्ठश्च।।

(मू) किं मुख्यप्राणस्य जन्मा नास्ति उतास्तीति संशयः। तत्र नासदासीये "आनीदवातमि"ति प्रागुत्पत्तेः प्राणास्तित्वप्रतिपादनात् नास्ति प्राणस्य जन्मेति प्राप्ते,

ब्रूमः। मुण्डके तृतीये "एतस्माज्जायते प्राणः" इति मुख्यप्राणसृष्टिश्रवणात् अस्ति जन्मेति। अवातमिति विशेषणात् आनीच्छब्दः कारणसद्भावप्रतिपादनपरः न तु प्राणसद्भावप्रतिपादनपरः। अतो न विरोध इति।एतद्विरोधाशङ्कानिरासार्थमेवेदमधिकरणमिति।।

(टि) एवमिन्द्रियाणि निरूप्येदानीं प्राणस्योत्पत्तिमाह - किं मुख्येति। अनिदिति। प्राणोऽभूदित्यर्थः।।

।।प्राणस्य तत्त्वान्तरताधिकरणम्।।

सू. वायुक्रिये पृथगुपदेशात् ।।

(मू) किं प्राणो वायुरेव अथवा इन्द्रियव्यापरः उत वायुविशेष इति संशयः।

तत्र ऐतरेये तृतीयेऽध्याये तृतीयखण्डे "यः प्राणः स वायुरि"ति श्रवणात् वायुरेवेति चेत्। उच्यते, "सामान्याकरणवृत्तिः

प्राणाद्या वायवः पञ्चे"ति साङ्ख्यदर्शनादिन्द्रियव्यापरः प्राणइत्येवं प्राप्ते,

ब्रूमः। छान्दोग्ये तृतीयेऽध्याये अष्टादशे खण्डे "प्राण एव ब्रह्मणः चतुर्थः पादः स वायुना ज्योतिषा भाती"ति वायोः, मुण्डके तृतीये "एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च"इति इन्द्रियेभ्यश्च प्राणस्य पृथगुपदेशात् न वायुरिन्द्रियवृत्तिर्वा प्राणः किंतु वायुविशेष इति। यः प्राणः स वायुरित्यत्र वायुरेवायं अध्यात्ममापन्नः पञ्चव्यूहः प्राण इति वायुविशेषपर एव वायुशब्दः स एष वायुः पञ्चविधः प्राणोऽपानो व्यान उदानः समान इति वाक्यशेषात्। तस्मान्न विरोध इति।।

(टि) इदानीं प्राणस्य स्वरूपं चिन्त्यते - किं प्राण इति।वायोरिन्द्रियेभ्यश्च पृथगुपदेशादित्यन्वयः। वायुविशेष इति। विशेषमेव दर्शयन् श्रुतिं व्याचष्टे य इत्यादिना ।।

।। प्राणस्याणुत्वाधिकरणम्।।

सू. अणुश्च ।।

(मू) किं प्राणो विभुः उत परिच्छिन्न इति संशयः।

तत्र बृहदारण्यके तृतीयेऽध्याये तृतीये ब्राह्मणे - "सम एभिः त्रिभिर्लोकैः समोऽनेन सर्वेणेति प्राणस्य विभुत्वश्रवणात् विभुरिति प्राप्ते,

ब्रूमः। बृहदारण्यके षष्ठेऽध्याये चतुर्थे ब्राह्मणे "तमुत्क्रामन्तं प्राणोऽनूत्क्रामन्ती"ति उत्क्रान्तिगत्यागत्योश्च श्रवणात् परिच्छिन्नः सूक्ष्मो मध्यमपरिमाणः प्राण इति। सम एभिरित्यत्र समशब्देन परिच्छिन्नत्वमेवोच्यत इति न विरोधः। एतद्विरोधशङ्का.निरासार्थ

मेवेदमधिकरणम्"

(टि) इदानीं तस्य परिच्छिन्नतामाह - किं प्राणो विभुरिति।

।। इन्द्रियाणां देवपरतन्त्रताधिकरणम्।।

सू. ज्योतिराद्यधिष्ठानं तु तदामननात् ।।

(मू) किमिन्द्रियाणि स्वमहिम्नैव स्वकार्यमारभन्ते अथवा अग्न्यादिदेवताधिष्ठितानीति संशयः।

तत्र स्वमहिम्नैवारभन्ते अन्यथाधिष्ठात्रीणां देवतानां भेक्तृत्वप्रसङ्ग.ादिति प्राप्ते,

ब्रूमः। ऐतरेये चतुर्थेऽध्याये द्वितीये खण्डे "अग्निर्वाग्भूत्वा मुखं प्राविशत्" इत्यादिषु अग्न्यादिदेवताधिष्ठितत्वश्रवणात्" अग्न्यादिदेवताधिष्ठितानि वागादीनीन्द्रियाणि स्वकार्यमारभन्त इति। चक्षुषा हि रूपाणि पश्यतीत्यदिषु देवताधिष्ठितत्वनिषेधाभावात् "नाग्निर्भूत्वे"त्यादिश्रुते"श्चक्षुषा हीत्या"दि श्रुत्या विरोध इति।

(टि) इदानीमिन्द्रियाणामधिदैवापेक्षां चेष्टामाह - किमिन्द्रियाणीति। अधिष्ठात्रीणामिति। अधिष्ठानं प्रेरणम्। स्वार्थमेव हि सर्वैः प्रेर्यते न परार्थमिति भावः। इन्द्रियारब्धकार्यभोक्तृत्वं जीवस्यैव न देवतानामित्यनुभवसिद्धम्। किञ्च देवतानां परस्मिन्नैश्वर्येऽवतिष्ठ-मानानां न हीनमानुषभोगभोक्तृत्वं युक्तं कल्पयितुमिति निर्विवादमित्याशयेनाह अग्निरित्यादिना।।

।। इन्द्रियाणां प्राणात्तत्वान्तरत्वाधिकरणम् ।।

सू. त इन्द्रियाणि तत्त्वव्यपदेशादन्यत्र श्रेष्ठात्।।

(मू) किं मुख्यप्राणस्य वृत्तिभेदा इन्द्रियाणि उत तत्त्वान्तराणीति संशयः।

तत्र बृहदारण्यके तृतीये अध्याये पञ्चमे ब्राह्मणे "हन्तास्यैव सर्वे रूपमसामे"ति। तत्र "एतस्यैव सर्वे स्वरूपमभवन्नि"ति इन्द्रियाणां प्राणात्मत्वापत्तिश्रवणात् वृत्तिभेदा इति प्रप्ते,

ब्रूमः। मुण्डके तृतीये "एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च" इति प्राणात् पृथगिन्द्रियाणां व्यपदेशदर्शनात् तत्त्वान्तराणि वागादीनीन्द्रियाणीति। प्राणात्मकत्वश्रुतिस्तु गौणी इति न विरोध इति।।

(टि) इदानीमिन्द्रियाणां प्राणातिरिक्तत्वमुच्यते - किं मुख्येति। वृत्तिभेदाः परिमाणभेदा इत्यर्थः। गौणीति। भृत्यन्यायेन प्राणानुवृत्तित्त्वादिन्द्रियाणामिति भावः।।

।। ईश्वरस्यैव नामरूपव्याकर्तृत्वाधिकरणम्।।

सू. संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्।।

(मू) छान्दोग्ये षष्ठे अध्याये द्वितीये खण्डे श्रूयते सेयं देवतैक्षत हन्ताहमिमास्तिस्रः देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति।

तत्र संशयः - किं जीवकर्तृकमिदं नामरूपव्याकरणं सृष्टिरुत परमात्मकर्तृकमिति।

तत्रानेन जीवेनेति विशेषणात् जीवकर्तृकमिति प्राप्ते,

ब्रूमः। व्याकरवाणीत्युत्तमपुरुषेण परस्यैव ब्रह्मणो व्याकर्तृत्वस्योपदेशात् परमात्मकर्तृकमेवेदं नामरूपव्याकरणमिति।

जीवेनानुप्रविश्येत्यन्वय: आनन्तर्यात् योग्यत्वाच्च। तस्मादस्या: श्रुते: "आकाशो ह वै नामरूपयोर्निर्वहिते"ति परमात्मकर्तृकत्वश्रुत्या न विरोध इति। तस्मान्न वेदान्तानां ब्रह्मणि समन्वये न कश्चिद्विरोध इतिस्थितम्।।

।। इति शारीरकमीमांसायां द्वितीयाध्यायस्य।

।। चतुर्थ: पाद:।।

(टि) एवं भूतभौतिककरणनिरूपणानन्तरं तन्नामरूपव्याकरणस्य परमात्मा कर्तेत्याह - सृष्टिरिति। एतन्नामरूपव्याकरणमित्यस्य व्याख्यानम् ।।

।। इति केरलीये षोडशाध्यायीटिप्पणे।।

।।चतुर्दशस्याध्यायस्य चतुर्थ: पाद:।।

।।समाप्तश्चाध्याय:।।

।।अथ तृतीयाध्याये प्रथमो।।

।।वैराग्यपाद:।।

।। जीवस्य भूतसूक्ष्मवेष्टितस्यैव परलोक गमनागमनाधिकरणम्।।

सू. तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्त: प्रश्ननिरूपणाभ्याम्।।

छान्दोग्ये पञ्चमाध्याये तृतीयादि सप्तभि: काण्डै: पञ्चाग्निविद्या वैराग्यहेतुभूता संसारगतिश्चोपदिष्टा। तत्र प्राणेन्द्रियमनोविद्या कर्मापूर्वप्रज्ञासहितो जीव: देहं विहाय देहान्तरं प्रतिपद्यत इत्यापि सिद्धम्। संसारप्रकरणस्थात् शब्दात् तत्र संशय: - किं जीवो देहकारणभूतै: भूतसूक्ष्मैरसहितो गच्छति उत सहित इति।

तत्र भूतोपादानस्याश्रुतत्वात् भूतसूक्ष्मैरसहितो गच्छतीति प्राप्ते,

ब्रूमः। पञ्चाग्निविद्यायां प्रश्नप्रतिवचनयोः "पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ती"ति पञ्चीकृताप्सहितत्वश्रवणात् भूतसूक्ष्मैः सहित एव जीवो गच्छतीति।।

(टि) ।। श्रीः ।।

।। अथ पञ्चदशस्य प्रथमः पादः।।

एवं ब्रह्मणि स्वरूपं प्रमाणं चोक्त्वाधुना साधनं प्रतिपादयितुमयं साधनाध्याय आरभ्यते। तत्र प्रथमपादे ब्रह्मविद्यासाधनभूतवैराग्यसम्पत्त्यर्थं संसारप्रकारः प्रतिपाद्यते। तत्रात्र भूतसहितो जीवः संसरतीत्युच्यते अश्रुतत्वादिति। किञ्च भूतानां सर्वत्र सुलभत्वात्तन्नयनस्य निष्प्रयोजनत्वाच्चासहितैस्तैर्गच्छतीति बोध्यम्। पञ्चीकृतेति। अयमत्र श्रुत्यर्थः द्युलोकपर्जन्यपृथिवीपुरुषयोषितः पञ्च पदार्था अग्नित्वेनोपास्यतयोक्ताः। तेष्वग्निषु स्वर्गाय गच्छन् पुनरागच्छंश्च जीव आहुतित्वेन कल्पितः। तत्रेष्टापूर्तकारी जीवः स्वर्गमारुह्योपभोगेन कर्मणि क्षीणे पर्जन्ये पतित्वा वृष्टिरूपेण भूमिं प्राप्यान्नद्वारेण पुरुषं प्राप्य रेतोद्वारेण योषितं प्राप्नोति। सेयं पञ्चम्याहुतिः। तत्रापः रेतांसि देहबीजानि पञ्चभूतानि शरीरभावं प्राप्यपुरुषवचसः पुरुषशब्दवाच्यानि भवन्तीति भावः।।

।। स्वर्गादवरोहतो जीवस्य सानुशयत्वाधिकरणम्।।

सू. कृत्यात्यये ऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च ।।

(मू) पञ्चाग्निविद्यायामेवमाम्नायते - "तस्मिन् यावत्सम्पातमुषित्वा

यथैतमेवाध्यानं पुनर्निवर्तन्त" इति । आरभ्य तद्या इति ... रमणीयचरणा अद्धा शोभन्ते { अभ्याशो ह यत्ते } रमणीयां योनिमापद्येरन् ब्राह्मणयोनिर्वे"त्यादि। तथा "अथ य इह कपूयचरणाः अद्धा शोभन्ते { अभ्याशो ह यत्ते } कपूयां योनिमापद्येरन् श्वयोनिं वे"त्यादि च । तस्मिन् चन्द्रमण्डले स्वर्गे यावत्सम्पातं स्वर्गप्रदकर्मफलभोगावसानपर्यन्तं इत्यर्थः।।

तत्र संशयः - किं भुक्तकृत्स्नकर्मफला अवरोहन्ति उत भुक्तशिष्टकर्मफला इति।

तत्र यावत्सम्पातमिति वचनात् भुक्तकृत्स्नकर्मफला इति प्राप्ते,

ब्रूमः। रमणीयकपूयचरणां रमणीयकपूययोनिप्राप्तिश्रवणात् भुक्तशिष्ठकर्मफला अवरोहन्तीति।।

(टि) एवं भूतसहितो जीवः स्वर्गादवरोहतीत्युक्तम्। इदानीं तस्यावरोहतः सानुशयत्वमुच्यते। तस्मिन् यावत्सम्पातमिति। सम्पतति गच्छत्यनेन कर्मणा स्वर्गमिति सम्पातः कर्मसमूहः। सम्पातमनतिक्रम्य यावत्सम्पातं विशेषस्वर्गप्रदकर्मफलभोगा वधि तत्रोषित्वेत्यर्थः। तदा रमणीयचरणाः सुकृतकर्माणः अभ्याशो ह यदित्यव्ययसमुदायस्तस्य क्षिप्रत्वमर्थः। कपूयचरणाः पापकर्माणः यावदिति कृत्स्नकर्मफलभोगावधीत्यर्थ इति भावः। रमणीयेति। यद्यवरोहतः कर्मशेषो नास्ति तर्हि कर्मभेदकृतयोनिभेदश्रवणमनुपपन्नं स्यात् । अतोऽस्ति कर्मशेष इत्याभिप्रायः।।

।। पापिनां स्वर्गे गत्यभावाधिकरणम्।।

सू. अनिष्टादिकारिणामपि च श्रुतम् ।।

(मू) पूर्तकारिणां चन्द्रमण्डलाख्यस्वर्गप्राप्तिः ततः तत्रोषित्वा फलमनुभूय स्वल्पकर्मफलावशेषसहितस्वर्गादवरुह्य इह शरीरप्राप्तिरिति समधिगतम्।

तत्र संशयः - किं पापिनामपि चन्द्रमण्डलाख्यस्वर्गप्राप्तिरस्ति उत नेति।

तत्र कौषीतकिब्राह्मणे "ये वै के चास्माल्लोकात् प्रयान्ति चन्द्रमसमेव ते सर्वे गच्छन्ती"ति सर्वेषां स्वर्गप्राप्तिश्रवणात्! पापिनामप्यस्ति स्वर्गप्राप्तिरिति प्राप्ते,

ब्रूमः। "वैवस्वतं सङ्ग.मनानां यमं राजानमि"त्यादि श्रुतिषु मनुव्यासादिसकलशिष्टस्मृतिषु च पापिनां यमलोकप्राप्तेर्नरकानुभवस्य च प्रसिद्धत्वान्नास्ति पापिनां स्वर्गप्राप्तिरिति ।।

(टि) एवमिष्टादिकारिणां गतिमुक्त्वानिष्टादिकारिणां गतिमाह -वैवस्वतमिति। विवस्वतोऽपत्यं वैवस्वतः। सङ्ग.मनमिति। बाहुलकात् कृत्यार्थे ल्युट् सङ्ग.न्तव्यमिति। यमो नियन्ता शास्तेत्यर्थः। शास्तृसमीपगमनं हि शास्यानाम्। शास्याश्च पापिनः। तदयमर्थः - पापिजनैर्गन्तव्यं वैवस्वतं यमं राजानं हविषां दुवस्यतं प्रीणयेति। तदाह - यमलोकेति।।

।। स्वर्गावरोहे जीवस्याकाशादितुल्यत्वाधिकरणम्।।

सू. स्वाभाव्यापत्तिरुपपत्तेः।।

(मू) पञ्चाग्निविद्यायामवरोहः श्रूयते - "यथैतमध्वानं पुनर्निवर्तन्ते यथैतमाकाशं आकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वा अभ्रं भवति अभ्रं भूत्वा मेघो भवति मेघो भूत्वा वर्षतीति। यथेतं यथागतमित्यर्थः।

तत्र संशयः - किमवरोहन्तो जीवाः आकाशादिस्वरूपमेव प्रतिपद्यन्ते उताकाशादिसाम्यमिति।

तत्र "वायुर्भूत्वे"त्यादिभिः तत्स्वरूपापत्तिप्रतिपादनात् आकाशादिस्वरूपमेव प्रतिपद्यन्त इति प्राप्ते,

ब्रूमः। मुख्यतयान्यस्यान्यथा वासम्भवात् आकाशादिसाम्यमेव स्वर्गादवरोहन्तो जीवाः प्रतिपद्यन्त इति।।

(टि) इदानीं स्वर्गादवरोहत आकाशादिभावापत्तिः सादृश्यात् न स्वरूपेणेत्याह - मेघ इति। मिह सेचन इत्यस्मात् कर्तरिव्युत्पन्नो मेघशब्दः सजलमभ्रमित्यर्थः।

।। स्वर्गादवरोहतां त्वराविलम्बाधिकरणम् ।।

सू. नातिचिरेण विशेषात् ।।

(मू) तत्रैव वर्षतीत्यस्यानन्तरमाम्नायते - "इह व्रीहियवा ओषधिवनस्पतयः तिलमाषा जायन्ते"इति।अतो वै खलु दुर्निष्प्रपतरमि"ति। अतो व्रीह्यादिभ्यः दुर्निष्प्रपतरमिति छान्दसः तकारलोपः। दुर्निष्प्रपततरं दुःखतरं निष्प्रपतनमित्यर्थः। व्रीह्यादिभ्यो निस्सरणं दुःखतरं तत्र च दीर्घकालावस्थानं निमित्तमिति।

तत्राकाशवायुधूमाभ्रमेघप्रतिपत्तौ संशयः- किं दीर्घकालं अल्पमल्पं कालं वा आकाशादिषु पूर्वपूर्वसादृश्येनावस्थाय जीवा उत्तरोत्तरसादृश्यं गच्छन्तीति अनियम उताल्पाल्पमिति।

तत्र नियमकारिणः शास्त्रस्याभावात् अनियम इति प्राप्ते,

ब्रूमः। दुर्निष्प्रपतरमिति व्रीह्यादिभावेन चिराचिरकालावस्थान-दर्शनात्मलावस्थानदर्शनात् आकाशादिसादृश्येनाल्पमल्पं कालमवस्थाय उत्तरसादृश्यं गच्छन्तीति दर्शयतीति।।

(टि) इदानीं पूर्वसादृश्यं गतानामुत्तरोत्तरसादृश्यप्राप्तिर्नातिचिरेणेत्याह -तत्रैवेत्यादिना।।

।।स्वर्गादवरोहतां ब्रीह्यादौ संश्लेषाधिकरणम्।।

सू. अन्याधिष्ठिते पूर्ववदभिलाषात् ।।

(मू) तत्रैव "त इह व्रीहियवा ओषधिवनस्पतयस्तिस्र माषा इति जायन्त" इति। अत्र संशयः - किं इष्टापूर्तादिकारिणां अग्नीषोमीयाादिपशुहिंसानिष्पन्नपापसत्वात् स्थावरादिजन्मौचित्यात् जायन्त इति जनिश्रुतेः मुख्यत्वात् इष्टादिकारिणः स्थावरब्रीह्यदिजात्यापन्नाः तत्सुखदुःखभाजो भवन्ति किं वा अग्नीषोमीयादिपशुहिंसानिमित्तपापाभावात् स्थावरादिजन्मासम्भवात् जनिश्रुतेर्जीवान्तराधिष्ठितव्रीह्यादौ संसर्गमात्रे गौणत्वात् न तत्सुखदुःखभाज इति।

तत्र "नहिंस्यादि"ति हिंसाया निषिद्धत्वात् उक्तरीत्या व्रीह्यादिस्थावर सुखदुःखभाजो जीवा इति प्राप्ते,

ब्रूमः। औत्सर्गिकस्य निषेधस्या"ग्नीषोमीयं पशुमालभेते"त्यादिना हिंसाविधायकेन विशेषशास्त्रेण बाधादुक्तरीत्या स्थावरसुखदुखःभाज इष्टादिकारिणो जीवा इति।।

।। इति शारीरकमीमांसायां तृतीयाध्यायस्य।।

।। वैराग्यपादः प्रथमः।।

(टि) इदानीं व्रीह्यादिभावोऽपि संसर्गमात्रमित्याह तत्रैव त इति।

।। इति केरलीये षोडशाध्यायी ।।

।। टिप्पणे पञ्चदशाध्यायस्य।।

।। प्रथमः पादः समाप्तः।।

(मू)।। अथ तृतीयाध्यायस्य द्वितीयः।।

।। तत्त्वम्पदार्थपादः।।

।। स्वप्नसृष्टेर्मिथ्यात्वाधिकरणम्।।

सू. सन्ध्ये सृष्टिराह हि ।।

बृहदारण्यके षष्ठेऽध्याये तृतीयब्राह्मणे "स यत्र स्वपिती "त्युपक्रम्यामनन्ति"न तत्र रथाः रथयोगाः न पन्थानो भवन्ति अथ रथान् रथयोगेनापथः सृजति" इत्यादि।

तत्र संशयः - किमियं स्वर्ग सृष्टिः जाग्रत्सृष्टिवत् पारमार्थिकी किं वा शुक्तिरज्जुसृष्टिवत् मायामयीति।

तत्र सृजत इति श्रवणात् परमार्थिकीति प्राप्ते,

ब्रूमः। बाधितत्वात् मायामयी स्वर्गसृष्टिरिति।।

(टि) ।।श्रीः।।

।। अथ पञ्चदशस्य द्वितीयः पादः।।

एवं ब्रह्मविद्यासाधनवैराग्यसाधनसंसारगतिं निरूप्य विरक्तस्य बाक्यार्थावगतिसाधनभूतो तत्त्वंम्पदार्थौ शोधयितुमयं पाद आरभ्यते। तत्र पूर्वार्धेन त्वम्पदार्थः शोध्यते। तत्र त्वम्पदार्थस्य जीवस्य जाग्रदवस्थासंसारनिरुपणेन निरूपितेति स्वप्नावस्थात्र निरूप्यते। स यत्रेति। यत्र स्वप्नस्थाने मिडानाड्यामित्यर्थः।।

।।सुषुप्तौ जीवस्य हृत्स्थब्रह्मणैक्याधिकरणम्।।

सू. तदभावो नाडीषु तच्छ्रुतेरात्मनि च ।।

(मू) छान्दोग्ये अष्टमाध्याये षष्ठे खण्डे श्रूयते "तद्यत्रैतत् सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न जानाति आसु तदा नाडीषु सुषुप्तो भवतीति। बृहदारण्यके चतुर्थेऽध्याये प्रथमे ब्रह्मणे "यत्रैष सुप्तोऽभू"दित्युपक्रम्य" य एषोऽन्तर्हृदय आकाशः तस्मिन् शेत"इति श्रूयते। तथा तस्मिन्नेव ब्राह्मणे उपरिष्टात्" यदा न कस्यचन वेद हिता नाम नाड्य" इति नाडीरनुक्रम्य श्रूयते - "ताभिः प्रत्यवसृप्य पुरीतति शेतत" इति।

तत्राकाशशब्देन ब्रह्मोच्यते।

तत्र संशयः - किं जीवस्य नाडी पुरीतत् ब्रह्मणि परस्परनिरपेक्षाणि सुप्तिस्थानानीति विकल्पः उत परस्परापेक्षया ब्रह्मैकमेव सुप्तिस्थानं नाडी पुरीतत् प्रवेशानन्तरं ब्रह्मणी प्रविश्य सुप्तो भवतीत्येवं समुच्चय इति।

तत्र सर्वेषां सुप्तिरूपैकार्थ्यश्रवणात् व्रीह्यादिवत् विकल्प इति प्राप्ते,

ब्रूमः। यथा "प्रासादे शेते पर्यङ्के. शेत" इत्यादौ प्रासादे पर्यङ्के. च शेत इति समुच्चयः तथेहापि नाडीषु पुरीतति ब्रह्मणि च स्वपितीति समुच्चयसम्भवात् उक्तरीत्या ब्रह्मैव सुषुप्तिस्थानं समुच्चय इति। अत्रेदमवधेयम् - बाह्यकरणेन्द्रियोपरमः स्वप्नः अन्तःकरणोपरतिः सुषुप्तिरिति।।

(टि) एवं बाह्यकरणोपरमलक्षणां स्वप्नावस्थां जीवस्य स्वयंज्योतिष्ट्वसिद्धये प्रतिपाद्याधुना तदर्थमेवान्तःकरणोपलक्षणां

सुषुप्तिं प्रतिपादयति - ब्रह्म सुषुप्तिस्थानमिति। ब्रह्मप्राप्तिरेव सुषुप्तिरिति भावः।।

।। सुप्तस्यैव जागरणाधिकरणम् ।।

सू. स एव कर्मानुस्मृतिशब्दविधिभ्यः।।

(मू) किं यस्सुप्तः सोऽन्यो वाप्रबुध्यत इति अनियमः उत स एवेति संशयः।

तत्र यथा जलराशौ प्रक्षिप्तो जलबिन्दुः स एव नियमेन उद्धर्तुं न शक्यते तथा सुषुप्तस्य ब्राह्मणैकत्वमापन्नस्य नियमेन तस्यैव प्रबोधासम्भवात् अनियम इति प्राप्ते,

ब्रूमः। कर्मशेषानुष्ठानदर्शनात् यः सुप्तः स एव प्रबुध्यत इति। बृहदारण्यके षष्ठे अध्याये तृतीये ब्राह्मणे श्रूयते "प्रतिन्यायं प्रतियोन्यावेति बुद्धान्तायै वे"त्यादि श्रूतिरप्यत्र प्रमाणमिति बोध्यम् ।।

(टि) एवं जीवस्य सुषुप्तिस्थानमुक्त्वेदानीं पूर्वजाग्रदभिमानगोचर एव देह उत्थानस्थानमित्याह- स एव प्रबुध्यत इति। जीवस्य मायावेष्टितत्वान्न जलबिन्दुसाम्यं किन्तु शुद्धोदकपूर्णीविहितद्वारसमुद्र-निक्षिप्तकुम्भसाम्यमिति भावः। इत्यादीति। सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति त इहव्याघ्रो वा सिंहो वा यद्यद् भवति तदा भवन्तीत्यादिरादिशब्दार्थः। एवमादिश्रुतिभिः सुषुप्तस्य मायावेष्टितत्वं प्रबोधश्चावगम्यत इति भावः।

।। मूर्छाया अवस्थान्तराधिकरणम्।।

सू. मुग्धेऽर्धसम्पत्तिः परिशेषात् ।।

(मू) किं जागराद्यवस्थानामन्यतमा मूर्छावस्था उतावस्थान्तरमिति संशयः।

मूर्छावस्थायाः श्रुतिस्मृत्योरप्रसिद्धत्वात् चतसृणां जाग्रत्स्वप्नसुषुप्तिमरणावस्थानामन्यतमा मूर्छावस्थेति प्राप्ते,

ब्रूमः। जाग्रदाद्यवस्थाभ्यो विलक्षणत्वात् अवस्थान्तरं मूर्छेति। तदेवं जाग्रत्स्वप्नसुषुप्तिमूर्छारूपपञ्चावस्थाविनिर्मुक्तः स्वप्रकाशकः ब्रह्मात्मकः त्वम्पदार्थ इति सिद्धमिति बोध्यम् ।।

(टि) एवमवस्थात्रयमुपवर्ण्यावस्थान्तरं मूर्छालक्षणमुपवर्णयति किमित्यादिना। प्रकृतमुपसंहरति तदेवमित्यादिना।।

।। ब्रह्मणो नीरूपत्वाधिकरणम् ।।

सू. न स्थानतोऽपि परस्योभयलिङ्गं.सर्वत्र हि।।

(मू) छान्दोग्ये तृतीयाध्याये चतुर्दशे खण्डे श्रूयते - "सर्वकर्मा सर्वकामः सर्वरसः सर्वगन्ध इति एवमादिषु ब्रह्मणः सविशेषात्मकं श्रूयते। तथा बृहदारण्यके पञ्चमाध्यायेऽष्टमे ब्राह्मणे "अस्थूलमनण्वह्रस्वमि"ति । एवमादिषु च निर्विशेषत्वं श्रूयते।

तत्र संशयः - किं सविशेषनिर्विशेषोभयरूपं ब्रह्म उतैकरूपम्। तत्रापि किं सविशेषमुत निर्विशेषमिति। तत्रोभयश्रुत्यनुग्रहादुभयरूपमिति चेत्, उच्यते। सत्यस्य वस्तुनो द्वैरूप्यासम्भवात् एकरूपमिति। तत्रपि उपासनाविधिबलात् सविशोषमित्येवं प्राप्ते,

ब्रूमः। अस्थूलमित्यादिनिर्विशेषवाक्यानां ब्रह्मप्रधानत्वान्निर्विशेषमेव ब्रह्मेति।

अत्रेदमवधेयम् - सविशेषवाक्यानामुपासनापरत्वात् न ब्रह्मणः

सविशेषत्वे तात्पर्यं अन्यथा वाक्यभेदप्रसङ्ग.ात्। ब्रह्मोपास्यं तच्च ब्रह्मसविशेषमिति निर्विशेषवाक्यानां तु निर्विशेषपरत्वे तात्पर्यभावे वैयर्थ्यमेव स्यादिति। सविशेषश्रुतिरौपाधिकाकारपरेति।।

(टि) एवं चतुर्भिरधिकरणैरुद्देश्यत्वेन प्रथमं जिज्ञास्यं त्वम्पदार्थं परिशोध्याधुना विधेयत्वेन जिज्ञास्यं तत्पदार्थ बोधयितुं पादस्योत्तरार्धं आरभते। तत्रात्र ब्रह्मण उभयरूपत्वं निराचष्टे ब्रह्म प्रधानत्वादिति। उपासनाविधीनां तु उपासनापरत्वान्न ब्रह्म-प्राधान्यमिति भावः । तदेव प्रतिपादयति अत्रेत्यादिना ।।

।। ब्रह्मणो निराकरणविषयत्वाधिकरणम्।।

सू. प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः।।

(मू) बृहदारण्यके चतुर्थेऽध्याये प्रथमंस्य ब्राह्मणस्यादौ "ब्रह्म ते ब्रवाणी" त्युपक्रम्य तृतीये ब्राह्मणे "द्वे वा ब्रह्मणो रूपे" इत्युक्त्वा पञ्च महाविभूतिं द्विधा विभज्य मूर्तत्वेनामुर्तत्वेन चोक्त्वा पुनराम्नायते "अथात आदेशोऽनेनेति न ह्येतस्मात् इति अनेनेत्यन्यपरमस्ति अथ नामधेयं सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेष सत्यमि"ति। अथ रूपद्वयकथनानन्तरमित्यर्थः।अतः रूपिणो ब्रह्मणः वक्तव्यत्वाद्धेतोरित्यर्थः नेति नेति इति आदेशः ब्रह्मण उपदेशः इतिशब्दद्वयेन प्रधानत्वेन प्रकृते मूर्तामूर्तरूपे परामृश्येते। इतिशब्दस्य प्रधानपरामर्शित्वात् इति मूर्तरूपं प्रपञ्चं न। एवं का1ते प्रपञ्चे प्रतिषिद्धे सति यत् षष्ठ्यन्तनिर्दिष्टत्वेना-प्रधानतया प्रकृतं ब्रह्म तत् शिष्यत इति ब्रह्मोपदेश इत्यर्थः। एतमेवार्थं वाक्यशेषेण दर्शयति। तत्रैषा योजना - नेति नेतीत्यस्य कोऽर्थ इत्यत आह न ह्येतस्मादिति। एतस्मात् ब्रह्मणः व्यतिरिक्तं नास्तीत्यतो हि नेति नेतीत्युच्यते न पुनः ब्रह्मापि

नास्तीति अतः अस्ति तु प्रतिषिद्धत्वात् प्रपञ्चादन्यदप्रतिषिद्धं परं ब्रह्म। अथ सत्स्य व्यावहारिकस्य प्रपञ्चस्य सत्यमिति ब्रह्मणो नामधेयं स्वरूपं ब्रह्मैव पारमार्थिमसत्वभूतं नान्यत् किञ्चिदित्यर्थः। सत्यस्य सत्यमित्यस्योक्तमेवार्थं दर्शयति प्राणा इत्यादिना। प्राणशब्देन प्रपञ्चोक्त एष इति ब्रह्म निर्दिश्यते। ब्रह्मणोऽतिरिक्तं किमपि नास्ति ब्रह्मैवास्तीति पर्यवसितार्थः।

तत्र संशयः - किं मूर्तामूर्तद्वयात्मकः प्रपञ्चः रूपवत् ब्रह्म चेत्युभयमत्र निषिध्यते किं वा एकतरं तत्रापि किं ब्रह्माथवा प्रपञ्च इति।

तत्र प्रमृतत्वविशेषादुभयं निषिध्यत इति चेत् उच्यते। निरवधिकनिषेधायोगादेकमिति।

तत्रापि प्रपञ्चस्य प्रत्यक्षस्य निषेधायोगात् ब्रह्मैव निषिध्यत इत्येवं प्राप्ते,

ब्रूमः। प्राधान्येन प्रकृतस्यैवेतिशब्देन परामर्शात् प्रपञ्चो निषिध्यत इति। रूपे इति प्रथमान्तेन निर्दिष्टत्वात् प्राधान्यं ब्रह्मण इति षष्ठ्यन्तनिर्दिष्टत्वादप्राधान्यमिति बोध्यम् ।।

(टि) निर्विशेषत्वनिरूपणप्रसङ्गेन मूर्तामूर्ताख्यसर्व विशेषप्रति-षेधकवाक्यार्थमाह बृहदित्यदिना। तत्र सिद्धान्ताननुरोधेन श्रुतिं व्याचष्टे अथ रूपद्वयेत्यादिना।।

।। ब्रह्मातिरिक्तवस्तुनिराकरणाधिकरणम्।।

सू. परमतः सेतून्मातसम्बन्धभेदव्यपदेशेभ्यः।।

(मू) किं ब्रह्मणः परमन्यत् तत्त्वमस्ति नास्तीति संशयः।

तत्र यत् प्रपञ्चो नास्ति अस्ति च ब्रह्मेत्युक्तं तत्तथास्तु किन्तु ब्रह्मणोऽन्यदपि तत्त्वान्तरमस्ति। छान्दोग्ये अष्टमे अध्ययाये चतुर्थे खण्डे - "अथ य आत्मा स सेतुरि"त्यादिभिः ब्रह्मणः सेतुत्वादिव्यपदेशात् सेतुत्वव्यपदेशेन सेतुं तीर्त्वा अन्यत् किञ्चित् प्राप्यमस्तीति गम्यत इति प्राप्ते,

ब्रूमः। जगत्तन्मर्यादाव्यवस्थापकसादृश्यादिना सेतुत्वादिव्यपदेशात् न ब्रह्मणः परं तत्त्वान्तरमस्तीति"

(टि) इदानीं ब्रह्मव्यतिरिक्तं वस्तु निषेध्यमिति यदुक्तं सेत्वादिवस्त्वन्तरावगतेरित्याशङ्क्य निराकरोति - किं ब्रह्मण इत्यादिना। सेतुत्वादीति। "तदेतद् ब्रह्म चतुष्पादित्युन्मानस्य परिच्छिन्नत्वस्य व्यपदेशः "प्राज्ञेनात्मना सम्परिष्वक्त" इति सम्बन्धस्य, "अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यत" इति आदित्याधारं पुरुषमुपदिश्य ततो भेदेना"थ य एषोऽन्तरक्षिणि पुरुषो दृश्यत" इत्यक्ष्याणारं व्यपदिशति। स च भेदव्यपदेशश्चादिशब्देन गृह्यते। न ह्यात्मनो मुख्यं सेतुत्वं मृद्दारुमयत्वात् सेतोरित्याशयेनाह - जगदि त्यादिना। सादृश्यादीति। परिच्छिन्नत्वादिव्यपदेशा औपाधिका न मुख्या इति भावः। यत्तु सेतूपदेशेनान्यत् किञ्चिदस्तीति गम्यत इति, तन्न, आत्मा सेतूरित्येतावदुक्तं न त्वन्यदस्तीति। तत्तु कल्पनीयं कल्पना च न प्रतिषेधश्रुतिविरुद्धा युक्तेति। अतो न ब्रह्मणस्तत्त्वान्तरमस्तीति।।

।।कर्माराधितेश्वरस्यैव फलदातृत्वाधिकरणम्।।

सू. फलमत उपपत्ते : ।।

(मू) किं कर्मणः फलं भवति उत ब्रह्मण इति संशयः।

तत्र यागादिकर्मणः फलसाधनत्वश्रवणात् कर्मण फलं भवतीति प्राप्ते,

ब्रूमः। "एष ह्येव साधु कर्म कारयतितं यमेभ्यो लोकेभ्य उन्निनीषते एष ह्येवासाधु कर्म कारयति तं यदधो निनीषत" इति धर्माधर्मयोरपि कारयितृत्वेन फलदातृत्वेन च ब्रह्मणो व्यपदेशात् ब्रह्मण एव फलं भवतीति। तस्मात् फलदातृत्वेनापि नान्यत् किञ्चिद्वस्तु परमार्थतः सिध्यति। तस्मात् निर्विशेषस्वयम्प्रकाशो निषेधविषयोऽद्वितीयः फलप्रदत्वेनोपलक्षितः तत्पदार्थ इति सिद्धम्।।

।। इति शारीरकमीमांसयां
तृतीयाध्यायस्य द्वितीयः
तत्त्वम्पदार्थपादः।।

(टि) इदानीं ब्रह्मातिरिक्तस्य वस्तुनो निषेधे ब्रह्मणो निर्विशेषत्वेन फलदातृत्वायोगात् फलदातृत्वे नान्यद्वस्तु सिध्यतीत्याशङ्क्य निराकरोति किं कर्मण इति। उपसंहरति ' तस्मादिति। प्रकरणार्थमुपसंहरति – तस्मादिति।

।। इति केरलीये षोडशाध्यायीटिप्पणे
पञ्चदशाध्यायस्य
द्वितीयः पादः।।

।। अथ तृतीया(पञ्चदशा) ध्यायस्य ।।
।। तृतीयो गुणोपसंहारपादः।।

।।सर्ववेदान्तप्रत्ययोपासनाया एकत्वाधिकरणम्।।

सू. सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्।।

(मू) किं प्रतिवेदान्तमुपासनानां भेदोऽस्ति नेति संशयः।

तत्र तैत्तिरीयकादिनामभेदात् प्रतिशाखं कर्मभेदवत् प्रतिवेदान्तमुपासनाभेद इति प्राप्ते,

ब्रूमः। छान्दोग्ये पञ्चमाध्याये प्रथमे खण्डे बृहदारण्यके षष्ठेऽध्याये प्रथमे ब्राह्मणे च "ज्येष्ठश्च श्रेष्ठश्च वेदे"त्यादि चोदनाद्यविशेषात् प्रतिशाखं कर्मभेदवत् प्रतिवेदान्तमुपासनाभेदोऽपि नास्तीति। अत्र शाखान्तराधिकरणन्याय एव व्युत्पादित इति बोध्यम्।।

।। श्रीः।।

।। अध पञ्चदशस्य तृतीयः पादः।।

(टि) एवं तत्त्वम्पदार्थौ विशोध्याधुना ब्रह्मावभाससाधनचित्तैकाग्र्य-साधनभूतगुणोपसनाचारार्थं तृतीयपाद आरभ्यते। तत्रोपासानाभेदाभेदौ चिन्त्येते किमित्यादिना।।

।।शाखान्तरोक्तस्याप्युपसंहाराधिकरणम्।।

सू. उपसंहारोऽर्थभेदात् विधिशेषवत् समाने च ।।

(मू) सर्वशाखासु विद्यानामेकत्वेऽपि संशयः- किं शाखान्त-राधीताधिकगुणानां शाखान्तरविद्यायामुपसंहारे नास्ति उतास्तीति।

तत्राश्रुतत्वान्नोपसंहार इति प्राप्ते,

ब्रूमः। सर्वगुणानां विशिष्ठविज्ञानरूपोपकाररूपैकप्रयोजनत्वात् समानविद्यासु शाखान्तराधीतगुणानामुपसंहारोऽस्तीति। बृहदारण्यके अष्टमाध्याये आदौ प्राणविद्याश्रुता। तत्र "रेतो होच्चक्रामदि"ति श्रूयते। तदत्र.....।।

(टि) इदानीमुपासनाभेदस्य गुणोपसंहारः फलमिति दर्शयति सर्वेत्यादिना ।।

।। उद्गीथविद्याया भिन्नताधिकरणम् ।।

सू. अन्यथात्वं शब्दादिति चेन्नाविशेषात् ।।

(मू) बृहदारण्यके तृतीये अध्याये तृतीये ब्राह्मणे उद्गीथसविद्यायां - ते ह देवा ऊचुः हन्तासुरान् यज्ञ उद्गीथेनात्यायतमेती "त्युनक्रम्य वागादीन् प्राणान् निन्दित्वा मूख्यप्राणपरिग्रह आम्नायते - "अथ हेममासन् य प्राणमूचुः त्वं न उद्गायेति तथेति तेभ्य एष प्राणः उद्गायदि"ति। यथा छान्दोग्ये प्रथमाध्याये उदगीथविद्यायां द्वितीये खण्डे -"तदेव उदगीथमाजहु" रित्युपक्रम्य इतरान् प्राणान् निन्दित्वा मुख्यप्राणपरिग्रहः श्रूयते - "अथ ह य एवायं मुख्यः प्राणः तमुद्गीथमुपासाञ्चाक्रिरे" इति। अस्वरं प्राप्तः। एते विद्ये प्राणविद्ये उद्गीथविद्ये इति चोच्येते।

तत्र संशयः - किमत्र विद्यैकत्वमुत विद्याभेद इति।

तत्र समाख्याद्यविशेषात् पूर्ववत् विद्यैकत्वमिति प्राप्ते,

ब्रमः। उपक्रमभेदात् क्रियाभेद इति। तथाहि छान्दोग्ये तावत् "ओमित्येतदक्षरमुद्गीथमुपासीते"ति उद्गीथावयव-स्यौङ्क.ारस्योपास्यत्वमुपक्रमते। वाजसनेयके तु उद्गीथशब्देन अवयवग्रहणे कारणाभवात् सकलैव भक्तिरावेद्यत इति।।

(टि) इदानीं छान्दोग्यबृहदरण्यस्थयोरुद्गीथविद्ययोः संज्ञाभेदाभेदमा-शङ्क्य निराकरोति। इदमपि भेदकारणमित्याह- उपक्रमभेदादिति।।

।। उद्गीथस्योङ्क.ारविशेषणत्वाधिकरणम् ।।

सू. व्याप्तेश्च समञ्जसम् ।।

(मू) छान्दोग्ये आदौ श्रूयते - "ओमित्येतदक्षरं उद्गीथमुपासीते"ति। तत्र ओङ्क.ारवाचकाक्षरोद्गीथशब्दयोः सामानाधिकरण्यं श्रूयते। तत् किमन्यतरत्र अन्यतरबुध्यध्यासार्थं किं वां "यद् रजतं सा शुक्तिरि"तिवत् अपवादार्थमुत "ब्राह्मणो द्विज" इतिवत्

एकत्वप्रतिपत्त्यर्थमाहोस्वित् "नीलमुत्पलमिमिति"वत् विशेषार्थमिति संशयः।

तत्रान्यतमनिर्धारणे कारणाभावात् अनिर्धारणमिति प्राप्ते,

ब्रूमः। अध्यासार्थं फलकल्पनाप्रसङ्गात् । नाप्यपवादार्थं उपासनाविधि परस्यास्य वाक्यस्य वस्तुतत्त्वप्रतिपादनपरत्वासम्भवात्। नाप्येकार्थत्वात् अन्यतरशब्दोच्चारणवैयर्थ्यप्रसङ्गात् । तस्माद् विशेषणार्थमिति। सर्ववेदसाधारणं ओमित्येतदक्षरमुद्गीथशब्देन विशेष्यते उद्गीथावयवभूतमोमित्येतदक्षरमुपासीतेति।

अत्रेदमवधेयम् - विशेषणपक्षे लक्षणा अभ्यासपक्षे तु गौणी, गौण्याश्चलक्षणा ज्यायसीति।

(टि) उद्गीथप्रसङ्गादिदमारभ्यते - वस्तुत्त्वेति। उभयार्थत्वे वाक्यभेदप्रसङ्ग इति भावः।।

।। वसिष्ठत्वादीनामाहार्यताधिकरणम्।।

सू. सर्वाभेदादन्यत्रेमे।।

(मू) बुहदारण्यके अष्टमेऽध्याये प्रथमे ब्राह्मणे "यो ह वै ज्येष्ठं च श्रेष्ठं च वेदे"त्यादिना प्राणविद्या विहिता। तथा छान्दोग्ये पञ्चमाध्याये प्रथमे खण्डेऽपि "यो हवैज्येष्ठं च श्रेष्ठं च वेदे"त्यादिना प्राणविद्या विहिता। उभयत्रापि ज्यैष्ठ्यादिगुणान्वितस्य प्राणस्योपास्यत्वमुक्तम्। वसिष्ठत्वादिगुणाश्च प्राणे प्रत्यार्पिताः। कौषीतकिब्राह्मणे "अथातो निःश्रेयसा दानमि"त्यादि प्राणसंवादे, ऐतरेये "चक्षुः श्रोत्रमि"त्यादि प्राणसंवादं च वसिष्ठत्वादयो गुणा नोक्ताः।

तत्र संशयः - किं वसिष्ठत्वादयो गुणाः क्वचिदुक्ता अन्यत्रापि उपसंह्रियेरन्नुत नेति।

तत्र "य एवं वेदे"त्येवम्शब्देन तत्तच्छाखोक्तगुणमात्रपरामर्शात् नोपसंह्रियेरन्निति प्राप्ते,

ब्रूमः। विद्याभेदाभावादुपसंह्रियेरन्निति। तत्र एवम्शब्देन तत्तच्छाखापठितेन तत्तच्छाखाधीतगुणपरामर्शाशङ्का विद्याया अभिन्नत्वात् सर्वशाखाधीतानां गुणानां सर्वत्रोपस्थानसम्भवादेवम्शब्देन सर्वेषां परामर्श इत्युत्तरमिति।।

(टि) इदानीमुद्गीथत्वस्योङ्कारविशेषणत्वात् सर्ववेदव्याप्तिव्यावृत्तिवदेवम्शब्दस्यापि व्यावृत्त्यर्थत्वमाशङ्क्य निराकरोति। इमामेव सङ्गतिं ध्वनयन्नाह अत्रैवमित्यादिना।।

।। आनन्दादीनामुपसंहाराधिकरणम्।।

सू. आनन्दादयः प्रधानस्य।।

(मू) तैत्तिरीयके ब्रह्मस्वरूपप्रतिपादनपरे "सत्यं ज्ञानमनन्तं ब्रह्म आनन्दो ब्रह्मे"ति आनन्दादयो धर्माः श्रूयन्ते।

तत्र संशयः - किमानन्दादयो ब्रह्मधर्माः यावन्तो यत्र श्रूयन्ते तावन्त एव तत्र प्रतिपत्तव्या उत सर्वे सर्वत्रेति। तत्राश्रुतत्वात् न प्रतिपत्तव्या इति प्राप्ते,

ब्रूमः। वेद्यब्रह्मैक्यप्रयुक्तविद्यैक्यात् सर्वे सर्वत्र प्रतिपत्तव्या इति। अत्र प्रियाशिरस्त्वादीनामपि प्रतिपत्तव्यत्वापत्तिशङ्का, तेषां कोशधर्मत्वेन ब्रह्म धर्मत्वाभावात् न प्रतिपत्तव्यापत्तिरिति उत्तरमिति।।

(टि) प्राणगुणानां सार्वत्रिकत्वमुक्त्वा ब्रह्मगुणानां सार्वत्रिकत्वमुच्यते। तत्र गतार्थत्वमाशङ्क्याह अत्रेत्यादिना।।

।। पुरुषस्यैव ज्ञेयताधिकरणम्।।

सू. आध्यानाय प्रयोजनाभावात् ।।

(मू) कठवल्लीषु तृतीयवल्ल्यां श्रूयते –

"इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः।।
महतः परमव्यक्तं अव्यक्तात् पुरुषः परः।
पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः"।।

इति। अत्र परशब्देन अनन्तरत्वमुच्यते। मनः अन्तःकरणवृत्तिः बुद्धिः वृत्तिमती, महान् बुधद्युपादानभूत अव्यक्तः तदुपादानमज्ञानं पुरुषश्चिद्रूपः।

तत्र संशयः – किमिमे सर्व एवार्थादयो ज्ञेयत्वेन तत्तत्परत्वेन प्रतिपाद्यन्ते किं वा पुरुष एव सर्वेभ्यः परत्वेन प्रतिपाद्यत इति।

तत्र श्रवणसामर्थ्यात् सर्वे प्रतिपाद्यन्त इति प्राप्ते,

ब्रूमः। अर्थादिषु प्रतिपन्नेषु मोक्षरूपप्रयोजनाभावात् पुरुष एव प्रतिपाद्यत इति। ततश्चास्मात् वाक्यभेदोऽपि नेत्येतदपरमनुकूलमिति।।

(टि) इदानीं ब्रह्मप्रतिपत्त्यर्थानामर्थत्वादीनां न पृथक् प्रतिपाद्यत्वमित्याह – सा काष्ठेति। अभ्यन्तरतारतम्यविश्रान्तिभूमिरित्यर्थः। परा गतिरिति। पुरुषार्थकामैः परमो गन्तव्यप्रदेश इत्यर्थः आभ्यन्तरत्वमिति। इन्द्रियेभ्योऽभिलष्यमाणत्वादाभ्यन्तरा अर्थास्तेभ्योऽपि अभिलाषात्मिका मनोवृत्तिरभ्यन्तरा वृत्तेरपि वृत्तिमती बुद्धिस्ततोऽपि तदुपादानभूतो महच्छब्दवाच्यो हिरण्यगर्भात्मा ततोऽपि तदुपादानभूता माया ततोऽपि तदधिष्ठानभूतश्चिद्रूपः पुरुष इत्याभ्यन्तरत्वमिति बोध्यम्।।

।। ईश्वरस्यैवात्मशब्दवाच्यताधिकरणम्।।

सू. आत्मगृहीतिरितावदुत्तरात्।।

(मू) ऐतरेयके तुतीयेऽध्याये श्रूयते - "आत्मा वा इदमेव एवाग्र आसीत् नान्यत् किञ्चन मिषत् स ईक्षत लेकान्नु सृजा इति स इमान् लोकान् असृजते"ति।

तत्र संशयः - किमिहात्मशब्देन परमात्मनोऽन्यः कश्चिदुच्यते उत परमात्मैवेति।

तत्र छान्दोग्ये तैत्तिरयादिष्विवात्र महाभूतसृष्ट्यनुक्तेरन्यः कश्चित् आत्मशब्देनोच्यत इति प्राप्ते,

ब्रूमः। "एक एवाग्र आसीदि"ति सृष्टेः प्रागेकत्वप्रतिपादनात् परमात्मैवोच्यत इति। तस्मात् भूतसृष्टिरत्रोपसंहर्तव्येति।।

अथवा बृहदारण्यके षष्ठेऽध्याये तृतीयब्राह्मणे "कतम आत्मे"त्यत्र आत्मशब्देनोपक्रम्य चतुर्थे ब्राह्मणे" स वा एव महानज आत्माजरोऽमृतोऽभयो ब्रह्मे"त्यात्मशब्देनोपसंहृतम्। छान्दोग्ये षष्ठाध्याये द्वितीयखण्डे "सदेवे"ति सच्छब्देनोपक्रम्य अन्ते षोडशे खण्डे" स आत्मा तत्त्वमसि श्वेतकेता"इति आत्मशब्देनोपसंहृतम् ।।

तत्र संशयः - किमनयोराम्नानयोः अतुल्यार्थत्वमुत तुल्यार्थत्वमिति।

तत्र क्रमभेदादतुल्यार्थत्वमिति प्राप्ते,

ब्रूमः। उपसंहारभेदात्तुल्यार्थत्वमिति। "येनाश्रुतं श्रुतं भवति अमृतं मृतं अविज्ञातं विज्ञात"मित्येकविज्ञानेन सर्वविज्ञान- मवधार्य"सदेवे"त्युपक्रम्य " स आत्मे"त्युपसंहृतं छान्दोग्ये। तत्र

सच्छब्देन यदि नात्मा गृह्येत तर्हि सर्वविज्ञानप्रतिज्ञा विरुध्येतेति सच्छब्देनात्मैवोच्यत इत्यभ्युपगन्तव्यम्। ततश्च नोपक्रमस्यापि भेद इति तुल्यार्थत्वादाम्नानयोरितरेतरगुणोपसंहारसिद्धिरिति।।

(टि) एवं वाक्यभेदप्रसङ्ग.ादर्थादीनां न पृथक् प्रतिपाद्यत्वमित्युक्तम्। इदानी "प्रजापते रेतो देवा" इत्यत्र देवादिकर्तृत्वेन प्रकृताद्धिरण्यगर्भादपरो न लोकानां स्रष्टा परमात्मा वाक्यभेद-प्रसङ्ग.ादित्याशङ्क.च परिहरति - अन्यः कश्चिदिति। हिरण्यगर्भइत्यर्थः। एकत्वप्रतिपादनादिति। अन्यथातन्नोपपद्यते। तस्माद्वाक्यभेदोऽपि न दोषाय।आनर्थक्याद्वाक्यभेदो वरमिति।

द्वितीयं वर्णकमारचयति अथवेत्यादिना । सच्छब्द आत्मानात्मसाधारणः । तस्मादुपसंहारानुरोधेनार्थनिर्णयः।" सन्दिग्धे तु वाक्यशेषदि"ति न्यायादित्याशयेनाह -उपसंहारेति। वस्तुस्थितिं दर्शयति येनेत्यादिना।।

।।प्राणविद्यायामनग्नताबुद्धेरेव विधेयत्वा-धिकरणम्।।

सू. कार्याख्यानादपूर्वम्।

(मू)अस्ति बृहदारण्यके अष्टमेऽध्याये प्रथमे काण्डे प्राणविद्या। तत्र "प्राणस्वाश्वभ्य" इत्यादि श्वादिमर्यादं अन्नमाम्नाय"यापो वास" इति वासश्चाम्नाय पश्चादाम्नायते "तद्विद्वांसः श्रोत्रिया अशिष्यन्त आचामन्ति अशित्वाचामन्ति एतमेव तदेनमनग्नं कुर्वन्तो मन्यन्ते तस्मादेवंविधशिष्यं नाचामेदशित्वा चाचामेत् एतमेव तदनमनग्नं कुरुत" इति। काण्वास्तु "तस्मादेवमि"त्यादि न पठन्ते। तथास्ति छान्दोग्ये पञ्चमाध्याये आद्यखण्डद्वये प्राणविद्या। तत्र द्वितीये खण्डे "प्राणस्य अश्वभ्य" इत्याद्यश्वादि-

मर्यादमेवान्नमाम्नाय" किं मे वासो भविष्यती"- ति "आप इति होचुरि"ति आप एव वासश्चाम्नाय पश्चादाम्नायते" तस्माद्वा एतस्मादशिष्यन्त पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधति लम्भको ह वाससो भवत्यनग्नं भवती"ति।

तत्र उभयत्र संशयः किमत्राचंमनमनग्नताचिन्तनं चेत्युभयं विधीयते किं वाचमनमेवाथवानग्नताचिन्तनमेवेति।

तत्रोभयस्याप्यवगम्यमानत्वात् उभयमपि विधीयत इति चेत्। उच्यते। माध्यन्दिनानां पाठे आचामेदिति विधिविभक्तिश्रवणाद्वाचमनमेव विधीयत इतीति प्राप्ते,

ब्रूमः। विधायकशास्त्रस्याप्राप्तपरत्वात् स्मृतिप्राप्तमाचमनम-नूद्यानग्नताचिन्तनमप्राप्तमेवात्र विधीयत इति।

(टि) इदानीमाचामेदिति विधिविभक्तिश्रवणादनग्नताचिन्तने च तदश्रवणात् तत्प्राप्तिविधिकल्पनायां वाक्यभेदप्रसङ्ग.ादाचमनमेव विधेयमित्याशङ्क्.य परिहरति-विधायकेति। "अप्राप्ते शास्त्रमर्थवदि" - ति हि न्याय इति भावः।।

।। शाण्डिल्यविद्यायाः समानताधिकरणम्।।

सू. समान एवं चाभेदात्।।

(मू) वाजसनेयिशाखायामग्निरहस्यब्राह्मणे शाण्डिल्यविद्याम्नाता "स आत्मानमुपासीते"ति। तत्र गुणाः श्रूयन्ते "मनोमयं प्राणशरीरं भारूपमि"त्येवमादयः। पुनस्तस्यामेव शाखायां बृहदारण्यके सप्तमे अध्याये अष्टमे ब्राह्मणे सैव विद्या श्रूयते "मनोमयोऽयं पुरुषः भासत्य" इत्यादि।

तत्र संशयः - किमग्निरहस्यबृहदारण्यकयोर्द्वे विद्येगुणानुपसंहारश्च उतैकविद्या उतोपसंहारश्चेति।

तत्र एकस्यां शाखयामेकस्या एव विद्यायाः उभयत्र कथने पौनरुक्त्यप्रसङ्ग.ात् द्वे विद्ये गुणानुपसंहारश्चेति प्राप्ते,

ब्रूमः। उपास्यात्मकविद्या रूपाभेदात् एकैव विद्या गुणोपसंहारश्चेति। एकत्र विद्याविधानार्थं वचनम्, अन्यत्र गुण-विधानार्थमिति न पौनरुक्त्यप्रसङ्ग.इति।।

(टि) एवं शाखाभेदे विद्यैक्यं गुणोपसंहारं च प्रपञ्च्याधुना शाखैक्येऽपि तदुभयं प्रतिपाद्यते। पौनरुक्त्यं निराकरोति एकत्रेत्यादिना। अग्निरहस्ये विद्याविधानं बृहदारण्यके च तदनुवादेन सर्वेशानत्वादयो गुणा विधीयन्ते यथा"ग्निहोत्रं जुहोति दध्ना जुहोती"ति तथाग्निरहस्ये पठितानामेव मनोमयत्वादिगुणानां बृहदारण्यके पाठस्तु प्रत्यभिज्ञानार्थमिति नांशतोऽपि पौनरुक्त्यमित्यभिप्रायः।

।। नाम्नोर्व्यवस्थाधिकरणम्।।

सू. सम्बन्धादेवमन्यत्र।।

(मू) बृहदारण्यके सप्तमे अध्याये पञ्चमे ब्राह्मणे "सत्यं ब्रह्मे"त्युपक्रम्य षष्ठे "तद्यत् तत् सत्यं असौ य आदित्यो य एष मण्डले पुरुषः यश्चायं दक्षिणेऽक्षन् पुरुष" इति तस्यैव सत्यस्य ब्रह्मणोऽधिदैवतमध्यात्कं चायतनमुपदिश्य सप्तमे व्याहृतिशरीरत्वं चोपदिश्य द्वे उपनिषदावुपदिश्येते "तस्योपनिषत् अहरिती"ति "तस्योपनिषद् अहमिती"ति च। एका हीयं सत्यविद्या वक्रमा... भेदात्। तत्र तस्याधिदैवतमित्यस्यादित्यपुरुषस्याहरिति नाम। तस्याधिदैवतमित्यस्यादित्यपुरुषस्याहमिति नाम। तस्याध्यात्मिकाक्षिपुरुषस्याहमिति नामेत्यर्थः।

तत्र संशयः-किमुभे अपि नामनी उभयत्रानुसन्धातव्ये उत विभागेनेति।

तत्र एकविद्यासम्बन्धात् उभये {भे} उभयत्रानुसन्धातव्ये इति प्राप्ते,

ब्रूमः। तस्येति तद्वृत्तेनायतनविशेषविशिष्टस्य परामर्शात् विभागेनेति।।

(टि) एवे विद्यैक्ये गुणोपसंहारं प्रतिपाद्य सम्प्रति विद्यैक्येऽपि गुणनुपसंहारः प्रतिपाद्येत। तच्छब्देन विभागः सिध्यतीत्याशयेनयाह - तस्येति।।

।। सम्भृत्यादीनामनुपसंहाराधिकरणम्।।

सू. सम्भृतिद्युव्याप्त्यपि चातः।।

(मू) राणायनीयानां खिलेषु "ब्रह्म ज्येष्ठावीर्या सम्भृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान"त्येवं वीर्यसम्भृतिषु निवेशादयो ब्रह्मणो विभूतयः पठ्यन्ते। तेषामेव चोपनिषदि शाण्डिल्यविद्यादि ब्रह्मविद्याश्च पठ्यन्ते।

तत्र संशयः - किं तासु ब्रह्मविद्यासु वीर्यसम्भृत्यादिब्रह्मविभूतयः उपसंह्रियेरन् उत नेति।

तत्र ब्रह्मसम्बन्धादुपसंह्रियेरन्निति प्राप्ते,

ब्रूमः। शाण्डिल्यादिविद्यासु पूर्ववदायतनविशेषश्रवणान्नोपसंह्रियेरन्निति।शाण्डिल्यादिविद्यासु हृदयाद्यायतनविशेषाः श्रूयन्ते । तथा च यथा पूर्वाधिकरणे आयतनविशोषान्नामानुपसंहार एव उक्तः तथात्रापीति। अत्र ब्रह्मण एकत्वात् विद्यैक्याशङ्कात्र तर्हि सर्वविद्यैक्यप्रसक्तिरित्युत्तरम्।।

(टि) इदानीं पूर्वन्यायातिदेशः क्रियते। तत्र वैयर्थ्यमाशङ्क्याह अत्रेत्यादिना।।

।। पुरुषविद्याया विभिन्नताधिकरणम्।।

सू. पुरुषविद्यायामिव चेतरेषामनाम्नानात्।।

(मू) ताण्डिनां पैङ्गिनां च रहस्यब्राह्मणे छान्दोग्ये तृतीयाध्याये षोडशखण्डे "पुरुषो वाव यज्ञ" इति पुरुषविद्या श्रूयते। तत्राशीर्मन्त्रप्रयोगादयो धर्माः श्रूयन्ते। तैत्तिरीयके "तस्यैवंविदुषो यज्ञस्यात्मा यजमान" इत्यादि श्रूयते।

तत्र संशयः - किं विद्यैक्यात् आशीर्मन्त्रप्रयोगादिधर्माः तैत्तिरीयपुरुषविद्यायामुपसंहर्तव्या उत विद्याभेदान्नोपसंहर्तव्या इति।

तत्र मरणावभृथसमान धर्मश्रवणद्विद्यैक्यादुपसंहर्तव्या इति प्राप्ते,

ब्रूमः। बहुगुणभेदश्रवणात् क्रियाभेदान्नोपसंहर्तव्या इति।।

(टि) एवं देशभेदादनुपसंहारमुक्त्वेदानीं कालभेदादनुपसंहार उच्यते। तैत्तिरीयके ससन्यासात्मविद्यामुपदिश्य" तस्यैवंविदुष" इत्युपक्रमते नेतरत्रेति। कालभेद इति। बहुगुणेति। तस्मान्न प्रत्यभिज्ञमित्याभिप्रायः।।

।। वेधाद्यधिकरणम्।।

सू. वेधाद्यर्थभेदात्।।

(मू) आथर्वणिकानामुपनिषदामारम्भे - "सर्वं {प्र}विध्यहृदय {प्र} विध्येत्यादयो मन्त्राः पठ्यन्ते। वाजसनेयिनां तु उपनिषदारम्भे "देवा वै सत्रं निषेदु"रित्यादि प्रवर्ग्यब्राह्मणं पठ्यते। एवमन्येषामपि द्रष्टव्यम्।

तत्र संशयः - किं सर्वमित्यादयो मन्त्राः प्रवर्ग्यादिकर्माणि च विद्यासूपसंह्रियेरन्निति प्राप्ते,

ब्रूमः। श्रुतिलिङ्ग.ादिना कर्मार्थत्वावधारणान्नोपसंह्रियेरन्निति। सन्निधिश्च श्रुतिलिङ्ग.ाभ्यां दुर्बल इति तेनोपंसहारसिद्धिरिति।।

(टि) इदानीं मन्त्रयज्ञप्रसङ्गे.न मन्त्राणां यज्ञानां च विद्याङ्ग. त्वमाशङ्क.्य परिहरति श्रुतिलिङ्ग.ादिनेति। आदिशब्देन वाक्यप्रकरणे गृह्येते। तत्र हृदयं विध्ये"त्यादिमन्त्राणां लिङ्गे.नाभिचारकर्मणि विनियोगः। प्रवर्ग्यस्य च "पुरस्तादुपसदां प्रवृणक्ती"ति वाक्येन ज्योतिष्टोमे विनियोग इति ध्येयम्।।

।।ज्ञानिनः कर्मणां हान्युपायनाधिकरणम्।।

सू. हानौ तूपायनशब्दशेषत्वाकुशा -च्छन्दः स्तुत्युपगाानवत्तदुक्तम् ।।

(मू) मुण्डके "तदा विद्वान् पुण्यपापे विधूये"ति विदुषः पुण्यपापहानिः श्रूयते। एवमन्यत्रापि क्वचित् "तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्यामि"ति पुण्यपापयोः सुहृदि द्विषति च उपयनं पठन्ति। कौषीतकिनस्तु "तत् सुकृतदुष्कृते विधूनुते तस्य प्रिया ज्ञातयः सुकृतमुपयन्ति अप्रिया दुष्कृतमि"ति हानमुपायनं च पठन्ति। तत्र यत्र हानमुपायनं च श्रूयते तत्र न किञ्चिद्वक्तव्यमस्ति यत्र तूपायनमात्रं श्रूयते तत्रार्थाद्धानमपि सिध्यति। यत्र तु हानमेव श्रूयते तत्र संशयः - किमुपयनमत्र सन्निपतेन्न वेति।

तत्राश्रवणान्नेति प्राप्ते,

ब्रूमः। कौषीतकिरहस्ये हानसन्निधौ श्रूयमाणस्योपायनस्य हानं प्रति शेषत्वावगमात् उपायनमप्यत्र सन्निपतेदिति।

इदं त्ववधेयम् -न हानमुपायनं चानुष्ठेयत्वेन श्रूयते किन्तु स्तुत्यर्थत्वेन उपायनोपसंहारोऽपि तथैवेति।

अत्र स्तुत्यपसंहारो न गुणोपसंहार इति।।

अथवात्रैवैवं संशयः - किं विधूननवचनेन चलनमभिधीयते अथवा हानमिति।

तत्र धूञः कम्पनार्थत्वात् चलनमभिधीयत इति प्राप्ते,

ब्रूमः। वाक्यशेषे "उपयन्ती"ति श्रूयमाणस्योपायनस्य हानं विना अनुपपत्तेर्हानमेवात्र विधूननशब्देनाभिधीयत इति।।

(टि) सन्निधिप्रसङ्गादिदमारभ्यते। अत्र विशेषमाह इदं त्वित्यादिना। अत्र द्वितीयं वर्णकं रचयति अथवेत्यादिना।।

।।उपासकानां कर्मत्यागव्यवस्थाधिकरणम्।।

सू. साम्पराये तर्तव्याभावात्तया ह्यन्ये।।

(मू) कौषीतकिनः पर्यङ्कविद्यायामामनन्ति -"स एतं देवयानं पन्थानमापद्य"त्युपक्रम्य "आगच्छ विरजां नदीं तां मनसैवात्येति तत्सुकृतदुष्कृते विधूनुत इति। तत्र संशयः - किं मार्गमध्ये विराजं नदीतरणानन्तरं सुकृतदुष्कृतत्यागः उत आदावेव देहादपसर्पणसमय इति।

तत्र नदीतरणानन्तरं त्यागः तथैव श्रवणादिति प्राप्ते,

ब्रूमः। सुकृतदुष्कृतत्यागस्य विद्याहेतुत्वात् विद्योत्पत्त्यनन्तरमेव सुकृतदुष्कृतत्याग इति।।

(टि) इदानीं प्रसङ्गाद्धानावसरो निरूप्यते। विद्याहेतुत्वादिति। लिङ्गेन क्रमो बाध्यत इति भावः।।

।। उपासनया ब्रह्मलोकगन्तृणामेव मार्गव्यवस्थाधिकरणम्।।

सू. गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः।।

(मू) पुण्यपापहानसन्निधौ क्वचित् सगुणब्रह्मोपास्ति स्थले देवयानः पन्था अर्चिरादिः श्रूयते क्वचिच्च निर्गुणविद्यास्थले नश्रूयते। किं देवयानः पन्थाः सर्वत्र सन्निपतेत् उत निर्गुणविद्यास्थल इति। तत्रोपायनवशात् हानसन्निधौ श्रुतिनिर्गुणविद्यास्थले देशान्तरप्राप्त्य भावाच्च पथ आनर्थक्यमिति।।

(टि) इदानीं पथोऽप्युपायनवत् सार्वत्रिकत्वमाशङ्क्य निराकरोति। क्वचिदित्यस्य व्याख्यानं सगुणेति निर्गुणेति च ।।

।। सर्वास्वेवोपासनासु मार्गकल्पनाधिकरणम्।।

सू. अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम्।।

(मू) कासुचित् सगुणविद्यासु पन्थाः श्रूयते। यथा पर्यङ्कोपकोसलपञ्चाग्निदहरविद्यासु। कासुचिन्न श्रूयते, यथा मधुशाण्डिल्यषोडशकलवैश्वानरविद्यासु।

तत्र संशयः - किं यासुश्रूयते तास्वेवेति नियमः उतानियमः समेन सर्वासामिति।

तत्र प्रकरणस्य नियामकत्वात् नियम इति प्राप्ते,

ब्रूमः। तद्यथा इत्थं विदुरित्यादिवाक्यादनियमेनेति।

प्रकरणाच्च वाक्यं बलीय इति।।

(टि) तर्हि सगुणविद्यास्वपि सर्वत्र पन्थानस्योन्यादित्याशङ्क्य निराकरोति कासुचिदिति।।

।। ज्ञानिनां तत्त्व मुक्तिनैयत्याधिकरणम्।।

सू. यावदधिकारमवस्थितिराधिकारिकाणाम् ।।

(मू) विदुषो वर्तमानदेहपातानन्तरं देहान्तरमुत्पद्यते न वेति संशयः। तत्रावान्तरतमः प्रभृतीना केषाञ्चिद् ब्रह्मविदामितिहासपुराणादिषु देहान्तरोत्पत्तिदर्शनाद् विदुषो देहान्तरमुत्पद्यत इति प्राप्ते,

ब्रूमः। तेषामपि छान्दोग्ये षष्ठाध्याये चतुर्दशे खण्डे श्रूयते "तावदेवास्य चिरमि"ति यावत् प्रारब्धकर्मैव शरीरावस्थितिरि{ति} श्रुतेः न विदुषो देहान्तरमुत्पद्यत इति।।

(टि) निर्गुणविद्यायां देशान्तरप्राप्त्यभावं नमार्गइत्युक्तम्। तदाक्षिप्य समाधत्तत्ते - उत्पद्यत इति। प्राप्यत इति यावत्। यावत्प्रारब्यधकर्मेति। अनेनावान्तरतमःप्रभृतीनां शरीरसम्बन्धो व्याख्यातः।।

।। निषेधोपसंहाराधिकरणम्।।

सू. अक्षरधियां त्वविरोधः सामान्यतद्-
भावाभ्यामौपसदवत्तदुक्तम्।।

(बुहदारण्यके पञ्चमाध्याये अष्टमं ब्राह्मणं गार्गिब्राह्मणम्। तत्र श्रूयते - "एतद्वै तदक्षरं गार्गिब्राह्मणा अभिवदन्ति अस्थूलमनण्वहृस्वमदीर्घमि" त्यादि। तथा मुण्डकोपनिषदि प्रथमे श्रूयते "अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्य मग्राह्यमगोत्रमि"त्यादि। एवमन्यत्रापि संशयः - किं निषेधानामुपसंहारोऽस्ति नेति।

तत्र श्रुतिविभागान्नोपसंहार इति प्राप्ते,

ब्रूमः। सर्वत्र विशोषनिराकरणरूपब्रह्मप्रतिपादनप्रकारस्य तुल्यत्वादुपसंहार इति प्रपञ्चार्थमिदमधिकरणम्।।

(टि) इदानीं निर्गुणविद्याप्रसङ्ग.ान्निषेधोपसंहारमाह। तत्र वैयर्थ्यमाशाङ्क.्याह - प्रपञ्चार्थ मिति।

।। मन्त्रद्वयस्य विद्यैक्यताधिकरणम्।।

सू. इयदामननात्।।

(मू) मुण्डकोपनिषदि पञ्चमे श्वेताश्वतरेचाध्यात्माधिकारे "द्वा सुपर्णा सयुजे"त्यादि मन्त्रः श्रूयते। तथा कठवल्लीषु तृतीयवल्ल्यामादौ "ऋतं पिबन्तौ सुकृतस्ये"त्यादि मन्त्रः श्रूयते। तत्र संशयः- किमत्र विद्याभेदः उत विद्यैकत्वमिति।

तत्र "द्वा सुपर्णेत्यत्र एकस्य फल्भोक्तृत्वमन्यत्रो भयोरिति विशेषदर्शनात् विद्याभेद इति प्राप्ते,

ब्रूमः। जीवद्वितीयब्रह्मरूपवेद्यस्वरूपभेदात् विद्यैकत्वमिति। उभयत्रापि भोक्तुरनुवादेन परमात्मा भेदः प्रतिपाद्यते। पिबन्ताविति छत्रिन्यायेनेति द्रष्टव्यम्। तस्माद्विद्यैकत्वादधिकधर्मोपसंहार इति।।

(टि) इदानीं द्वा सुपर्णतं पिबन्ताविति मन्त्रयोर्वेद्यभेदमाशङ्क.्य परिहरति। मन्त्रार्थमाह - उभयत्रापीति। पूर्वपक्षं निराकरोति - पिबन्ताविति।।

।। उषस्त-कहोलयोः विद्यैक्याधिकरणम्।।

सू. अन्तरा भूतग्रामवत् स्वात्मनः।।

(मू) बृहदारण्यके पञ्चमेऽध्याये चतुर्थ उषस्तब्राह्मणं पञ्चमः कहोलब्राह्मणम्। तत्र उभयत्राम्नायते "यत् साक्षात् अपरोक्षात् ब्रह्म य आत्मा सर्वान्तर" इति।

तत्र संशयः - किं विद्यानानात्वं उत विद्यैकत्वमिति।

तत्र अभ्याससामर्थ्यात् विद्यानानात्वमिति प्राप्ते,

ब्रूमः। सर्वान्तरस्वात्मरूपवेद्यैकत्वाद्विद्यैकत्वमिति। अभ्यासस्तु यथा "तत्त्वमसी"ति नवकृत्व उपदिश्यते तद्वत् उपपद्यत इति।।

(टि) पूर्ववद्विद्यैक्यमत्रापीत्याह- यथा तत्त्वमसीति। तत्र हि शङ्कापनोदनार्थोऽभ्यासः। इह च उषस्तिब्राह्मणे न देहाद्यात्माशङ्कापोद्यते। कहोलब्रह्मणेन तु देहादिव्यतिरिक्तस्यात्मब्रह्मत्वशङ्कापोद्यत इत्यर्थवत्त्वादुभयोरिति। तच्च वाक्यशेषयोः स्पष्टम्।।

।। देहादित्यमण्डलवर्त्युपासनाया विद्याभेदाधिकरणम्।।

सू. व्यतिहारो विशिंषन्ति हीतरवत्।।

(मू) ऐतरेयकोपनिषदि द्वितीयेऽध्याये चतुर्थे खण्डे श्रूयते - "तद्योऽहं सोऽसौ योऽसौ सोऽह"- मिति। यः देहेन्द्रियादिसाक्षी अहं जीवः सः जीवः असौ आदित्यपुरुषः परमात्मायं असौ परमात्मा सोऽहमिति अन्योऽन्यव्यतीहारेण मतिः कर्तव्येत्यर्थः।

तत्र संशयः - किं सेयं मतिः उभयरूपा कर्तव्या उतैकरूपेति।

तत्र जीवेश्वरयोरेकत्वं विहाय अन्यस्य कस्यचिद्वस्तुनः वेद्यत्वाभावात् एकरूपैव मतिः कर्तव्येति प्राप्ते,

ब्रूमः। व्यतीहाराम्नानसामर्थ्यात् एकत्वद्रढीकरणायोभयरूपमतिः कर्तव्येति।।

(टि) पूर्वाधिकरणे "तत्त्चमसी"त्येकत्वोपदेशवाक्योदाहरणप्रसङ्गादेकत्वोपदेशकवाक्यस्यार्थो विचार्यते ऐतरेयेति।।

।। सत्यविद्याधिकरणम्।।

सू. सैव हि सत्यादय:।।

(मू) बृहदारण्यके सप्तमाध्याये चतुर्थे ब्राह्मणे श्रूयते - "स यो ह वैतन्महद्यक्षं प्रथमजं वेदस्य सत्यं ब्रह्मेति जयतीमान् लोकानि"ति। तथा तस्मिन्नेव षष्ठे ब्राह्मणे श्रूयते - "तद् यत्तत् सत्यं असौ स आदित्य"इत्यादि, पुनश्च सप्तमे ब्राह्मणे "हन्ति पाप्मानं जहाति च य एवं वेदे"ति। यक्षं पूज्यमित्यर्थ:। प्रथमजं हिरण्यगर्भमित्यर्थ:। जहतीति हन्तीति च फलश्रुति:।

तत्र संशय: - किञ्चैते सत्ये विद्ये उतैकेति।

तत्र फलभेदात् द्वे इति प्राप्ते,

ब्रूम:। तद्यत्तदिति प्रकृतपरामर्शिन तच्छब्देनोपास्यैकत्वादेकैव विद्येति।हिरण्यगर्भेऽत्र उपास्य:।

(टि) आदित्यपुरुषप्रसङ्गादिदमारभ्यते - एकैवेति। न ह्येकस्यानेकफलत्वमनुपपन्नमिति भाव:।।

।। दहरहार्दाकाशयोरुपसंहाराधिकरणम्।।

सू. कामादीतरत्र तत्र चायतनादिभ्य:।।

(मू9 छान्दोग्ये अष्टमाध्याये प्रथमे खण्डे "अथ यदस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाश" इति उपक्रम्य श्रूयते "एष आत्मापहतपाप्मा विरजो विमृत्युर्विशोको विजिघित्सो विवास: सत्यकाम: सत्यसङ्कल्प" इत्यादि। तथाबृहदारण्यके षष्ठेऽध्याये चतुर्थे ब्राह्मणे श्रूयते- "स वा एष महानज आत्मा योऽयं विज्ञानमय: प्राणेषु एषोऽन्तर्हृदय

आकाशः तस्मिन् शेते सर्वस्य वशीत्या"दि।

तत्र संशयः - किं सत्यकामादयो वशित्वादयश्च गुणाः परस्परमुपसंहर्तव्या उत नेति।

तत्र सगुणनिर्गुणत्वकृतविद्याभेदात् नोपसंहर्तव्या इति प्राप्ते,

ब्रूमः। हृदयरूपायतनवेद्यब्रह्मादीनां बहूनां सामान्यस्य दर्शनादुपसंहर्तव्या इति।।

अत्रेदमवधेयम्। बृहदारण्यके "नेति नेतीत्यात्मे"- त्युपसंहारदर्शनात् निर्गुणमेव ब्रह्मोपदिश्यत इति। स्तुत्यर्थमेव गुणा उपसंह्रियन्ते चेति।।

(टि)इदानीं सगुणनिर्गुणविद्याप्रकरणे श्रूयमाणानां स्तुतिध्यानोपयोगिनां गुणानामुपसंहारं दर्शयति। निर्गुणविद्यायां गुणोपसंहारोव्यर्थ इत्या- शङ्क्याह अत्रेदमित्यादिना।।

।। उपवासे प्राणाहुतिलोपाधिकरणम्।।

सू. आदरादलोपः।।

(मू) छान्दोग्ये पञ्चमाध्याये एकादशखण्डे "आत्मानं वैश्वानरमि"ति वैश्वानरविद्यामुपक्रम्य "तद्यत् भक्तं प्रथममागच्छेत् तद्धोमीयमि"त्यादिभिः एकोनविंशतिभिः पञ्चभिःखण्डैः पञ्च प्राणाहुतीर्विधाय तासु प्राणाहुतिषु चतुर्विंशे खण्डे" य एवं विद्वानग्निहोत्रं जुहोती"ति अग्निहोत्रशब्दः प्रयुक्तः । ततश्च तस्मात् प्राणाहुतयः प्राणाग्निहोत्रमित्युच्यते

तत्र संशयः - किं भोजनलोपे प्राणाग्निहोत्रस्य लोपोऽस्ति नेति।

तत्र वैश्वानरविद्यायां एव जाबालिश्रुतौ प्राणाग्निहोत्रस्यादरतावगमात् भोजनलोपे न लोप इति प्राप्ते,

ब्रूमः। "तद्यद् भक्तं प्रथममागच्छेत् तद्धोमीयमि" - त्यनेन प्राणाग्निहोत्रस्य साधनत्वेन भोजनार्थद्रव्यविधानात् भोजनलोपे प्राणाग्निहोत्रस्य लोप इति। नच द्रव्यरूपगुणलोपे मुख्यस्य लोपासम्भवात् भोजनलोपेऽपि अद्भिरन्येन वाविरुद्धद्रव्येण प्रतिनिधिन्यायेन प्राणाग्निहोत्रानुष्ठानं कर्तव्यमिति शङ्क्यम्। परार्थद्रव्यसाध्यत्वेन प्राणाग्निहोत्रस्य द्रव्यप्रयोजकत्वाभावात् प्रतिनिधयसम्भावादिति।।

(टि) इदानीं सगुणविद्याप्रसङ्गेन तदङ्गभूता प्राणाहुतिश्चिन्त्यते - प्राणाग्निहोत्रस्य लोप इति। "पूर्वोऽतिथिभ्योऽश्नीयादि"त्यादरवचनं तु भोजनप्रसक्तौ प्राथम्यविधानार्थं द्रष्टव्यमिति भावः।।

।। अङ्गावबद्धोपास्यनैयत्याधिकरणम्।।

सू. तन्निर्धारणानियमस्तद्दृष्टेः पृथगद्दश्यप्रतिबन्धः फलम्।।

(मू) छान्दोग्ये प्रथमाध्याये आदौ "ओमित्येतदक्षरमुद्गीथमुपासीते" त्यारभ्य कर्माङ्गभूतोद्गीथाश्रयणप्राणाद्युपासनानि विहितानि।

तत्र संशयः - किमेतानि पर्णतादिवन्नित्यानि उत गोदोहनादिवत् काम्यान्यनित्यातीति।

तत्रानारभयाधीतवन्नित्यवत् प्रकृतिगामिनामेषां प्रयोगवचनग्रहणात् नित्यानीति प्राप्ते,

ब्रूमः। पृथक्फलश्रवणादनित्यानि काम्यानीति।।

(टि) इदानीं प्राणाहुत्यनित्यत्वप्रसङ्गेन कर्माङ्गसम्बन्धोपासना नामनित्यत्वमुच्यते - छान्दोग्य इति।।

।। वायुप्राणोपसनयोः प्रयोगभेदाधिकरणम्।।

सू. प्रदानवदेव तदुक्तम्।।

(मू) छान्दोग्ये चतुर्थध्याये तृतीये खण्डे संवर्गविद्यायां "अधिदैवतं वायुर्वाव संसर्ग" इत्यादिना वायुरुपास्यत्वेनोपदिष्टः "अध्यात्मं च प्राणो वाव संसर्ग" इति प्राणः।तथा बृहदारण्यके तृतोयेऽध्याये पञ्चमे ब्रह्मणे " वदिष्याम्येवाहमिति वाग्दध्र इत्यारभ्य "योऽयं मध्यमः प्राणः तानि ज्ञातुं दध्रिरे अथवैन श्रेष्ठ"इति अध्यात्मं वागादीनां प्राणः श्रेष्ठउक्तः "ज्वलिष्याम्येवाह"मिति। "अग्नीध्र" इत्यारभ्य "स यथैषां प्राणानां मध्यमः प्राणः एवमेतासां देवतानां वायुरित्यधिदैवतमग्न्यादीनां वायुः श्रेष्ठ उक्तः।

तत्र संशयः - किं वायुप्राणौ पृथगेवोपगन्तव्यौ उतापृथगिति।

तत्र वायुप्राणयोः तत्वाभेदात् अपृथंगेव चिन्तयितव्याविति प्राप्ते, ब्रूमः। तत्त्वाभेदेऽपि पृथगुपदेशसामर्थ्यात् पुथगेव वायुप्राणावनुचिन्तयितव्याविति।

इदं त्ववधेयम् - इहैका विद्या अध्यात्माधिदैवभेदात् प्रवृत्तिभेदः सायम्प्रातःकालभेदात् अग्निहोत्रस्यैवेति।।

(टि) इदानीं फलपृथक्त्वप्रसङ्गे.नोपगमनपृथक्त्वं निरूपयति। अत्रोपासनाप्रयोग एव भिद्यत इति दर्शयन्नाह - इदं त्वित्यादिना।।

।।मनश्चिदादीनां स्वतन्त्रताधिकरणम्।।

सू. लिङ्ग.भूयस्त्वातद्धि बलीयस्तदपि।।

(मू) वाजसनेयके अग्निरहस्ये "नैव वा इदमग्रे सदासी" -

दित्यास्मिन् ब्राह्मणे मनोऽधिकृत्य श्रूयते "षदत्रिंशतं सहस्राण्यपश्यदात्मनोर्कात्मनो मयात्मना चित" इत्यादि। तथैव "वाक्चित: प्राणचित: चक्षुश्चित: श्रोत्रचित: कर्मचित अग्निचित"इत्यादि।

तत्र संशय: - किमेते मनश्चिदादय: कर्माङ्ग.भूता उत स्वतन्त्रा: केवलविद्यात्मका इति।

तत्र प्रकारणात् कर्माङ्ग.भूता इति प्राप्ते,

ब्रूम:। "ते हैते विद्याचित एवे" त्यवधारण श्रवणात् केवलविद्यात्मिका इति। पुरुषस्य शतसंवत्सरमिति आयुषि षटिंशत्सहस्राणि दिनानि भवन्ति। तत्रैकस्मिन् दिने या मनोवृत्ति: स एकाग्नित्वेन ध्येया। एवं ध्यातव्या अग्नय: षट्त्रिंशत्सहस्राणि सम्पद्यन्ते। ते प्रत्यगात्मत्वेन ध्येयास्तानि चिन्तनं निगमनश्चित एवं वाग्विदादयोऽपीति।।

(टि) वायुसम्बद्धविद्याचिन्तनानन्तरमग्निविद्या चिन्त्यते । श्रुत्यर्थमाह - पुरुषस्येत्यादिना ।।

।। आत्मनो देहातिरिक्तत्वाधिकरणम्।।

सू. एक आत्मन: शरीरे भावात्।।

(मू) किं देह एवात्मा उत देहातिरिक्त इति संशय:।

तत्र चेतनस्यात्मनो देहान्वयव्यतिरेकात् देह एव आत्मेति प्राप्ते,

ब्रूम:। मृतदेहव्यभिचारात् देहातिरिक्त एव चेतन आत्मेति। देहधर्मश्चैतन्ये अतो देह एवात्मेति लोकायतिकमतं न युक्तं ऋतेव्ययभिचारादिति सिद्धम् देहातिरिक्त आत्मेति।।

(टि) पूर्वं मनश्चिदादीनां क्रत्वसङ्ग.त्वनिराकरणेन पुरुषार्थत्वं प्राप्तम्। तत्र कोऽसौ पुरुष इति चिन्त्यते। किं देह इति।।

।। उक्थादिधियोः शाखान्तरेऽनुवृत्त्याधिकरणम्।।

सू. अङ्ग.ावबद्धास्तु न शाखासु हि प्रतिवेदम्।।

(मू) छान्दोग्ये प्रथमाध्यायादौ श्रूयते- "ओमित्येतदक्षरमुद्गीथ-मुपासीते"ति। एवमैतरेयादिषु श्रुता उक्थोपासनादयोऽपि उदाहर्तव्याः।

तत्र संशयः - किमेता : कर्माङ्ग.ाश्रिताः उपास्तस्तः

त्तच्छाखागतेषूद्गीथादिष्वेव स्युरुत सर्वशाखागतेष्विति।

तत्र सन्निधानविशेषात् तच्छाखागतेष्वेव स्युरिति प्राप्ते,

ब्रूमः। उद्गीथादिश्रुत्यविशेषात् सर्वशाखागतेष्विति। स्वरादिभेदात् उद्गीथादिभेदोपन्यास इति।।

(टि) प्रासङ्गि.कं समाप्य प्रकृतमारभते। तत्र कथमुद्गीथादीनां भेद इत्यत्राह - स्वरभेदादिति।।

।।वैश्वानरविद्यायां समस्तोपासनाधिकरणम्।।

सू. भूम्नः क्रतुवज्ज्यायस्त्वं, तथाहि दर्शयति।।

(मू) छान्दोग्ये पञ्चमाध्याये "प्राचीनशाल" इति एकादशखण्डमारभ्य चतुर्दशखण्डी वैश्वानराख्यायिका।

तत्र "औपमन्यवकमि"त्यादिभिः षड्भिः खण्डैः द्युलोकादित्यवाध्वाकाशाप्पृथवीषुव्यस्तेषु वैश्वानरोपास्तिरुपदिष्टा। तथा "तान् होवाचे"त्यस्मिन् खण्डे "एतस्य ह वा एतस्य" त्यादिना समस्तेष्वप्युपास्तिरुपदिष्टा।

तत्र संशयः - किं व्यस्तोपासनं समस्तोपासनं चोभयं विवक्षितं उत समस्तोपासनमेवेति।

तत्र प्रत्यवयवमुपास्त इति श्रवणात् उभयं विवक्षितमिति प्राप्ते,

ब्रूमः। "मूर्धा तेव्यपतिष्यदि"त्यादिभिर्व्यस्तोपासनं निन्दित्वा समस्तोपासनविधानात् समस्तोपासनमेवात्र विवक्षितमिति।।

(टि) इदानी वैश्वानरोपासना तत्तदङ्ग.विशेषणालम्बना न भवतीति प्रतिपाद्यते। नहि निन्दितस्य निन्दा युक्ते त्याशयेनाह - मूर्धात इति।।

।। शाण्डिल्यादिविद्यानां भिन्नताधिकरणम्।।

सू. नानाशब्दादिभेदात्।।

(मू) सर्वशाखाधीतानां सर्वासां विद्यानामेकत्वं उत नानात्वमिति संशयः।

तत्र ब्रह्मणे वेद्यस्यैकत्वात् विद्यानामेकत्वमिति प्राप्ते,

ब्रूमः। शब्दादिभेदान्नानात्वमिति। वेद उपासीत क्रतुं कुर्वीतेत्यादिः शब्दभेदः शब्दान्तरादयः कर्मभेदहेतव एव यथासम्भवं विद्याभेदे हेतव इति बोध्यम्।।

(टि) पूर्वाधिकरणे समस्तोपास्तिप्राशस्त्यकथनान्न कृत्स्नोपास्तीनामैक्ये प्राशस्त्यमाशङ्क.च्य निराकरोति किमित्यादिना।।

।। अहङ्ग्रहविद्यायां विकल्पनियमाधिकरणम्।।

सू. विकल्पोऽविशिष्टफलत्वात्।।

(मू) किं विद्यानां समुच्चयो विकल्पो वेत्यनियमः उत विकल्प एवेति संशयः।

तत्र नियामकाभावादनियम इति प्राप्ते,

ब्रूमः। विद्याविषयसाक्षात्कारैकफलत्वात् साक्षात्कारार्थानां विद्यानां विकल्प एवेति। समुच्चयपक्षे चित्तविक्षेपप्रसङ्ग.ात् साक्षात्कारासिद्धिरेव स्यादिति न समुच्चय इति बोध्यम् ।।

(टि) एवं विद्याभेदं प्रसाध्य तदनुष्ठानभेदं साध्यति किं विद्यानामित्यादिना।।

।। लौकिकप्रतीकेषु याथाकाम्याधिकरणम्।।

सू. काम्यास्तु यथाकामं समुच्चीयेरन् न वा पूर्वहेत्वभावात्।।

(मू) अहङ्ग्रहोपासनानां विकल्प इत्युक्तम्। तत्र किं छान्दोग्ये सप्तमेऽध्याये प्रथमे खण्डे श्रूयते "किं ब्रह्मेत्युपास्त" इत्यादीनां काम्यानां प्रतीकोपास्तीनामपि विकल्प एव उत यथेच्छमनियम इति संशयः।

तत्र पूर्वन्यायात् विकल्प इति प्राप्ते,

ब्रूमः। साक्षात्कारफलत्वाभावादनियम इति।।

(टि) इदानीं काम्यानां समूच्चयमाह अहमित्यादिना। अनेन सङ्ग.तिरपि सूचिता।।

।। काम्याङ्ग.प्रतीकेषु याथाकाम्याधिकरणम्।।

सू. अङ्गे.षु यथाश्रयभावः।।

(मू) कर्माङ्ग.भूतोद्गीथाद्याश्रितासु विद्यासु संशयः किं समुच्चय उत यथाकाम्यमिति।

तत्राश्रयाणां उद्गीथादीनां कर्मसु समुच्चयात् तदाश्रितासु विद्यास्वपि समुच्चय इति प्राप्ते,

ब्रूमः। अङ्ग.समुच्चयवदुपासनासमुच्चये प्रमाणाभावात् यथाकाममिति। तस्मादहङ्ग.होपासिनां विकल्पः लौकिकप्रतीकोपासनानां कर्माङ्ग.प्रतीकोपासनानां च यथाकाम्यमिति सिद्धम्।।

।। इति शारीरकमींसायां तृतीयाध्यायस्य।।

।। तृतीयो गुणोपसंहारपादः।।

(टि) इदानीमङ्ग.ोपासनानां समुच्चयमाशङ्ग.च परिहरति। अधिकरणत्रयार्थं सुखग्रहणायाह तस्मादित्यादिना।।

।। इति केरलीये षोडशाध्यायीटिप्पणे।।

।।पञ्चदशाध्यायस्य।।

।।तृतीयः पादः।।

।।अथ तृतीयस्य चतुर्थः पादः।।

।।पुरुषार्थधिकरणम् - आत्मज्ञानस्य स्वतन्त्रताधिकरणम्।।

सू. पुरुषार्थेऽतः शब्दादिति बादरायणः।।

(मू) किमिदमौपनिषदमात्मज्ञानमधिकारिद्वारेण कर्माङ्ग.मुत स्वतन्त्रमेव पुरुषार्थसाध्यमिति संशयः।

तत्र देहादिव्यतिरिक्तस्य नित्यस्यात्मनो ज्ञानाभावे कर्माधिकारासम्भवात् अधिकारिसंस्कारद्वारा क्रत्वङ्ग.मात्मज्ञानमिति प्राप्ते,

ब्रूमः। छान्दोग्ये प्रथमाध्याये सप्तमे खण्डे श्रूयते "तरति शोकमात्मविदि"ति। एवमादिभिः बहुभिः श्रुतिभिः

स्वतन्त्रपुरुषार्थत्वावगमात् औपनिषदमात्मज्ञानं स्वतन्त्रमेव मोक्षरूप-प्रधानपुरुषार्थसाध्यनमिति। नच कर्तृत्वभोक्तृत्वादिरहितात्मज्ञानं कर्माङ्गं. भवति किन्तु देहादिव्यतिरिक्तत्वेन कर्तृत्वादिना च यदात्मज्ञानं तदेव कर्माङ्ग.मिति।।

।।श्रीः।।

।। अथ पञ्चदशस्य चतुर्थः पादः।।

(टि)एवं परापरब्रह्मविद्यानां गुणोपसंहारमुक्त्वा अधुना तासामेव स्वतन्त्रेण पुरुषार्थत्वं निर्गुणज्ञानस्य बहिरङ्ग.भूतानि आश्रमयज्ञादीनि अन्तरङ्ग.भूतानि शमदमनिदिध्यासादीनि च निरूपयितुं चतुर्थपाद आरभ्यते।

तत्रात्र विद्यानां पुरुषार्थत्वं प्रतिपाद्यते किमिदमित्यादिना। कर्माधिकारेति। यदि देह एव आत्मा तदा तस्य परलोकागामित्वात् फलभोक्तृत्वं न युज्यत इति फलसाम्यरूपाधिकारसिद्धिरिति भावः। द्विविधं हि देहव्यतिरिक्तात्मज्ञानं परलोकगामिकर्माङ्ग.त्वेन ज्ञानं ब्रह्मतत्त्वज्ञानं चेति। तत्राद्यं कर्माधिकारसिध्यर्थं द्वितीयं तु पुरुषार्थमिति दर्शयति नचेत्यादिना। तत्त्वविदां कर्मानुष्ठानं तु लोकसङ्ग्रहमात्रार्थमिति द्रष्टव्यम्।।

।। परामर्शाधिकरणम् -सन्यासिनएव ब्रह्मनिष्ठताधिकरणम्।।

सू. परस्परं जैमिनिरचोदना चापवदति हि।।

(मू) किमूर्ध्वरेताश्रमो यत्याश्रमो नास्ति उतास्तीति संशयः।

तत्र विध्यभावात् नास्तीति प्राप्ते,

ब्रूमः। "ब्रह्मचर्यादेव प्रव्रजेदि"ति विधिसत्वात्‌अस्त्येव यत्याश्रम इति।।

अथवा छान्दोग्ये द्वितीयेऽध्याये "त्रयो धर्मस्कन्धा" इत्याश्रमानधिकृत्य "सर्व एते पुण्यलोका भवन्ती"ति आश्रमानुष्ठायिनां पुण्यलोकफलमभिधाय "ब्रह्मसंस्थोऽमृतत्वमे"तीति मोक्षसाधनत्वेन ब्रह्मनिष्ठा प्रतिपाद्यते।

तत्र संशयः - किमियं ब्रह्मनिष्ठा पुण्यलोककामिनामाश्रमिणामपि सम्भवति उत कर्मत्यागिनः परिव्राजकस्यैवेति।

तत्राश्रमधर्मा{न} ण्यनुष्ठाय ब्रह्मनिष्ठाया अपि कर्तुं शक्यत्वात् पूर्वेषां त्रयाणामप्याश्रमिणां सम्भवतीति प्राप्ते,

ब्रूमः। अनन्यव्यापारतारूपाया ब्रह्मणः परिसमाप्तेर्ब्रह्मनिष्ठायाः कर्मिणोऽसम्भवात् परिव्राजकस्यैव ब्रह्मनिष्ठा स्यादिति। परिव्राजकस्य तु ब्रह्मनिष्ठत्वमेव स्वाश्रमविहितं कर्मेति बोध्यम्। क्वचिदिदं न वर्णकान्तरत्वेन प्रतिपादितम्।।

(टि) इदानीमाश्रमो निरूप्यते - किमूर्ध्वरेता इति। सा च किं चतुर्ष्वप्याश्रमेष्वित्यादि भाष्यं वर्णकान्तरत्वेन व्याख्यातुं न्यायमालादिषु। तद् दर्शयति अथवेत्यादिना। क्वचिदिति। भाष्यप्रकाशिकादिष्विति द्रष्टव्यम्।।

।। रसतमत्वादीनां ध्येयत्वाधिकरणम्।।

सू. स्तुतिमात्रमुपादानादिनि चेन्नापूर्वत्वात्।।

(मू) छान्दोग्ये प्रथमाध्याये उद्गीथोपासनायां प्रथमे खण्डे श्रूयते "स एष रसानां रसतमः परम" इत्यादि। तथात्रैव षष्ठे खण्डे श्रूयते "इयमेवर्गग्निः साम"त्यादि। तथात्रैव ऐतरेयकोपनिषदि

प्रथमाध्याये द्वितीये खण्डे श्रूयते "तदिदमेवोक्थं इयमेव पृथिवी"त्यादि। एवमादिषु संशयः किमेवञ्जातीयकाः श्रुतयः उद्गीथादेस्स्तुत्यर्था उत उद्गीथाद्युपासनगुणविधायिका इति।

तत्र कर्माङ्ग.भूतोद्गीथाद्युपादानात् स्तुत्यर्था इति प्राप्ते,

ब्रूमः। मानान्तराप्राप्तत्वाद्विधायिका इति। तस्मात् रसतमत्वादिकं ध्यातव्यमिति।।

(टि) एवं "त्रयो धर्मस्कन्धा" इत्यादिषु स्तुतित्वेनावभासमानेष्वाश्रमवचनेषु विधिरभ्युपगतः। तत्प्रसङ्ग.ादङ्ग.ावबद्धेषु विद्यावचनेषु विधिः प्रतिपाद्यते - कर्माङ्ग.भूतेति। जुहूरादित्य इत्यादिवदिति भावः। मानान्तरेति। जुह्वादिवचनं तु जुह्वादीनां विधिप्राप्तत्वात् तत्संनिधावाम्नातत्वाच्च युक्तं स्तुतित्वं नैवं रसतमत्वादीनां सन्निधावुद्गीथादिविधिरस्तीति भावः।।

।।आख्यानस्य विद्यास्तुत्यर्थताधिकरणम् ।।

सू. पारिप्लवार्था इति चेन्न विशेषितत्वात्

(मू) बृहदारण्यके षष्ठेऽध्याये पञ्चमे मैत्रेयीब्राह्मणे श्रूयते - "अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः मैत्रेयी कात्यायनी चे"त्यादि। तथा कौषीतकिब्राह्मणोपनिषदि श्रूयते - "प्रतर्दनो ह वै दैवोदासिरि"त्यादि। तथा छान्दोग्ये चतुर्थेऽध्याये प्रथमे खण्डे श्रूयते - जानश्रुतिर्तपौत्रायण" इत्यादि। एवमादिषु वेदान्तपठितेष्वाख्यानेषु संशयः - किमेतान्याख्यानानि पारिप्लवार्थानि उत सन्निहितविद्यास्तुत्यर्थानीति। अश्वमेधे पुत्रादिपरिवृतायराज्ञे यन्नानाकथाकथनं विहितं "पारिप्लवनमाचक्षीत"ति तदत्र पारिप्लवशब्देनोच्यत।

तत्रख्यानसामान्यस्य पारिप्लवे विहितत्वात् पारिप्लवार्थातीति प्राप्ते,

ब्रूमः। पारिप्लवे "मनुर्वैवस्वत" इत्याद्याख्यानविशेषविधानाद्वा वेदान्तपठितान्याख्यानानि विद्यास्तुत्यर्थान्येवेति। तस्माद्विद्याप्रधानत्वं वेदान्तानामिति।।

(टि) इदानीं कथनानां विद्याविधिशेषत्वं दर्शयति बृहदित्यादिना।।

।। आत्मज्ञानस्य कर्मानपेक्षत्वाधिकरणम्।।

सू. अत एव चाग्नीन्धनाद्यपेक्षा।।

(मू) किं ब्रह्मविद्या स्वफलमोक्षसिद्धौ आश्रमकर्माणियज्ञादीन्यङ्ग.त्वेनापेक्षते न वेति संशयः।

तत्र बृहदारण्यके षष्ठेऽध्याये चतुर्थे ब्राह्मणे "यज्ञेन दानेन"त्यादिश्रवणात् अपेक्षत इति प्राप्ते,

ब्रूमः। छान्दोग्ये सप्तमे अध्याये प्रथमे खण्डे श्रूयते "तरति शोकमात्मविदि"ति । एवमादिना स्वतन्त्रपुरुषार्थसाधनत्वावगमात् नापेक्षत इति। प्रथमाधिकरणे ज्ञानस्य कर्माङ्ग.त्वं निराकृतं अत्र तु कर्मणो विद्यायां फलसिध्युपकारत्वमिति।।

(टि) एवं विद्यानां पुरुषार्थत्वमाश्रमं चोक्त्वा यज्ञानां तदङ्ग.त्वं प्रतिपादयति। तत्रात्र कर्मणां फलोपकार्याङ्ग.त्वेन विद्याशेषत्वं निराकरोति किमित्यादिना।।

।।ज्ञानोत्पत्तौ यज्ञशमदमाद्यपेक्षाधिकरणम्।।

सू. सर्वापेक्षा च यज्ञादिश्रुतिरश्ववत्।।

(मू) किं विद्यायाः स्वोत्पत्तिक्रमापेक्षास्ति उत नेति संशयः।

तत्र पूर्वन्यायात् नास्तीति प्राप्ते,

ब्रूमः। बृहदारण्यके षष्ठेऽध्याये चतुर्थे ब्राह्मणे "तमेतं वेदानुवचनेन ब्रह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेनेति, बृहदारण्यके षष्ठेऽध्याये चतुर्थे ब्राह्मणे "तस्मादेवंविच्छान्तो दान्त उपरतः तितिक्षुः समाहितो भूत्वा आत्मन्येवात्मानं पश्यती"ति च नित्यकर्मणां यज्ञादीनां शमादीनां च विद्यासाधनत्वेन विधानात् विद्यायाः स्वोत्पत्तावस्ति यज्ञाद्यपेक्षेति। तत्र विद्यासंयोगाद्विद्यायाः प्रत्यासन्नसाधनानि शमादीनि विविदिषासंयोगात् बाह्यसाधनानि यज्ञादीनीति विवेकः।।

(टि) इदानीं कर्मणामुत्पत्त्युपकारित्वेन विद्याशेषत्वमस्तीत्याह - किं विद्याया इत्यादिना।।

।। आपदि सर्वान्नभोजनानुज्ञाधिकरणम्।।

सू. सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्।।

(मू) छान्दोग्ये पञ्चमाध्याये प्राणविद्यायां द्वितीये खण्डे श्रूयते "न ह वा एवंविदि किञ्चिनान्नं भवती"ति तथा बृहदारण्यके अष्टमेऽध्याये प्रथमे ब्राह्मणे प्राणविद्यायां "अस्यानन्नं जग्धं भवति नानन्नं प्रतिगृही"तमिति। सर्वमस्य प्राणोपासकस्यादनीयं भवतीत्यर्थः। एवंविदि प्राणोपासने अन्नं भोक्तुमयोग्यमित्यर्थः।

तत्र संशयः - किमिदं सर्वान्नानुज्ञानं विद्याङ्गं. विधीयते उत स्तुत्यर्थं सङ्कीर्त्यत इति।

तत्र प्राणविद्यासन्निधानात् तद्विद्याङ्गं. विधीयत इति प्राप्ते,

ब्रूमः। स्तुत्यर्थं सङ्कीर्त्यते। अन्यथा सत्याहारशुद्धौ सत्वशुद्धिरित्यादिभक्ष्याभक्ष्यविभागशास्त्रबाधप्रसङ्गादिति।।

(टि) इदानीं यज्ञादिवच्छमादिवच्च सन्निधिपाठात् सर्वान्नाभ्यनुज्ञानस्यापि विद्याङ्ग.त्वमाशङ्क.च्य परिहरति - बाधप्रसङ्ग.ादिति। न ह्यत्र विधिः श्रूयते भवतीति वर्तमानापदेशः कल्पना तु श्रुतिबाधेन न युक्तेति भावः।।

।। यज्ञादीनामाश्रमविद्योभयहेतुत्वाधिकरणम्।।

सू. विहितत्वाच्चाश्रमकर्मापि।।

(मू) नित्यकर्मणां विद्यासाधनत्वमुक्तम्। तत्र संशयः -

किं विद्यामकामयमानस्यामुमुक्षोर्नित्यकर्माण्यनुष्ठेयानि उतानुष्ठेयानीति।

तत्र विद्यासाधनत्वाद्विद्यामकामयमानस्याननुष्ठेयानीति प्राप्ते,

ब्रूमः। नित्यत्वादनुष्ठेयातीति। यथाग्निहोत्रादीनां यावज्जीववाक्यात् नित्यत्वं सवर्गकामवाक्याच्च स्वर्गसाधनत्वेन काम्यत्वं तथा तेषामेव विविदिषावक्यात् विद्यासाधनत्वमिति न काचिदनुपपत्तिरिति।।

(टि) इदानीं सर्वान्नभक्षणवदमुमुक्षुणाश्रमकर्माणि नानुष्ठेयानीत्याशङ्क.च्य परिहरति नित्यकर्मणामिति। नित्यत्वविद्यार्थत्वयोर्विरोधमाशङ्क.च्याह - यथेति।।

।।अनाश्रमिणोऽपि ब्रह्मज्ञानाधिकरणम्।।

सू. अन्तरा चापि तु तद्दृष्टेः।।

(मू) किमनाश्रमिणां स्नातकविधुरादीनां ब्रह्मविद्यायामधिकारोऽस्ति नेति संशयः

तत्रनाश्रमिणां विद्याहेतुभूताश्रमकर्मानधिकारात् नास्त्यधिकार इति प्राप्ते,

ब्रूमः। रैक्वादीनामनाश्रमिणां ब्रह्मविद्याधिकारश्रवणात् अस्त्यधिकार इति।

इदं त्ववधेयम् - "अनाश्रमी न तिष्ठेत दिनमेकमपि द्विजः" इति "संवत्सरमनाश्रमी स्थित्वा कुहूं चरेदि"ति च स्मृतेः अनाश्रमवर्तित्वात् आश्रमवर्तित्वमेव ज्याय इति। इदं त्वत्र न भ्रमितव्यं केरलीयानां अनाश्रमित्वे तु वर्तनं युक्तमिति। निषिद्धत्वात् प्रायश्चित्तविधानाच्चेति। अनाश्रमित्वेन स्थातव्यमिति नोक्तं, किन्तु अनाश्रमिणामपि विद्याधिकारोऽस्तीति एतदेवोक्तमिति।।

(टि) इदानीमनाश्रमकर्मणामपि विद्यासाधनत्वमुच्यते किमित्यादिना। केचित् केरलीया धर्माल्लौमिकमेव प्रधानं मन्यमाना मूढा अनाश्रमी भूत्वा वृषलीं गत्वा वर्तन्ते केरलीयानामयं धर्म इति प्रत्यवतिष्ठन्ते च ते श्रुतिस्मृतिसकलेतिहासपुराणनिषिद्धस्य सद्भिर्निन्दितस्य चाचरणान्नादरणीया इति। सुहृद्भूत्वाह इदं त्वित्यादिना।।

।। आश्रमाणामवरोहनिराकरणाधिकरणम्।।

सू. तद्भूतस्य नातद्भावो जैमिनेरपि
नियमातद्रूपभावेभ्यः।।

(मू) किमुत्तमाश्रमात् यत्राश्रमात् प्रच्युतिः वनस्थगृहस्थादिपूर्वाश्रमप्रच्युतिरस्ति न वेति संशयः।

तत्र पूर्वधर्मानुष्ठानरागादिवशादस्ति पूर्वाश्रमप्राप्तिरिति प्राप्ते,

ब्रूमः। "ततो न पुनरेयादि"ति निषेधात् नास्ति प्रच्युतिरिति। नच यो यो नानुष्ठातुं श्रद्धीयते वा स तस्य धर्मो भवति किन्तु ये यं प्रति विहितः स तस्य धर्मःयुश्च निषिद्धः सोऽधर्म इति बोध्यम्। तस्मादुत्तमाश्रमात् प्रच्युतस्य कर्म विद्याहेतुर्न भवतीति।।

(टि) एवं दैवात् च्युताश्रमाणामपि विद्याधिकारमुक्त्वा बुद्धिपूर्वच्युताश्रमाणां तन्नास्तीत्युच्यते किमुत्तमेत्यादिना।।

।। ऊर्ध्वरेतस: पातित्ये प्रायश्चित्ताधिकरणम्।।

सू. न चाधिकारिकमपि पतनानुमानात्तदयोगात्।।

(मू) यदि नैष्ठिको ब्रह्मचारी प्रमादादवकीर्येत तदा किं तस्य "ब्रह्मचार्यवकीर्णे नैर्ऋतं गर्दभमालभेत"ति विहितं प्रायाश्चित्तं महापातकत्ववन्न स्यादुतोपपातकत्वात् स्यादिति।

तत्र "आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुन:।
प्रायश्चितं न पश्यामि येन शुध्येत् स आत्महा"।।

इति प्रायश्चित्ताभावात् सुराणां महापातकसत्वान्न प्रायश्चित्तमिति प्राप्ते,

ब्रूम:। महत्वादिषु महापातकेष्वपरिगणितत्वात् उपपातकत्वादस्ति प्रायश्चित्तमिति।।

(टि) इदानीमबुद्धिपूर्वप्रच्युतौ प्रायश्चित्तसद्भावं दर्शयति किमुत्तमेत्यादिना।।

।।भ्रष्टस्य कृतप्रायश्चित्तस्याप्यव्यवहार्यताधिकरणम्।।

सू. बहिस्तूभयथापि स्मृतेराचाराच्च।।

(मू) किमुत्तमाश्रमात् प्रच्युता : कृतप्रायश्चित्ता: शिष्टैर्बहिष्कार्या वा न वेति संशय:।

तत्र कृतप्रायश्चित्तत्वात् न बहिष्कार्या इति प्राप्ते,

ब्रूमः। छान्दोग्ये द्वितीयाध्याये तृतीये खण्डे "आरूढो नैष्ठिकमि"ति उदाहृतस्मरणात् बहिष्कार्या इति। तस्मात् यस्य वापत्सु प्रायश्चित्तं निषिद्धं तत् किमात्मनः उत प्रायश्चित्तासु बहिष्कार्या इति सिद्धम्।।

(टि) इदानीं कृतप्रायाश्चित्तानामपि तेषां शिष्टाव्यवहारित्वमुच्यते - किमुत्तमेत्यादिना।।

।।ऋत्विक्कृताङ्ग.ध्यानस्य स्वामिगामित्वाधिकरणम्।।

सू.स्वामिनः फलश्रुतेरित्यात्रेयः।।

(मू) अङ्गे.षूपासनेषु संशयः - किं तानि यजमानकर्तृकाणि उत ऋत्विक्कर्तृकाणीति।

तत्र "वर्षति हास्मा" इत्यादिफलस्मरणात् यजमानकर्तृकाणीति प्राप्ते,

ब्रूमः। यजमानफलसाधनकर्मकर्तृत्वेन ऋत्विजां परिक्रीतत्वात् ऋत्विक्कर्तृकाणीति।।

(टि) एवमन्येन पापकारिणा व्यवहारादन्यस्यापकारो दर्शितः। तत्प्रसङ्ग.ादधुनान्येनोपासनाकर्त्रा व्यवहारादन्यस्य फललक्षणोपकारं दर्शयति - अङ्गे.ष्विति।।

।।मौनस्य विधेयत्वाधिकरणम्।।

सू. सहकार्यन्तरविधिः पक्षेण तृतीयं
तत्त्वतो विध्यादिवत्।।

(मू) बृहदारण्यके पञ्चमाध्याये कहोलब्राह्मणे श्रूयते "बाल्यं च

पाण्डित्यं च निर्विद्याथ मुनिरि"ति । पाण्डित्यमुनिषत्तातात्पर्यनिर्णय-रूपं वेदान्तश्रवणमिति यावत्। बाल्यं रागादिराहित्यम्।

तत्र संशयः - किमत्र मुनिरिति मौनं निदिध्यासनं विधीयते न वेति।

तत्र विधायकविभक्त्यश्रवणात् न विधीयत इति प्राप्ते,

ब्रूमः। अप्राप्तत्वात् बाल्यपाण्डित्यवत् तृतीयं विद्यासहकार्यन्तरं मौनमत्र विधीयत इति।।

(टि) एवमाश्रमयज्ञादीनि शमादीनि चोक्त्वेदानीं निदिध्यासनमङ्ग. विचार्यते बृहदित्यादिना।।

।।भावशुद्धेरेव बाल्यशब्दाभिधेयताधिकरणम्।।

सू. अनाविष्कुर्वन्नन्वयात्।।

(मू) बृहदारण्यके पञ्चमाध्याये पञ्चमे कहोलब्राह्मण एव श्रूयते "बाल्येत तिष्ठास"दिति।अत्र बाल्यमनुष्ठेयतया विधीयते।

तत्र संशयः - किं बाल्यशब्देन बालस्य कर्मकामचारादिकं विधीयते उत भावशुद्धिः दम्भदर्पप्ररूढेन्द्रियत्वादिरहिततेति।

तत्र प्रसिद्धत्वात् कामचारादिकं विधीयत इति प्राप्ते,

ब्रूमः। भावशुद्धेः ज्ञानाभ्यासप्रधानोपकारित्वात् सैवाङ्ग.मत्र विधीयत इति। पतितत्वादिदोषप्रसक्तेर्न कामचारादिकमिति।।

(टि) इदानीं प्रसङ्ग.ाद्बाल्यशब्दार्थं निरूपयति पतितत्वादीति। विध्यन्तराबाधेनोपपत्तौ न विधिबाधो न्याय्य इति भावः।।

।। आत्मज्ञानस्यैहिकामुष्मिकत्वव्यवस्थाधि-करणम्।।

सू. ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात्।।

(मू) किं श्रवणादिभिरिहैव जन्मनि विद्या सिध्यति उत इह वा परत्र वेति संशयः।

तत्रैहैव जन्मनि विद्या जन्माभिसन्धाय श्रवणादिषु प्रवृत्तेरिहैव जन्मनि विद्या सिध्यतीति प्राप्ते,

ब्रूमः। ऐतरेयके पञ्चमाध्याये गर्भ एवैतच्छयनोपादेय" इत्यादि "एवमेवमुवाचे"ति कठवल्लीषु तृतीय वल्ल्यां "श्रवणायापि बहुभिर्यो न लभ्य" इत्यादिषु श्रुतिषु प्रतिबन्धसद्भावाभवकृतस्य नियमस्य दर्शनात् प्रतिबन्धकसत्वे अपरत्र प्रतिबन्धकाभावे च इहैव विद्यासिद्धिरिति।।

(टि) एवं सन्न्यासादिबाल्यान्तमुच्चावचं विद्यासाधनं निरूपितम्। अधुना विद्याजन्मसमयं निरूपयति - किं श्रवणादिभिरिति।।

।। मुक्तेरेकविधत्वाधिरणम्।।

सू. एवं मुक्तिफलानियमस्तदवस्था -
धृतेस्तदवस्थाधृतेः।।

(मू) किं मुक्तेरतिशयविशेषोऽस्ति नेति संशयः।

तत्र विद्यादिकारणप्रकर्षवशात् अस्त्यतिशयविशेष इति प्राप्ते,

ब्रूमः। निर्विशेषब्रह्मस्वरूपत्वान्मुक्तेर्नास्ति विशेष इति । तस्माद् विद्यासमकालैव मुक्तिः सा च निरतिशयानन्दस्वरूपेति सिद्धम्।।

।। इति शारीरकमीमांसायां ।।

।। तृतीयाध्यायस्य।।

।। चतुर्थः पुरुषार्थपाद।।

।। इति साधनाध्यायः।।

(टि) इदानीं यथा विद्याजन्मकालभेदस्तथा विद्याफले मोक्षे विशोषो नास्तीत्याह – किं मुक्तेरिति।।

।। इति केरलीये षोडशाध्यायीटिप्पणे ।।

।। पञ्चदशाध्यायस्य चतुर्थः पादः।।

।। समाप्तश्चाध्यायः।।

।। श्रीः।।

।। अथ चतुर्थाध्यायस्य प्रथमः पादः।।

।। श्रवणमननादीनामावृत्त्यधिकरणम्।।

सू. आवृत्तिरसकृदुपदेशात्।।

(मू) बृहदारण्यके चतुर्थेऽध्याये चतुर्थे षष्ठाध्याये पञ्चमे च मैत्रेयीब्राह्मणे श्रूयते "आत्मा व अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः मैत्रेयी"ति। तथा छान्दोग्ये अष्टमाध्याये सप्तमे खण्डे "सोऽन्वेष्टव्यः स विजिज्ञासितव्य" इति।

एवञ्जातीयकेषु संशयः – किमिदं ब्रह्मविद्यासाधनं श्रवणादिकं सकृत् कर्तव्यं उत विद्योत्पत्तिपर्यन्तमावर्तयितव्यमिति।

तत्र सकृदेव कर्तव्यं प्रयाजादिवत् तावता शास्त्रार्थस्य कृतत्वादिति प्राप्ते,

ब्रूम:"श्रोतव्य" इत्याद्यसकृदुपदेशात् अवघातादिवत् विद्यारूपफलोत्पत्तिपर्यन्तमावर्तयितव्यमिति।।

।। श्री :।।

(टि) ।। अथ षोडशस्य प्रथमः पादः।।

एवं प्रमाणस्वरूपसाधनानि निरूपितानि। अथ फलनिरूपणार्थमयमन्तिमोऽध्याय आरभ्यते।

तत्र प्रथमे पादे जीवन्मुक्तिः प्रतिपाद्यते। तत्रादावष्टभिरधिकरणैः साधनाश्रयविचारशेषः क्रियते। द्वितीये तूत्क्रान्तिप्रकारः तृतीये सगुणविदो मार्गः चतुर्थे पूर्वभागेन निर्गुणविद्याफलं उत्तरभागेन सगुणविद्याफलं च प्रतिपाद्यते।

तत्रात्र श्रवणादेरावृत्त्यनुष्ठानं साधयति - बृहदिति।।

।। आत्मत्वेन ब्रह्मणो ग्रहणाधिकरणम्।।

सू. आत्मेति तूपगच्छन्ति ग्राहयन्ति च ।।

(मू) श्रवणाद्यावृत्तिकाले य ईश्वरत्वादिशास्त्रोक्तविशेषणः परमात्मा स किमहमिति गृहीतव्यः उत मदन्य इति संशयः।

तत्र जीवपरभेदप्रत्यक्षविरोधात् मदन्यः परमामेत्येव गृहीतव्य इति प्राप्ते,

ब्रूमः। "त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि देवते" इति जाबालिश्रुत्यादिषु अहमित्येव गृहीतव्यत्वश्रवणात् अहमित्येव गृहतीव्य इति। भेदप्रत्यक्षो मिथ्यागोचर इति न तद्विरोध इति।।

(टि) इदानीं कथमीश्वरः प्रतिपत्तव्य इत्याह - श्रवणादीति।।

।। प्रतीकेऽहंदृष्टिनिराकरणाधिकरणम्।।

सू. न प्रतीके न हि सः।।

(मू) छान्दोग्ये तृतीयाध्याये अष्टादशे खण्डे श्रूयते "मनो ब्रह्मेत्युपासीतेत्याध्यात्मं अथाधिदैवतमाकाशो ब्रह्मे"ति। तथा तत्रैव एकोनविंशे खण्डे श्रूयते "आदित्यो ब्रह्मेत्यादेश" इति। तथा छान्दोग्ये सप्तमेऽध्याये प्रथमे खण्डे" स यो नाम ब्रह्मेत्युपास्त" इति।एवञ्जातीयकेषु प्रतीकोपासनेषु संशयः - किं मन आदिप्रतीकेषु अहमित्येव गृहीतव्यमुत नेति।

तत्र प्रतीकानां जीवाभिन्नब्रह्माभिन्नत्वात् अहमित्येव ग्रहीतव्यमिति प्राप्ते,

ब्रूमः। प्रतीकानामुपासकत्वाभावात् नाहमिति ग्रहीतव्य इति। ब्रह्मविकारः प्रतीकमित्युच्यते।।

(टि) इदानीं प्रतीकोपसनाप्रकारश्चिन्त्यते - छान्दोग्य इति।।

।। उपास्ये ब्रह्मदृष्ट्यधिकरणम्।।

सू. ब्रह्मदृष्टिरुत्कर्षात् ।।

(मू) तेष्वेवोदाहरणेषु संशयः - किमादित्यादिषु प्रतीकेषु ब्रह्मदृष्टिः कर्तव्या ब्रह्मण्यादित्यादिप्रतीकदृष्टिर्वेत्यनियमः उत ब्रह्मणि प्रतीकदृष्टिरेव आहोस्वित् प्रतीकेषु ब्रह्मदृष्टिरिति।

तत्र नियामकशास्त्राभावादनियम इति चेत्। उच्यते। ब्रह्मण उपास्यतार्हत्वात् ब्रह्मण्यादित्यादिप्रतीकदृष्टिः कर्तव्येत्येवं प्राप्ते,

ब्रूमः। अपकृष्टे उत्कृष्टदृष्टिकर्तव्यत्वस्य लोकप्रसिद्धत्वात् अपकृष्टत्वा {ष्टा} दित्या {त्यत्वा} दिंप्रतीकेषु उत्कृष्टब्रह्मदृष्टिरेव कर्तव्येति।।

(टि) इदानीं तु प्रतीकेष्वेव विशेषश्चिन्त्यते - तेष्विति।

।। अङ्गे.ष्वादित्यादि धीकरणताधिकरणम्।।

सू. आदित्यादिमतयश्चाङ्ग.उपपत्तेः।।

(मू) छान्दोग्ये प्रथमाध्याये तृतीये खण्डे श्रूयते - य एवासौ तपति तमुद्गीथमुपासीते"ति, तथा तत्रैव षष्ठे खण्डे श्रूयते - "इयमवर्गग्निः सामे"ति, तथा द्वितीयाध्याये द्वितीये खण्डे श्रूयते "लोकेषु पञ्चविधं सामोपासीते"ति, तथा तत्रैवाष्टमे खण्डे श्रूयते "वाचि सप्तविधं सामोपासीते"ति। असौ आदित्यः तमादित्यमित्यर्थः।

एवमादिष्वङ्ग.ावबद्धोपासनेषु संशयः - किमनियम उत आदित्यादिषु उद्गीथादिदृष्टयः कर्तव्या अथवा उद्गीथादिष्वादित्यादि-दृष्टय इति।।

तत्रोत्कर्षविशेषादनियम इति चेदुच्यते। प्रथमनिर्दिष्टत्वादादि-त्यादिषु उद्गीथादिदृष्टयः कर्तव्या इति प्राप्ते,

ब्रूमः। कर्माङ्ग.भूतानामुद्गीथादीनामेव उपासनक्रिया-संस्कार्यत्वोपपत्तेः उद्गीथादिषु आदित्यादिदृष्टय एव कर्तव्या इति।।

(टि) अथाङ्ग.ोपसनाप्रकारश्चिन्त्यते - छान्दोग्य इंति।।

।। उपासन आसनावश्यकताधिकरणम्।।

सू. आसीनः सम्भवात्।।

(मू) किमासीनः शयानः तिष्ठन् गच्छन् वोपासनानि कुर्यादित्यनियमः उपासीन एवेति नियमः इति।

तत्र मानसस्योपासनस्य शरीरावस्थितिविशेषानपेक्षत्वात् अनियम इति प्राप्ते,

ब्रूमः। आसीनस्यैव चित्तैकाग्र्यतासाध्यसमानप्रत्ययप्रवाह-करणरूपोपासनसम्भवात् आसीन एव कुर्यादिति।

(टि) इदानीं कर्माङ्गाश्रितोपासना स्वासीनतनियमो नास्तीति तद्वदितरोपासनास्वपि तन्नियमाभावमाशङ्क्य परिहरति - किमासीन इति।।

।।उपासने दिगादिनियमनिराकरणाधिकरणम्।।

सू. यत्रैकाग्रता तत्राविशेषात्।।

(मू) उपासनेष्वेव दिग्देशकालेषु संशयः - किं प्राच्यादिनियमोऽस्ति उत यत्र चित्तैकाग्रता सम्भवति तत्र सर्वत्रेत्यनियम इति।

तत्र प्रायेण वैदिकेषु नियमदर्शनादस्ति नियम इति प्राप्ते,

ब्रूमः। प्राचीनप्रवणतादिवत् विशेषश्रवणात् उक्तरूपानियम इति।।

(टि) इदानीमासीननियमवन्न दिगादिनियम इत्याह उपासनेष्विति।।

।। उपासनानामामरणावर्तनाधिकरणम्।

सू. आप्रयाणात्तत्रापि हि दृष्टम्।।

(मू) अभ्युदयफलेषु उपासनेषु संशयः - किं कियन्तञ्चित्कालं प्रत्ययमावृत्त्योपरमेत् उत यावज्जीवमावर्तयेदिति।

तत्र कियन्तञ्चित्कालमावृत्त्योपरमेत् तावता वृत्तिविशिष्टोपसनाशास्त्रार्थस्य कृतत्वादिति प्राप्ते,

ब्रूमः। "स यावत्क्रतुरस्माल्लोकात् प्रैती"ति श्रुत्या मरणकाले प्रत्ययावृत्तिदर्शनात् यावज्जीवमावर्तेतेति। सम्यग्दर्शनार्थान्युपासनानि तु सम्यग्दर्शनसिद्धिपर्यन्तमावर्तनीयानि। तत्र यद्यस्मिन् जन्मनि सम्यग्दर्शनं न सिद्धं तदा यावज्जीवमावर्तयितव्यानीति सिद्धमेव। यदि सिद्धं तदा तदनन्तरं न कर्तव्यानीत्यसिद्धमेव न तान्यत्रोदाहरणमिति बोध्यम्।।

(टि) इदानीं कालनियममाह - अभ्युदयेति।।

।। ज्ञानिनः पापलेपनिराकरणाधिकरणम्।।

सू. तदधिगम उत्तरपूर्वार्धयोरश्लेष विनाशौ तव्द्यपदेशात्।।

(मू) किं ब्रह्मणोऽधिगमे दुरितं क्षीयते वा न वेति संशयः।

तत्र "नाभुक्तं क्षीयते कर्मे"ति स्मरणान्न क्षीयत इति प्राप्ते,

ब्रूमः।छान्दोग्ये पञ्चमेऽध्याये चतुर्विंशे खण्डे "एवं हास्य सर्वे पाप्मानः प्रदूयन्त" इति सञ्चितपापानां नाशस्य, छान्दोग्ये चतुर्थेऽध्याये चतुर्दशे खण्डे "एवंविदि पापकर्म न शिष्यत" इत्यागामिपाप्मनां सम्बन्धस्य च श्रवणात् ब्रह्माधिगमे दुरितं क्षीयते"त्रैकालिकमपी"ति स्मृतिस्तु प्रारब्धकर्मविषया अज्ञविषया वेति।।

(टि) एवं साधनशेषविचारं समाप्याधुना पादार्थो जीवन्मुक्तिरूपफलविचार आरभ्यते - किं ब्रह्मणस इति।।

।। ज्ञानिनः पुण्यलेपनिराकरणाधिकरणम्।।

सू. इतरस्याप्येवमसंश्लेषः पाते तु।।

(मू) किं ब्रह्माधिगमे भूतभाविपुण्यं क्षीयते व न वेति संशयः।

तत्र शास्त्रीयस्य धर्मस्य शास्त्रीयज्ञानेनाविरोधात् न क्षीयत इति प्राप्ते,

ब्रूमः। बृहदारण्यके षष्ठेऽध्याये चतुर्थे ब्राह्मणे "उभे उ हैवैश एते तरती"ति एवमादिषु श्रुतिषु पुण्यपापयोरुभयोरपि नाशश्रवणात् भूतभाविपुण्ये अपि क्षीयते इति।।

(टि) पापक्षयमभिधायाधुना सुकृतक्षयमभिधत्ते किं ब्रह्मेति।।

।।ज्ञानादनारब्धपुण्यपापयोरेव निवृत्त्यधिकरणम्।।

सू. अनारब्धकार्ये एव तु पूर्वे तदवधेः।।

(मू) किं ब्रह्माधिगमे अनारब्धारब्धकार्ययोः च पुण्यपापयोरविशेषेण नाशः उतानारब्धकार्ययोरेवेति संशयः।

तत्र विशेषाश्रवणादविशेषेणेति प्राप्ते,

ब्रूमः। छान्दोग्ये षष्ठेऽध्याये चतुर्दशे खण्डे "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्य" इति शरीरपातावधि निर्मोक्षश्रवणात् अनारब्धकार्ययोरेव नाश इति।।

(टि) इदानीमनारब्धकार्ययोरेव पुण्यपापयोर्नाश इत्याह किमित्यादिना।।

।। अग्निहोत्रादिनित्यकर्मणो नाशनिराकरणाधिकरणम्।।

सू. अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्।।

(मू) किमग्निहोत्रादीनां नित्यनैमित्तिककर्मणां नाशोऽस्ति न वेति संशयः।।

तत्रनारब्धकर्मत्वाविशेषादस्ति नाश इति प्राप्ते,

ब्रूमः। बृहदारण्यके षष्ठेऽध्याये चतुर्थे ब्राह्मणे श्रूयते "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन"त्यादि, अनेन वाक्येन नित्यनैमित्तिककर्मणां ज्ञानैककार्यत्वदर्शनात् नास्ति तेषां नाश इति।।

(टि) अथ नित्यकर्मफलनाशाभावमाह किमित्यादिना।।

DEPARTMENT LIBRARY, MADRAS-28.

।।नित्यकर्मणोर्विद्यासाधनताधिकरणम्।।

सू. यदेव विद्ययेति हि।।

(मू) किमग्निहोत्रादि नित्यकर्माङ्गाश्रितविद्यासंयुक्तमेव मुमुक्षुणानुष्ठेयमुत संयुक्तं केवलं चेत्यविशेषेणेति संशयः।

तत्र छान्दोग्ये प्रथमाध्याये प्रथमे खण्डे "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवती"ति श्रवणात् विद्यायुक्तमेवानुष्ठेयमिति प्राप्ते,

ब्रूमः। बृहदारण्यके षष्ठेऽध्याये चतुर्थे ब्राह्मणे "तमेतं वेदानुवचनेन"त्यादिकेवलस्यपि विद्यासहकारित्वश्रवणादविशेषेणेति।।

(टि) इदानीं नित्यकर्मणां विद्यासहितानुष्ठाननियमो नास्तीत्याह किमित्यादिना ।।

।। अधिकारिणामपि मुक्तिसम्भवाधिकरणम्।।

सू. भोगेन त्वितरे क्षपयित्वा सम्पद्यते।

(मू) किं ब्रह्मतत्ववित् प्रारब्धक्षयानन्तरमपि संसरति उत नेति संशयः।

तत्र तत्त्वविदोऽपि देहपातात् प्राक् संसारदर्शनात्

प्रारब्धक्षयानन्तरमपि संसरतीति प्राप्ते,

ब्रूमः। छान्दोग्ये षष्ठाध्याये चतुर्दशे खण्डे श्रूयते "तस्य तावदेव चिरं यावन्न विमाक्ष्येऽन(थ) सम्पत्स्ये" इत्येवमादिश्रुतिभिः प्रारब्धक्षयानन्तरं मुक्तिरित्यवधारणात् न प्रारब्धक्षयानन्तरं संसरतीति।।

।। इति शारीरकमीमांसायां चतुर्थाध्यायस्य।।

।। प्रथमो जीवन्मुक्तिपादः।।

(टि) इदानीं भोगेन प्रारब्धकाराकर्मक्षय इत्याशयेनाह किमित्यादिना। संसारहेतुभूतपुण्यपापलक्षणा जीवन्मुक्तिरिति बोध्यम्।।

।। इति केरलीये षोढशाध्यायी।।

।। टिप्पणे षोडशाध्यायस्य।।

।। प्रथमः पादः समाप्तः।।

।। अथ चतुर्थस्य द्वितीयः पादः।।

।।वागादीनां मनसि वृत्तिलयाधिकरणम्।।

सू. वाङ्मनसि दर्शनाच्छब्दाच्च।।

(मू) छान्दोग्ये षष्ठाध्याये अष्टमे खण्डे श्रूयते –"अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्पद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामिति।

तत्र संशयः – किं सवृत्तिकाया वाच एव मनसि लय उच्यते किं वा वाग्वृत्तिमात्रस्येति।

तत्र "वाङ्मनसि सम्पद्यत" इति वाच एव मनसि लय श्रवणात् सवृत्तिकाया वाच एव मनसि लय इति प्राप्ते,

ब्रूमः। अतदुपादाने मनसि वाग्लयासम्भवात् वाग्वृत्तिमात्रस्य

लय इति। वृत्तिवृत्तिमतोरभेदोपचारात् वाक्छब्दप्रयोग इति द्रष्टव्यम्। एवं दशानामपीन्द्रियाणां वृत्तिमात्रेण मनसि लय इति बोध्यम्।।

(टि) ।।श्रीः।।

।। अथ षोढशस्य द्वितीयः पादः।

अथ द्वितीयपाद उत्क्रान्तिप्रकारश्चिन्त्यते। तत्रात्र आगादीनां मनसि वृत्तिसम्पत्तिमाह - छान्दोग्य इति।।

।। मनसः प्राणे लयाधिकरणम्।।

सू. तन्मनः प्राण उत्तरात्।।

(मू) तत्रैव "मनः प्राण" इत्युतरवाक्ये संशयः - किमत्र मनसः स्वरूपलय उत वृत्तिलय इति।

तत्र प्राणमनसोः प्रकृतिभूतयोः अबन्नयोः प्रकुतिविकृतित्वोपत्तेः स्वरूपलय इति प्राप्ते,

ब्रूमः। पूर्वन्यायाद्वृत्तिलय इति। न तु प्राणाडिकेव प्रकृतिविकृतिभावेन लयस्सम्भवति तथा दर्शनादिति।।

(टि) अथ मनसो वृत्तिलयमाह - तत्रेति।।

।। प्राणानां जीवे लयाधिकरणम्।।

सू. सोऽध्यक्षे तदुपगमादिभ्यः।।

(मू) तत्रैव "प्राणस्तेजसी"त्यत्र संशयः - किं प्राणस्य तेजसि वृत्तिलय उत जीवे इति।

तत्र "प्राणस्तेजसी"ति श्रवणात् तेजसीति प्राप्ते,

ब्रूमः। "एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभि समायान्ती"ति जीवे लयश्रवणादविद्याकर्मपूर्वप्रज्ञोपाधिके जीवे

प्राणस्य लय इति। प्राणसम्पृक्तो जीवः तेजसि तेजस्संहितदेहबीजभूत-सूक्ष्मपञ्चभूतेषु सम्पद्यते लीयत इति श्रुत्यर्थः।।

(टि) अथ मनसो वृत्तिलयमाह - तत्रेति।।

।। ज्ञान्यज्ञानिनोरुत्क्रान्तिसामान्याधिकरणम्।।

सू. समाना चाऽऽमृत्युप्रक्रमादमृतत्वं चानुपोष्य।।

(मू) किमियमुत्क्रान्तिः विदुष एव उताविदुष एव उत विद्वदविदुषोः समानेति संशयः।

तत्र विद्याप्रकरणे समाम्नानात् विदुष एवेति चेत् उच्यते। विदुषोऽमृतत्वश्रवणादविदुष एवेति प्राप्ते,

ब्रूमः। विशेषाश्रवणाद् देवयानाद्युपक्रमात् प्राक्योत्क्रान्तिः सा सगुणब्रह्मविदो विदुषश्च समानेति। अमृतत्वश्रवणं त्वापेक्षिकमिति बोध्यम्।।

(टि) उक्तेत्क्रान्तिः सगुणब्रह्मविदुषामप्यस्तीत्याह - किमियमिति।।

।। उपासकस्य ब्रह्मणि स्वरूपेण लयनिराकरणाधिकरणम्।

सू. तदाऽपीतेः संसारव्यपदेशात्।।

(मू) "तेजः परस्यां देवतायमि"त्यस्य सकरणकप्राणसहित-जीवसहितभूतान्तरसहितं तेजः परमात्मनि लीयत इत्यर्थः।

तत्र संशयः - किं स्वरूपलय उत वृत्तिलय इति।

तत्र परमात्मनः सर्वप्रकृतित्वात् स्वरूपलय इति प्राप्ते,

ब्रूमः। कठवल्लीषु पञ्चम्यां वल्ल्यां श्रूयते -

।।योनिमन्ये प्रवर्तन्ते शरीरस्थस्य देहिनः।।

इति। एवमादिषु {श्रुतिषु} संसारश्रवणात् वृत्तिलय इति। स्वरूपलये पुनः संसारश्रवणाद्यनुपपत्तिरिति।।

(टि) इदानीं मृतस्य ब्रह्मसम्पत्तिप्रकारं निरूपयति तेज इति।।

।। ज्ञानिनां प्राणिनां देहादनुत्क्रान्त्यधिकरणम्।।

सू. प्रतिषेधादिति चेन्न शारीरात्।।

(मू) निर्गुणब्रह्मविदः उत्क्रान्तिरस्ति नेति संशयः।

तत्र ब्रह्मविदो देहादनुत्क्रान्तौ मुक्त्यभावप्रसङ्ग.ात् अस्ति देहादुत्क्रान्तिरिति प्राप्ते,

ब्रूमः। बृहदारण्यके षष्ठेऽध्याये चतुर्थे ब्राह्मणे "न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येती"ति उत्क्रान्तिप्रतिषेधश्रवणात् नास्त्युत्क्रान्तिरिति। नचोत्क्रान्त्यभावमात्रेण मुक्त्यसम्भवः ब्रह्मणि लयादिति।।

।। तत्त्ववित्प्राणानां परमात्मन्येव लयाधिकरणम्।।

सू. तानि परे तथा ह्याह।।

(मू) किं ब्रह्मविदः प्राणशब्दितानामिन्द्रियाणां भूतानां च पृथव्यादिषु लय उत ब्रह्मणीति संशयः।

तत्र मुण्डके षष्ठे "गताः कलाः पञ्चदश प्रतिष्ठा" इति कलानां पृथव्यादिषु लयश्रवणात् पृथव्यादिष्वेव लय इति प्राप्ते,

ब्रूमः। प्रश्नोपनिषदि षष्ठे प्रश्ने "एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ती"ति ब्रह्मणि

लयश्रवणात् ब्रह्मण्येव तेषां लय इति। पृथिव्यादिषु प्रलीय तैस्सह ब्रह्मणि लय इति श्रुत्यर्थः। अतो न श्रुत्योर्विरोध इति।।

(टि) परब्रह्मविदः प्राणानां ब्रह्मणि लय इत्याह - किं ब्रह्मविद इति।।

।। तत्त्वविद्वागादिलयस्य निःशेषत्वाधिकरणम्।।

सू. अविभागो लोकवत्।।

(मू) किं विद्वत्कलालयः अविदुष इव वृत्तिलय उत स्वरूपलय इति।

तत्र लयसामान्यात् वृत्तिलय इति प्राप्ते,

ब्रूमः। प्रश्नोपनिषदि षष्ठे प्रश्ने "स एषो कलोऽमृतो भवती"ति श्रवणात् स्वरूपलय इति। अविद्यानिमित्तनां कलानां विद्यानिमित्ते न सावशेषता युक्तेति।।

(टि) परब्रह्मविद एव कलाशेषस्य निरवशेषतामिदानीमाह - किं तद्वदिति

।। उपासकोत्क्रान्तेर्विशेषाधिकरणम्।।

सू. तदेकोग्रज्वलनं तत्प्रकाशितद्वारो
विद्यासामर्थ्यात्तच्छेषगत्यनु-
स्मृतियोगाच्च हार्दानुगृहीतः
शताधिकया।।

(मू) बृहदारण्यके षष्ठेऽध्याये चतुर्थे ब्राह्मणे श्रूयते "तस्य हैतस्य हृदयस्याग्रं प्रद्योतते तेन प्रद्योतनेन एव आत्मा निष्क्रामति

चक्षुषो मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्य" इति। हृदयाग्रज्वलनपूर्विका चक्षुरादिस्थानापादानिका चोत्क्रान्तिः। अत्रापरब्रह्मविदविदुषोश्च हृदयाग्रप्रद्योतनं तत्प्रकाशितद्वारत्वं च समानं,उत्क्रान्त्यपादाने तु संशयः - किं विद्वदविदुषोरूभयोरपि अविशेषेण चक्षुरादिषु येन केनचिदद्वारेणोत्क्रान्तिरित्यनियमः उत सगुणब्रह्मविदो मूर्धन्यनाड्यैव विदुष इतरस्थानैरिति नियम इति।

ब्रूमः। छान्दोग्ये अष्टमेऽध्याये दहरविद्यायां षष्ठे खण्डे श्रूयते - "शतं चैका हृदयास्य नाड्य

स्तासां मूर्धानमभिनिःसृतैका ।

तथोर्ध्वमायन्नमुतत्वमेति

विष्वज(ङ्ङ)न्या उत्क्रमणे भवन्ति।।"

इति विशेषश्रवणान्नियम इति।।

(टि) एवं प्रासङ्गि.कीं परब्रह्मविषयां चिन्तां समाप्याधुना सगुणब्रह्मविदो मार्गोपक्रमं दर्शयति। तत्र विषयं दर्शयति उत्क्रान्त्यपादान इति।।

।। रात्रिमृतस्यापि रश्म्यनुसारित्वाधिकरणम्।।

सू. रश्म्यनुसारी।।

(मू) दहरविद्यायां षष्ठे खण्ड एव " अथ या हृदयस्य नाड्य" इत्युपक्रम्य नाडिरश्मिसम्बन्धमुक्त्वा "अथ यतैतस्मात् शरीरादुत्क्रामति अथैतैरेव रश्मिभिरूर्ध्वमाक्रामतः" इत्युक्त्वा "शतं चैका चे"त्युक्तम्। तत्र मूर्धन्यनाड्या निष्क्रामन् छरश्म्यनुसारी गच्छतीति गम्यते।

तत्र संशयः - किमेतद्रश्म्यनुसारित्वमहनि रात्रौ वा

म्रियमाणस्याविशेषेण स्यादुताहन्येवेति।

तत्र रात्रौ रश्म्यभावादहन्येवेति प्राप्ते,

ब्रूमः। तस्मिन्नेव खण्डे "अमुष्मादादित्यादित्या" दिना नाडिरश्मिदेहसम्बन्धस्य यावद् देहभावित्वदर्शनात् अविशेषेण रश्म्यनुसारित्वं स्यादिति। दहरविद्यैवाहर्विद्येत्युच्यते।

(टि) इदानीं नाडीद्वारा निष्क्रान्तस्य सदा रश्म्यनुसारित्वमित्याह - रश्म्यभावादिति। नहि सूर्यरश्मिरस्तीति भावः। रात्रावपि रश्म्यनुवृत्तिरस्ति। स्तोकानुवृत्त्या तु दुर्लक्ष्यत्वं दुर्दिनवदित्याचार्योक्ति- मभिप्रेत्य श्रुतिमपन्यस्यति अमुष्मादिति।।

।।अयनाधिकरणम् - तत्त्वविदो दक्षिणायनेऽपिविद्याफलाधिकरणम्।।

सू. अतश्चायनेऽपि दक्षिणे।।

(मू) किं दक्षिणायने म्रियमाणो विद्वान् विद्याफलं प्राप्नोति उत नेति संशयः।

तत्र पञ्चाग्नि विद्ययोरूपकोसलविद्यायां च आपूर्यमाणपक्षाद्यान्! षड्दङ्नेति मासानि" श्रवणात् न प्राप्नोतीति प्राप्ते,

ब्रूमः। दक्षिणायने म्रियमाणोऽपि विद्वान् प्राप्नोत्येव विद्याफलं अन्यथा पाक्षिकफलत्वप्रसङ्ग.ादिति। श्रुतिस्तु गमयितृपरा न कालपरेति वक्ष्यति।।

।। इति शारीरकमीमासायां चतुर्थाध्यायस्य।।
।। द्वितीय उत्क्रान्तिपादः।।

(टि) इदानीं दक्षिणायने मृतस्यापि विद्याफलप्राप्तिरविशिष्टेत्याह

- किं दक्षिणायन इति।।

।। इति केरलीये षोडशाध्यायीटिप्पणे।।

।। षोडशाध्यायस्य द्वितीयः पादः ।।

।। अथ चतुर्थस्य तृतीयः पादः।।

।। अर्चिरादिकस्यैव ब्रह्मलोकमार्गताधिकरणम्।।

सू. अर्चिरादिना तत्प्रथितेः।।

(मू) छान्दोग्ये दहरविद्यायां षष्ठे खण्डे "रश्मिरूर्ध्वमाक्रामत" इति रश्मिसम्बन्धेन ब्रह्मलोकप्राप्तिमार्गः श्रुतः। अस्ति छान्दोग्ये पञ्चमाध्याये "श्वेतुकेतुर्वे"ति तृतीयं खण्डमारभ्य अष्टभिः खण्डैः पञ्चाग्निविद्या प्रतिपादिता। तत्रान्त्ये खण्डे "अर्चिषमाभिसम्भवन्त्यर्चिषोऽहरि"त्यर्चिरादिमार्गः श्रूयते। अस्ति च बृहदारण्यके अष्टमाध्याये द्वितीये ब्राह्मणेऽपि पञ्चाग्निविद्या। तत्रापि "अर्चिरभिसम्भवति अर्चिषोऽहविरित्यर्चिरादिमार्गः श्रूयते। तथा कौषीतकिब्राह्मणोपनिषदि पर्यङ्क.विद्यायां " स हि तं देवयानं पन्थानमापद्याग्निलोकमागच्छती"त्यग्निलोकादिः श्रूयते। तथा बृहदारण्यके सप्तमे अध्याये द्वादशे ब्राह्मणे" यदा वै पुरुषोऽस्मात् लोकात् प्रैति स वायुमागच्छती"ति वायुवादिकः श्रूयते। तथा मुण्डके द्वितीये "सूर्येण ते विरजाः प्रयान्ती"ति सूर्यादिकः श्रूयते।

तत्र संशयः - किमेते मार्गाः परस्परं भिन्नाःउतानेकविशेषणयुक्त एक एवेति।

तत्र भिन्नप्रकरणाम्नातत्वात् भिन्ना इति प्राप्ते,

ब्रूम.ः। बृहदारण्यके पञ्चाग्निविद्यायां "ये चामी अरण्ये

श्रद्धां सत्यमुपासत" इति, छान्दोग्ये पञ्चाग्निविद्यायां "ये चामी अरण्ये श्रद्धां तप इत्युपासत" इति विद्यान्तरशीलिनामार्चिरादि-मार्गश्रवणात् अर्चिरादिक एक एव मार्ग इति। स एव क्वचित् केनाचित् विशेषेणोपदिष्ट इति नास्ति विरोध इति।।

(टि) ।। श्रीः।।

।।अथ षोडशस्य तृतीयः पादः।।

एवं प्रयाणसमयप्रकारं निरूप्याधुना प्रयतो देवशनाख्यां गतिं निरूपयितुं तृतीयपाद आरभ्यते - छान्दोग्य इति। विद्यान्तरशाीलिनामिति। तस्मात् प्रकरणं न नियामकमिति भावः।।

।। वायोः सन्निवेशाधिकरणम्।।

सू. वायुमब्दादविशेषाविशेषाभ्याम्।।

(मू)पर्यङ्क.विद्यायां "अनिलोकमागच्छति स वायुलोकं स वरुणलोकं स इन्द्रलोकं स ब्रह्मलोकमि"ति देवयानः पन्थाः श्रूयते। छान्दोग्ये पञ्चाग्निविद्यायां "तेऽर्चिषमभिसम्भवन्ति अर्चिषोऽहरह्न आपूर्यमाणपक्षं आपूर्यमाणपक्षाद्यान् षडुदङ्नेति मासान् मासेभ्यः संवत्सरं संवत्सरादादित्यं आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषो मानवः स एनान् ब्रह्म गमयति एष देवयानः पन्था" इति श्रूयते -"यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य रवं तेन स ऊर्ध्वमाक्रामति स आदित्यमां गच्छतीति। तत्रार्चिरग्निलोकशब्दौ ज्वलनवचनत्वादेकार्थाविति न तत्र सन्निवेशक्रमविशेषः। वायौ संशयः किमयं वायुरर्चिरादिषु अर्चिषोऽनन्तरं निवेशयितव्य उत संवत्सरादिति।

तत्राग्निलोकानन्तरपाठात् अर्चिषोऽनन्तं निवेश इति प्राप्ते, ब्रूमः। बृहदारण्यके आदित्यात् प्राक् श्रवणात् संवत्सरात् परमादित्यात् प्राग् वायुर्निवेशयितव्य इति पर्यङ्क.विद्यायां पाठक्रमः। बृहदारण्यके तु ऊर्ध्वशब्देन क्रमस्योक्तत्वात् श्रौतः क्रम इति स बलीयानिति।।

अत्रेदमवधेयम् - बृहदारण्यके मासेभ्यो देवलोकं देवलोकादादित्यमादित्याद्वैद्युतमिति पठ्यते । अत्र संवत्सरो न। छान्दोग्ये तु देवलोको न । तत्र माससम्बन्धात् संवत्सरः पूर्वः। ततश्चायमत्र क्रमः - मासेभ्यः संवत्सरं संवत्सराद् देवलोकं देवलोकद्वायुं वायोरादित्यमितीति।।

(टि) अथ द्वाभ्यामधिकरणाभ्यां मार्गसन्निवेशं निरूपयति पर्यङ्के. त्यादिना।।

।। वरुणादिलोकानां व्यवस्थाधिकरणम्।।

सू. तडिदोऽपि वरुणः सम्बन्धात्।।

(मू) किं वरुणलोकादीनां अर्चिरादिमार्गे सम्बन्धोऽस्ति नेति संशयः।

तत्र वाय्वादित्ययोः सम्बन्धश्रवणवदेषां सम्बन्धाश्रवणात् नास्ति सम्बन्ध इति प्राप्ते,

ब्रूमः। वरुणस्याब्द्वारा विद्युत्सम्बन्धसत्वात् विद्युत उपरिष्टादस्ति सम्बन्ध इति। ततश्चायं मन्त्रक्रमः - मूर्धन्यनाड्यात् क्रमणानन्तरमर्चिषमभिसम्भवन्ति तथार्चिषोऽहरह्नः आपूर्यमाणपक्षं पक्षात् मासान् मासेभ्यः संवत्सरं संवत्सरात् देवलोकं देवलोकाद्वायुलोकं वायुलोकादादित्यं आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतं विद्युतो वरुणलोकं वरुणलोकादिन्द्रलोकं इन्द्रलोकात् प्रजापतिलोकं

प्रजापतिलोकात् ब्रह्मलोकानीति।।

(टि) अधिकरणद्वयोक्तः क्रमः सुखप्रतिपत्तये प्रदर्श्यते तत श्चायमित्यादिना।।

।।अर्चिरादीनामातिवाहिकत्वाधिकरणम्।।

सू.आतिवाहिकास्तल्लिङ्ग.ात्।।

(मू) अर्चिरादिषु संशयः - किमेतानि मार्गचिह्नानि उत भोगभूमयः अथवा गन्तृणां गमयितार इति। चिह्नोपदेशसरूपत्वात् चिह्नानीति चेत्। उच्यते। भोगभूमित्वप्रत्यायकलोकशब्दश्रवणात् भोगभूमय इति।इति प्राप्ते,

ब्रूमः। छान्दोग्ये. उपकोसलविद्यायां पञ्चाग्निविद्यायां च "स एनान् ब्रह्म गमयती"ति बृहदारण्यके पञ्चाग्निविद्यायां "ब्रह्मलोकान् गमयती"ति गमयितृत्वश्रवणात् अर्चिराद्याधिष्टितचेतना देवताविशेषा गमयितार एवेति।।

(टि) अर्चिरादीनां सन्निवेशं विमृश्याधुना तेषामेव देवतात्वं साधयति - अर्चिरादिष्विति। श{ग}मयितृत्वश्रवणादिति। गच्छातस्त्वममुं गिरिं ततो न्यग्रोधं ततो नदीमित्येवं लौकिकमार्गचिह्नोपदेशसरूपत्वाद्धि चिह्नत्वमेषाम्।स तूपदेशो गमयितृत्वेऽपि लोके दृश्यते। गच्छ त्वमितो देवदत्तं ततो ब्रह्मदत्तं ततो विष्णुगुप्तमिति। तस्माद्व्यभिचारान्नोपदेशसारूप्य-चिह्नत्वम्। नापि लोकशब्दात् पितृलोकदेवलोकदिवत् भोगभूमित्वं तल्लोकवासिनां भोगभूमित्वेन लोकशब्दोपपत्तेरिति भावः।।

।। कार्यब्रह्मण एवोत्तरमार्गगम्यत्वाधिकरणम्।।

सू. कार्यं नादरिरस्य गत्युपपत्तेः।।

(मू) छान्दोग्ये उपकोसलविद्यायां पञ्चाग्निविद्यायां च श्रूयते "स एनान् ब्रह्म गमयती"ति।

तत्र संशयः। किमत्र पर ब्रह्म गन्तव्यत्वेन श्रूयते उत कार्यं ब्रह्मेति।

तत्र नपुंसकस्य ब्रह्मशब्दस्य परस्मिन् ब्रह्मणि मुख्यत्वात् परमेव ब्रह्म गन्तव्यत्वेन श्रूयत इति प्राप्ते,

ब्रूमः। सर्वगतस्य परस्य ब्रह्मणो गन्तव्यत्वाभावात् कार्यं ब्रह्म गन्तव्यत्वेनोपदिश्यत इति मुख्यार्थबाधे लक्षणा युक्तैवेति।

अत्रेदमवधेयम् -सगुणब्रह्मोपासकं नाम अर्चिरादिमार्गेण सत्यलोकं प्राप्य सत्यलोकप्रलयपर्यन्तमत्रोषित्वा तदनन्तरं हिरण्यगर्भेण सह मुक्तिरिति इत्थं क्रममुक्तिरिति।।

(टि) इदानीमर्चिरादिकया गन्तव्यं निरूपयति - छान्दोग्ये इति। लक्षणेति। ब्रह्मशब्देन सामीप्यसम्बन्धात् सत्यलोको लक्ष्यते। अस्ति हि सत्यलोकस्य परब्रह्मसामीप्यम्। तल्लोकवासिनां जन्मव्यवधानमन्तरेण मोक्ष्यमाणत्वादिति भावः।

।। प्रतीकोपासकानां ब्रह्मलोकगतिनिराकरणाधिकरणम्।।

सू. अप्रतीकालम्बनान्नयतीति बादरायण उभयथाऽदोषात् तत्क्रतुश्च।

(मू) पञ्चाग्न्युपकोसलविद्ययोः श्रूयते - तत् पुरुषो मानवः स एनान् ब्रह्म गमयती"ति । तथा बृहदारण्यके पञ्चाग्निविद्यायां

"पुरुष मानस एत्य ब्रह्मलोकान् गमयतीति।

तत्र संशयः। किं सर्वानुपासकान् ब्रह्मलोकान् गमयति उत प्रतीकोपासकानेवेति।

तत्र विशेषाश्रवणात् सर्वानुपासकान् ब्रह्मलोकं गमयतीति प्राप्ते,

ब्रूमः। छान्दोग्ये सप्तमेऽध्याये प्रथमे खण्डे श्रूयते - यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवती"ति । एवमादिभिः ब्रह्मप्रतीकोपासनेषु फलविशोषश्रवणादप्रतीकोपासकान् सगुणब्रह्मोपासकानेव ब्रह्मलोकं गमयति न प्रतीकोपासकानी {नि} ति। पञ्चाग्निविद्यादिषु श्रुतिसामर्थ्यात् ब्रह्मलोकप्राप्तिरिति।।

।। इति शारीरकमीमांसायां ।।

।। चतुर्थाध्यायस्य।।

।। तृतीयोऽर्चिरादिपादः।।

(टि) एवं गन्तव्यं निरूप्याधुना गन्तारं निरूपयति पञ्चेत्यादिना।।

।। इति केरलीये षोडशाध्यायीटिप्पणे।।

।। षोडशाध्यायस्य ।।

।। तृतीयः पादः।।

।।अथ चतुर्थस्य चतुर्थः पादः।।

।। मुक्तेर्नवीनत्वनिराकरणाधिकरणम्।।

सू. सम्पद्याऽऽविर्भावः स्वेनशब्दात्।।

(मू) छान्दोग्ये अष्टमाध्याये इन्द्रप्रजापतिसंवादे "मघवन्मर्त्यमित्यस्मिन् द्वादशे खण्डे श्रूयते - "एवमेवैष सम्प्रसादोऽस्मात् शरीरात् समुत्याय परं ज्योतिरुपसम्पद्य स्वन रूपेणाभिनिष्पद्यत" इति।

सम्प्रसादः अविद्याकृतकालुष्यावगमात् प्रसन्नो जीवः अस्मात् शरीरात् समुत्थाय शरीरत्रयाभिमानं परित्यज्य परं ज्योतिरुपसम्पद्य परं ब्रह्म प्राप्य स्वेन मुक्तरूपेण अभिनिष्पद्यते अवतिष्ठत इत्यर्थः।

तत्र संशयः - किं निर्गुणब्रह्मविदोऽपि स्वर्गादिफलभोगस्थानेष्विव केनचिद्विशेषेणावस्थानं उतात्ममात्रेणेति।

तत्र मोक्षस्य फलत्वाविशेषात् विशेषेणावस्थानमिति प्राप्ते, ब्रूमः। स्वेनेत्यात्मवाचिस्वशब्देन विशेषणसामर्थ्यात् आत्ममात्रेणैवावस्थानमिति। नच स्वशब्द आत्मीयवचनः रूपशब्देन गतार्थत्वेन वैयर्थ्यप्रसङ्ग.त् नचान्यरूपेणैकस्येत्यवस्थानं सम्भवतीति।।

(टि) ।। श्रीः ।।

।। अथ षोडशस्य चतुर्थः पादः।।

एवं सगुणब्रह्मविदां सत्यलोकप्राप्तिमुक्त्वाधुना निर्गुणब्रह्मविदां ब्रह्मभावं वक्तुं चतुर्थः पाद आरभ्यते। प्रासङ्गि.कं चान्यदथवोभयमपि पादार्थः। शरीरत्रयेति। अवस्थात्रययुक्तत्वादत्र त्रित्वमिति बोध्यम्।।

।।मुक्तेर्ब्रह्मभिन्नतानिराकरणाधिकरणम्।।

सू. अविभागेन दृष्टत्वात् ।।

(मू) "परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत" इत्यत्रैव संशयः - किं मुक्तो ब्रह्मभिन्नत्वेनावतिष्ठते उत ब्रह्माभिन्नत्वेनेति।

तत्र ज्योतिरुपसम्पद्येति कर्तृकर्मणोर्निर्देशात् ब्रह्मभिन्नत्वेनावतिष्ठत

इति प्राप्ते,

ब्रूमः। "तत्त्वमसि" "अहं ब्रह्मास्मि" "ब्रह्मैव सन्नि-त्यादिश्रुतिषु अभेददर्शनात् मुक्तो ब्रह्माभिन्नत्वेनैवावतिष्ठत इति।।

(टि) इदानीं मुक्तस्य ब्रह्माविभक्ततामाह - परं ज्योतिरिति। कर्तृकर्मणोरिति। तत्र सम्प्रसादशब्दाभिहितो जीव उपसम्पत्तौ कर्ता ज्योतिश्शब्दाभिहितं ब्रह्म कर्मेति। अभेददर्शनादिति। प्रकृतेऽपि "ज्योतिरुपसम्पद्ये"ति वाक्यतत्पदार्थशुद्धिविषयम्। अतस्तदानीं भेदोऽस्तु। तत उपरि स्वेन रूपेणाभिनिर्वि {ष्प} द्यत इति वाक्यं वाक्यार्थदशापन्नं उक्तस्वरूपं प्रतिपादयतीति। तत्र च स उत्तमः पुरुष इत्यभेद इति भावः।।

।।सविशेषत्वादिव्यवस्थानिराकरणाधि-करणम्।।

सू. ब्राह्मेण जैमिनिरुपन्यासादिभ्यः।।

(मू) स्वेन रूपेणेत्यत्रैव संशयः - किं सन्ति अपहतपाप्मत्व-सर्वज्ञत्वेश्वरत्वादयो धर्माः तद्रूपत्वेन च मुक्तोऽवतिष्ठते अथवा न सन्ति चिन्मात्रात्मना च मुक्तोऽवतिष्ठते उतव्यवहारापेक्षया सन्ति धर्माः परमार्थतस्तु न सन्ति मुक्तश्च वस्तुतश्चिन्मात्रेण व्यवहारापेक्षया चावान्तरकल्पितापहतपाप्मत्वेश्वरत्वादिरूपेण चेत्युभयरूपेणावतिष्ठत इति।

तत्र "य आत्मापहतपाप्मेत्यादिश्रवणात् सन्ति तादृशा धर्माः तद्रूपेण च मुक्तोऽवतिष्ठत इति चेत्। उच्यते। "एवं वा अरे अयमात्मानन्तरो ब्राह्यः कृत्स्नः प्रज्ञानघन एवे"त्यादि केवलचिन्मात्रात्मश्रवणात् न सन्ति धर्माः चिन्मात्रात्मना चं

मुक्तोऽवतिष्ठत इति प्राप्ते,

ब्रूमः। उभयथा श्रवणादुक्तोभयरूपेण मुक्तोऽवतिष्ठत इति।

(टि) इदानीं मुक्तस्य सविशेषत्वनिर्विशेषत्वे विचार्येते स्वेनेति।।

।। परलोकगोपासकस्य भोग्यवस्तुसृष्टौ सङ्क.ल्पहेतुताधिकरणम्।।

सू. सङ्क.ल्पादेव च तच्छ्रुतेः।

(मू) छान्दोग्ये अष्टमाध्याये दहरविद्यायां द्वितीये खण्डे श्रूयते - "स यदि पितृलोककामो भवति सङ्क.ल्पादेवास्य पितरः समुत्तिष्ठन्ती"ति।

तत्र संशयः - किं ब्रह्मलोकस्यास्य विदुषः सङ्क.ल्पादेव पितृमातृभ्रातृस्वसृसखिगन्धमाल्यान्नपानगीतवादित्रस्त्रीप्रभृति-भोग्यजातसम्पत्तिर्भवति उत यत्नान्तरसहितात् सङ्क.ल्पादिति।

तत्र सङ्क.ल्पस्य भोग्यसम्पत्तौ यत्नान्तरसापेक्षत्वात् अशनाद्यत्नान्तरसहितादेव पित्रादिसम्पत्तिरिति प्राप्ते,

ब्रूमः। सङ्क.ल्पादेवेत्येवकारेण यत्नान्तरव्यावृत्त्यवगमात् सङ्क.ल्पादेव पित्रादिसम्पत्तिरिति।।

(टि) इदानीं बह्मलोकस्यस्य स्थितिं दर्शयति - छान्दोग्य इति।

।। देहभावाभावयोरैच्छिकताधिकरणम्।।

सू. अभावं नादरिराह ह्येवम्।।

(मू) "सङ्क.ल्पादेवे"ति श्रुतेर्विदुषः सङ्क.ल्पसाधनं मनोऽस्तीति सिद्धम्। तत्र शरीरेद्रियाणि सन्ति उत न सन्ति आहोस्वित्

सन्ति न सन्ति चेति संशयः।

तत्र "मनसैतान् कामान् पश्यन्ती"ति मनोविशेषणसामर्थ्यात् न सन्ति शरीरेन्द्रियाणि चेत्,उच्यते। "स एकधा त्रिधा भवति" इत्याद्यनेकधाभावविकल्पश्रवणसामर्थ्यात् सन्ति शरीरेद्रियाणि प्राप्ते,

ब्रूमः। उभयश्रुतिदर्शनात् सन्ति च न सन्ति चेति उभयं साध्वेवेति। यदा सशरीरेन्द्रियतां कल्पयति तथा तदा भवति यदा त्वन्यथा सङ्क.ल्पयति तदान्यथा भवति सत्य-सङ्क.ल्पत्वादित्युभयस्यापि साधुत्वमिति।।

(टि) इदानीं तस्यैव शरीरादिसदसद्भावश्चिन्त्यते सङ्क.ल्पादिति।।

।।ज्ञानिनोऽनेकदेहेषु सात्मकत्वाधिकरणम्।।

सू. प्रदीपवदावेशस्तथा हि दर्शयति।।

(मू) छान्दोग्ये सप्तमाध्याये षड्विंशे खण्डे "एकधा भवति त्रिधा भवति पञ्चधा भवति सप्तधा भवति नवधे" त्यादि विदुषो युगपदनेकशरीरस्वीकारः श्रूयते।

तत्र संशयः - किं निरात्मकानि शरीराणि दारुयन्त्रवत् सृज्यन्ते उत सात्मकानीति।

तत्रात्ममनसोरनेकशरीरसम्बन्धादर्शनात् एकं सात्मकं इतराणि निरात्मकानीति प्राप्ते,

ब्रूमः। एकधा त्रिधेत्यादि एकस्यानेकभावश्रवणसामर्थ्यात् सात्मकान्येवेति।

अनेकशरीरेषु आत्मनस्सम्बन्धस्तु सत्यसङ्क.ल्पत्वात्

प्रदीपवदुपपद्यत इति बोध्यम्।।

(टि) इदानीं विदुषोऽनेकशरीरप्रवेशप्रकारं दर्शयति छान्दोग्य इति।।

।।ज्ञानिनो जगत्स्रष्टृत्वनिराकरणाधिकरणम्।।

सू. जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च।।

(मू) ये सगुणब्रह्मोपासका मनसा सहेश्वरसायुज्यं व्रजन्ति तेषां किमैश्वर्यं ईश्वरस्येव निरतिशयं उत सातिशयमिति संशयः।

तत्र छान्दोग्ये अष्टमाध्याये दहरविद्यायां प्रथमचतुर्थ पञ्चमखण्डेषु तेषां सर्वेषु लोकेषु कामचारो भवति निरतिशयैश्वर्यश्रवणात् निरतिशयमेवैश्वर्यमिति प्राप्ते,

ब्रूमः। परमेव ब्रह्माधिकृत्य जगद्व्यापारश्रवणात् सातिशयं जगद्व्यापारवर्जं सगुणब्रह्मोपासकानामीश्वरसायुज्यं प्राप्तानामैश्वर्यमिति। छान्दोग्ये तुतीयेऽध्याये द्वादशे खण्डे "एतावानस्य महिमे"-त्यादिश्रवणात् सगुणे निर्गुणत्वमप्यस्ति। छान्दोग्ये अष्टमेऽध्याये पञ्चदशे खण्डे "न च पुनरावर्तत" इति श्रवणाच्च ब्रह्मलोकं प्राप्तानां न पुनरावृत्तिरिति बोध्यम्। सर्वोपप्लवरहितप्रज्ञानघनप्रत्यगर्थो ब्रह्मैवाहमस्मि।।

।। इति श्रीशारीरकमीमांसायां ।।

।। चतुर्थाध्यायस्य।।

।। चतुर्थो ब्रह्मप्राप्तिपादः।।

।। फलाध्यायश्च समाप्तः।।

(टि) एवं योगिनां यदैश्वर्यं निरूपितं तत् किं निरवग्रहमुत सावग्रहमित्यधुना चिन्तयति य इत्यादिना। अत्रेदमवधेयम् -

अत्र यज्ञादीनां विद्योपयोगकथनेन सकलविद्यास्थानानामेकवाक्यत्वेन ब्रह्मप्रतिपादककत्वमुक्तमिति।

इदानीं सकलविद्यास्थानैकतापन्नस्य परममहावाक्यस्य शास्त्रस्यार्थं दर्शयन् शिष्टाचारं चानुविदधानो ग्रन्थान्ते कृतं मङ्ग.लं शिष्यशिक्षार्थं ग्रन्थतो निबध्नाति - सर्वोपप्लवेति। एतादृशं सकलविद्यास्थानैकवाक्यत्वं तदर्थं च ब्रह्म। अन्यत्र श्रमत् {मं} कुर्वन् प्रत्यवैतीत्यभि प्रायः।।

।। इति केरलीये षोडशाध्यायी।।

।।टिप्पणे षोडशाध्यायस्य।।

।। चतुर्थः पादः।।

।। समाप्तश्चाध्यायः।।

।। टिप्पणं च समाप्तम्।।

।। श्रीः।।

।।श्रीगुरुभ्यो नमः।।

।। अहं ब्रह्मास्मि।।

प्रथमाध्याये प्रथमे स्पष्टब्रह्मलिङ्ग.पादे अधिकरणानि एकादश द्वादश चतुर्दश।।

द्वितीये स्पष्टलिङ्ग.पादेऽधिकरणानि सप्त। त्रयस्त्रिंशत् सूत्राणि।

तृतीयेऽप्यस्पष्टलिङ्ग.पादे त्रयोदश चतुर्दश वाधिकरणानि।

चतुर्थेऽष्टाधिकरणानि अष्टाविंशति सूत्राणि।

प्रथमे समन्वयाध्याये अधिकरणानि एकोनचत्वारिंशत् चत्वारिंशद्वा एकचत्वरिंशद्वा द्विचत्वारिंशद्वा। चतुस्त्रिंशदधिकशतं सूत्राणि।।

द्वितीयस्य प्रथमे स्मृतिपादे त्रयोदशाधिकरणानि सूत्राणि

सप्तत्रिंशत्।

द्वितीये तर्कपादे अष्टावधिकरणानि पञ्चचत्वारिंशत् सूत्राणि।

तृतीये वियत्पादे अधिकरणानि सप्तदश सूत्राणि पञ्चाशत्।

चतुर्थे प्राणपादे नव दश वा अधिकरणानि। सूत्राणि द्वाविंशति:।

अविरोधाध्याये द्वितीये सप्तचत्वारिंशत् अष्टचत्वारिंशद्वाधिकरणानि सप्तपञ्चाशदधिकं शतं सूत्राणि सप्तविंशति:।

द्वितीये तत्त्वम्पदार्थपादे अधिकरणान्यष्टौ एकचत्वारिंशत् सूत्राणि।

तृतीये गुणोपसंहारपादे षट्त्रिंशत् अष्टात्रिंशद्वाधिकरणानि सूत्राणि सप्तषष्टि:।।

चतुर्थे पुरुषार्थपादं सप्तदश अष्टादश वाधिकरणानि द्विपञ्चाशत् सूत्राणि।

तृतीये साधनाध्याये सप्तषष्टि: सप्ततिर्वा अधिकरणानि षडशीतिशतं सूत्राणि।

चतुर्थस्य प्रथमे जीवन्मुक्तिपादे चतुर्दशाधिकरणानि सूत्राण्येकोनविंशति:।

द्वितीये उत्क्रान्तिपादे एकादशाधिकरणानि सूत्राण्येकविंशति:।

तृतीये अर्चिरादिपादे षडधिकरणानि षोडश सूत्राणि।

चतुर्थे ब्रह्मप्राप्तिपादे सप्ताधिकरणानि सूत्राणि द्वाविंशति:।

चतुर्थे फलाध्याये अष्यत्रिंशदधिकरणानि सूत्राणि अप्टसप्तति:।

शारीरकमीमांसायां द्विनवत्यधिकं शतं त्रिनवत्यधिकं शतं अष्टनवत्यधिकं शतं वाधिकरणानि।

सूत्राणि पञ्चपञ्चा {शदधिकपञ्चशतं सूत्राणि}

।।शुभम्।।

Printed by : Saidapet Women Artisans Leather Footwear, Rexine, Stationery & Printing, Educational, Tyre & Allied Products Industrial Co-operative Society ltd.

Chennai- 600 033